॥अथबृहत्कथाप्रारंभः॥ ७ ॥ श्रीशुभंभवतु॥ ७ ॥ ७

बृ. था ॥श्रीगणेशायनमः॥ उमाप्रणामसंक्रांतचरणालक्तकः शशी॥ संध्यारुणइवाभातियस्यपायात्सवःशिवः॥१
॥ सरस्वतीविभ्रमदर्पणानांसूक्तामृतक्षीरमहोदधीनां॥ सन्मानसोल्लासस्रुधाकराणांकवीश्वराणांजयतिप्रकर्षः॥
१ २॥ दोषालोकननिपुणाः परुषगिरोदुर्जनाश्चघूकाश्च। दर्शनमपिभयजननंयेषामनिमित्तपिशुनानां॥३॥ उंजो
रंजनमेववर्णरचनाश्चित्रानकस्यप्रियानानालंकृतयश्चकस्यमनसः संतोषमातन्वते॥ काव्येकिंतुमतांचमत्कृति
कृतः सूक्तिप्रबंधाःस्फुरंतीक्ष्णाग्राझटितिश्रुतिप्रणयिनः कांताकटाक्षाइव॥ ४॥ एवंकिलपुराणेषुसर्वागम
विधायिषु॥विश्वशासनशालिन्यांश्रुतोनश्रूयतेयथा॥५॥आस्तेविद्याधरवधूविलासहसितद्युतिः॥जान्हवी
सिनं निर्झरोत्फीघः शर्वाणीजनकोगिरिः ॥६॥ निशाकरशातस्मेरत्नैर्विरतिषा॥आशाधनपतेर्येनविभात्यनिशचंद्रि धारस
का॥७॥ यःशुभ्रशिखरोभातिशिवमौलींदुदर्शनात्॥ तरंगालिंगिताभ्रश्रीःक्षीरार्णवइवोदितः॥८॥ यःप्रां
शुरश्मिनिवहैर्विदधातिमुहुर्मुहुः॥त्रिदिवोद्यानहंसानांमृणालकवलभ्रमं॥९॥ यस्याश्मकूटसंघट्टविशीर्ण
पतनोदिताः॥मुहूर्तंतारकायंतेव्योम्निगंगांबुशीकराः॥१०॥ फेनहासविलासिन्यःफुल्लकुवलयेक्षणाः॥ विभां
तिकटकेयस्यतरंगिण्योमहीभृतः॥११॥उत्तरेतस्यकैलाशनाम्निस्फटिकशेखरे॥विजहारहरोहारगौरगिरि
कृतासखः॥१२॥ नीलोत्पलद्युतिमुषायस्यकंठविषत्विषा॥ मुहुर्गौरीकपोलेंदोः क्रियतेलांछनच्छविः॥१३॥ वि
भातिभूषाभुजगैःखंडेंदुविसशंकया॥ कपालकलहंसैर्यःसंत्यक्तैरिवसेवितैः॥ १४॥ यस्यामरसरित्तुंगतरं
गालिंगितःशशी॥ धत्तेमूर्ध्निसुधासिंधुगर्भस्थितिसुखंसदा ॥१५॥ तांडवेयस्यदोर्दंडमंडलोद्धूतभस्मभिः॥
छन्नास्तुहिनशैलेनस्पर्धांबिभ्रतिभूभृतः॥१६॥ यस्यालोकघनछायंकंठंस्कंदशिखंडिनि॥ मुहुःप्रनृत्ते हाराहि
र्व्योजिह्लाक्षंव्यचेष्टत॥१७॥ कपालकुहरावर्तस्रुभ्यद्गंगांबुबिंदुभिः॥ यःशेखरशशिप्रीत्यानक्षत्रैरिवसेव्यते॥१८॥
यस्याट्टहासाःक्षुभितक्षीराब्धिधवलश्रियः॥कर्णचामरतांयांतिकैलासस्फुरदंतिनः॥१९॥ तंकदाचिद्गिरिसुता १
रहःप्रणयमंथरं॥ प्राहवक्त्रांबुजाकृष्टभ्रमराराववित्रमं ॥२०॥ देवाखिलजगत्सर्गस्थितिसंहारकारण॥यस्यैवे

दःसमुन्मेषः कस्त्वंत्वांस्तोतुमीश्वरः॥२१॥त्वन्मायामयनिर्माणजगद्वैचित्र्यसंकथां॥अनन्याकर्णितांचेतःश्रोतुमुत्कंठतेमम
॥२२॥ इतिप्रियावचःश्रुत्वाहर्षव्याकोशलोचनः॥ प्राहकुत्वाकुरंगाक्षीमंकेशीतांशुशेखरः॥२३॥ किंनवाविदितंदेविचित्रसा
गरचंद्रिके॥त्वंहिपापूषहसितेजीवितंनोबहिश्चरं॥२४॥अनंतरूपंमांद्रष्टुंपुराहस्त्विचतुर्मुखौ॥पातालेंतांमंतरिक्षंचजग्मतुः
कौतुकाकुलौ॥२५॥अनासाद्यैवपर्यंतंमहतोमहसोमम॥महादेवोयमित्युक्त्वाचक्रातेनौतपस्तनः॥२६॥मदेकभक्तिर्मद्वा
क्यादभूत्पूज्यतमोहरिः॥सतुमामीहमानोभूदपूज्यश्चप्रजापतिः॥२७॥सैवत्वंममलोलाक्षिदयितावैष्णवीतनुः॥ममधामस
हस्रांशुःशशीतवशुचिस्मिते॥२८॥स्रुश्रुदक्षस्यतनयापुराभूत्वाममप्रिया॥देहंपितुर्निकारेणत्यक्तवत्यसिभामिनि॥२९॥
सहियज्ञेसुरगणंसमानाय्यप्रजापतिः॥ दक्षोमहोत्सवंचक्रेप्रीणिताशेषबांधवः॥ ३०॥ नत्रप्रनृत्तगीर्वीणललनागीत
नादिते॥अहंकपालमालीतिपित्रानेननिमंत्रितः॥३१॥ त्वत्कोपादिष्टमार्गेणममक्रोधभुवामरवः॥ गणैनाकारिदक्षस्य
कथाशेषमहोत्सवः॥३२॥ मत्सरीवादकोपेनत्यक्त्वादक्षभवांतनुं॥स्रुतानुदिनशैलस्यजातासियशसांनिधेः॥३३॥शं
भंवौ भोःशारीरार्द्धहराभवानीयंतवात्मजा॥ इतिस्रुत्वावशैलेंद्रोनारदाज्जनकस्तव॥३४॥ ततस्त्वांयौवनारंभविभ्रमोद्यानमं
जरीं॥ सपर्यायेतपस्थस्यादिदेशाहिमवान्मम॥३५॥अत्रांतरेतारकेणवंदीकृतजयश्रियः॥शुश्रुवुस्त्रिदशास्त्राणंभा
विनंत्वयिमेसुतं॥३६॥तदर्थमथशक्रेणप्रेषितोरतिवल्लभः॥ तपोवनंसंमजुषसभार्योमधुनासह॥३७॥ ततःकुसु
महासिन्योविलोलालिकुलालकाः॥ क्वणद्विहंगवलयाहारिण्योविवभुर्लताः॥३८॥ कांताकपोलसच्छायेप्रोद्गतायाति
चंपके॥अशोकेगाढरागेचकामिनामिवचेतसि॥३९॥ नेत्रप्रभाकुवलयव्यासंगिकुसुमांजलिं॥क्षिपंतींप्रणतोदेवि
त्वामपश्यमहंपुरः॥४०॥ ततोहंनिशिताग्रस्यकर्णांतपरिसर्पिणः॥लक्ष्यतांवक्रकटाक्षस्यपातःस्मरशरस्यच॥ ४१॥
हर्षोन्मेत्वन्मुखांभोजभृंगालीत्वयिसोत्सुका॥ दृष्टिःपपातलावण्यकल्लोलाकुलिताधरं॥ ४२॥ प्रणिधायमनःपश्चाद
पश्यंकुसुमायुधं॥ मौर्वीमधुकराशावतारंकैंकारकार्मुकं॥ ४३॥ तदकारिममक्रोधाद्दथलोचनवह्निना॥अंगनापांग
वसतिर्येनापांगोभवत्स्मरः॥४४॥ मानसक्षोभपवनस्फुटेमकरकेतने॥भयकंपकृपाशोकव्याकुलेतवचेतसि॥४५
॥ दग्धोंगधकद्विधाशेषात्स्मरस्तत्रास्मिकारणं॥इतिध्यात्वातपस्त्वीव्रंतप्तवत्यसिपार्वति ॥४६॥ मयिप्रसादसुभगां

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

बृ· था· ज्ञात्वा तेन निश्चितां मतिं ॥ यातः कृतार्थतां देवि तवायं प्रणयाज्जनः ॥ ४७ ॥ गेहे ततो हिमवतस्तद्विवाहमहोत्सवे ॥ तेनारकव
धैकाग्रा ननंदुर्नंदनौकसः ॥ ४८ ॥ एवं त्वमनवद्यांगि मे मामृततरंगिणि ॥ प्राप्ता मया चिरमभूः स्मरसंजीवनौषधिः ॥
२ ४९ ॥ दिव्यमानुषसंबद्धां शृणु चित्रां कथामिमां ॥ यया मनसि वर्तेते निर्भरानंदसंपदः ॥ ५० ॥ इत्युक्त्वा विविश्वयां विद्या
धरधराभुजां ॥ कथामकथयद्देवः सप्तानां चक्रवर्तिनां ॥ ५१ ॥ अत्रांतरे समायातः पुष्पदंतो गणाग्रणीः ॥ मानीम
हेश्वरं द्रष्टुं नंदिना द्वार्यवार्यत ॥ ५२ ॥ नकदाचिन्निषिद्धोहं किमेतदिति कौतुकात् ॥ वायुभूतः प्रविश्यांतः स्वैरं शुश्राव
तां कथां ॥ ५३ ॥ जयानाम प्रतीहारी देव्याः केलिकलासखी ॥ कथां तामेव दयितापुष्पदंतादथाशृणोत् ॥ ५४ ॥ आ
श्चर्यश्रवणानंदफुल्लद्वदनपंकजा ॥ तामेवाकथयन्मुग्धा पृष्टा गिरिजया जया ॥ ५५ ॥ श्रुत्वैव कुपिता देवी बभाषे शशि
शेखरं ॥ अनन्याकर्णिता चित्रा त्वया मे कथिता कथा ॥ ५६ ॥ पश्यैतां कथयंत्येनां रहः क्रीडास्य योषितः ॥ इत्युक्त्वा कप
टस्मेरच्छन्नकोपाकुलाभवत् ॥ ५७ ॥ कोपहासत्विषा तस्याः प्रणामानतशेखरः ॥ शंकरः क्षिप्रमभवद्द्विजराजांकक
लाधरः ॥ ५८ ॥ पुष्पदंतः प्रविश्यांतर्वायुभूतः कथामिमां ॥ शुश्राव नापराधो मे प्रियामित्याह धूर्जटिः ॥ ५९ ॥ पुष्पदं
तमथाहूय भ्रुकुटीधूम्रविभ्रमं ॥ शशाप शैलतनया दधती कोपपावकं ॥ ६० ॥ मर्त्यलोके पत क्षिप्रमिति सत्या समी
रिते ॥ कारुण्यदैन्यसंत्रासविषण्णे गणमंडले ॥ ६१ ॥ नहि निर्वहणं यांति प्रभूणामाश्रिते रुषः ॥ प्रसीद देवि मिथ्या
र्थे माल्यवानित्यभाषत ॥ ६२ ॥ वयस्यशापनिर्वाणयांचाप्रणतशेखरं ॥ क्रुद्धा तमपि रुद्राणी शशाप गणशेखरं ॥
६३ ॥ काणभूतिर्यदा शापनिर्वाणं लप्स्यते तदा ॥ पुनस्तामेव च कथां कथितां काणभूतिना ॥ ६४ ॥ यक्षो धनदशापेन
विंध्याटव्यां पिशाचतां ॥ अवाप्तः श्रोष्यति त्वत्तः कथां चोरकथामिमां ॥ ६५ ॥ श्रुत्वैव माल्यवानेष शापस्यांतमवाप्स्य
ति ॥ इति तत्साचितं देवी शापस्यांतमकल्पयत् ॥ ६६ ॥ अथा   श्रुत्वौचलन्मौलिमालाव्याकुलषट्पदौ ॥ ततः शा
पाक्षरवातैस्तौ कुष्टाविव पेततुः ॥ ६७ ॥ तयोश्चिरत्रोस्यैपेन वसुधामवतीर्णयोः ॥ तद्वृत्तांतं गिरिजया पृष्टः प्राह २
त्रिलोचनः ६८ ॥ कौशांबीवासिनः शंभुपुत्रनामग्रजन्मनः ॥ प्रयातः सोमदत्तस्य पुष्पदंतो महीतले ॥ ६९ ॥ का

त्यायनः श्रुतिधरस्तथा वररुचिश्च सः ॥ गुणिनामग्रणीर्लोके नामभिस्त्रिभिरुच्यते ॥ ७० ॥ प्रतिष्ठानपुरे जातो माल्य
वान् दक्षिणापथे ॥ गुणाढ्य इति यो लोके विश्रुतो गुणगौरवात् ॥ ७१ ॥ इति गिरिशवचो निशम्य देवी किमपि बभूव कृ
पाविषण्णचित्ता ॥ पतिविरहकृशा समागमाय प्रयतधिया च जया तपश्चचार ॥ ७२ ॥ ॥ इति क्षेमेंद्रविरचि
तायां बृहत्कथायां कथापीठे कथावतारः ॥ ॥ अवतीर्य धरां शापात्पुष्पदंतो गणाग्रणीः ॥ चिरं भूत्वा महा
मात्यो योगनंदस्य भूपतेः ॥ १ ॥ मुहुर्निःसारसंसारकलनां कलयन्धिया ॥ कात्यायनाभिधो द्रष्टुं प्रययौ विंध्यवासिनीं ॥
२ ॥ तपसा दर्शनं प्राप्य देव्यास्तद्वचसा गुहं ॥ गत्वापश्यन्महाभूतं पिशाचनिचयाचितं ॥ ३ ॥ काणभूतिं नमासाद्य पूजां प्राप्य
द्विजोचितां ॥ पप्रच्छ विकटाकारमटवीवासकारणं ॥ ४ ॥ स पृष्टः प्राह यक्षोहं पापमित्रनिषेवणात् ॥ शप्तो धनाधिपतिना
घोरां प्राप्तः पिशाचतां ॥ ५ ॥ इदं निरुदकं स्थानं शुष्ककंटकिपादपं ॥ शापोपनतमत्युग्रं पापेनाधिष्ठितं मया ॥ ६ ॥ भविता शा
पमोक्षो मे पुष्पदंतसमागमात् ॥ श्मशानवासिनः शंभोः श्रुतं कथयतो मया ॥ ७ ॥ निशम्येति वचस्तस्य शनैः कात्यायनः
कथां ॥ सस्मार पुष्पदंतोहमिति संविदमास्थितः ॥ ८ ॥ काणभूतिस्ततस्तस्माच्छुश्राव आश्चर्यशालिनीं ॥ कथां विद्याधरेंद्रा
णां सप्तानां चक्रवर्तिनां ॥ ९ ॥ त्वामभ्येत्य यदा मौनी ब्राह्मणो दक्षिणापथात् ॥ गुणाढ्यः श्रोष्यति त्वत्तः कथामेतां मयोदि
तां ॥ १० ॥ तदा शापांतमासाद्य भवान्स्वर्गमिष्यति ॥ इति कात्यायनः प्राह कथांते तमुदारधीः ॥ ११ ॥ त्यक्तुकामं तमालक्ष्य
सहसा मर्त्यविग्रहं ॥ पप्रच्छ जन्मवृत्तांतं काणभूतिः कुतूहलात् ॥ १२ ॥ स तेन पृष्टो कथयत्रिजामाश्चर्यसंकथां ॥ द्रष्टुमप्यु
त्सुकः शंभुमवाप्य निजसंविदं ॥ १३ ॥ कौशांब्यामभवद्विप्रो सोमदत्तापराभिधः ॥ अग्निसोमः श्रुतैः क्षेत्रं पवित्रचरित
व्रतः ॥ १४ ॥ तस्याहं वसुदत्तायां जातः श्रुतधराभिधः ॥ कात्यायनो वररुचिश्चेत्यन्वर्थकृताह्वयः ॥ १५ ॥ बालस्य मम
कालेन याते पितरि पंचतां ॥ प्रायश्चित्तार्थिनौ पांथौ पांथौ विविशतुर्गृहं ॥ १६ ॥ व्याडीन्द्रदत्तनामानौ तौ मे मतिमतां वरौ
॥ ततो यदृच्छयायातनटनृत्यानुकारिणं ॥ १७ ॥ यथादृष्टघनातोद्यगीताभिनयकोविदं ॥ विस्मयं जग्मतुर्वीक्ष्य ज्ञान
ग्रहणधारणे ॥ १८ ॥ अतीव विस्मितौ क्षिप्रं प्रहर्षोत्फुल्ललोचनौ ॥ विज्ञाय नामधेयं मे मन्मातरमवोचतां ॥ १९ ॥ त्वा

ह्मणोवेतसपुरेवसिष्ठकुलसंभवौ॥ करंभोदेवसोमश्चश्लाघ्याचारोबभूवतुः॥२०॥ मातरस्तयोश्चस्तनयौभ्रातौविद्या
र्थिनौमहीं॥ पुरंपाटलिपुत्राख्यंकार्त्तिकेयवराहृतौ॥२१॥ विद्यावर्षद्विजेसंतिप्राप्येतिस्कंदशासनं॥ प्रहृष्टवदनौतत्र
प्रविष्टौवर्षमंदिरं॥२२॥ निवेद्यनिजवृत्तांतंवर्षोपाध्यायगेहिनी॥आवाभ्यांगुरुवृत्तांतंपृष्टाप्राहप्रियंवदा॥२३॥शंक
रस्वामिनामाभूद्ब्राह्मणोवेदपारगः॥ वर्षोपवर्षौतस्येमौतनयावतनुत्विषः॥२४॥ संभाव्यविद्यामतुलांविश्रुतोलोक
पूजितः॥ कनीयानुपवर्षोस्यममभर्तुर्महाधनः॥२५॥ ज्येष्ठश्चासाववज्ञातोमौर्ख्याद्दारिद्र्यमंदिरं॥ ततः कदाचि
द्विभवोन्मत्तासरलचेतसे॥२६॥ उपवर्षस्यदयितास्वयंवर्षायनिस्त्रपा॥भक्ष्यंजघनमुद्रांकंपिष्टाद्दत्तेननिर्मितं
॥२७॥ ददौप्रहृष्टस्तत्प्राप्यसचमह्यंन्यवेदयत्॥ स्नानप्रयासचकितारजसोविनिवृत्तये॥२८॥ कुर्वंतिशीलका
लेषुस्त्रियस्तद्विगतत्रपाः॥ तद्दिलोक्यास्मिनिर्विण्णास्यत्काश्रूत्सभूतले॥२९॥ हाहतामूर्खभार्याहमित्यशोच
मधोमुखी॥ विमृष्यलज्जितःक्षिप्रंगत्वाचक्रेततस्तपः॥३०॥ वर्षायेनास्यभगवानभवद्वरदोगुहः॥ देयंश्रुत
धरायेदंज्ञानमित्याप्तशासनः॥३१॥ सर्वज्ञतामवाप्यासौपुनःप्राप्तःस्वमंदिरं॥ इत्युपाध्यायिनीवाक्यंश्रुत्वावांप्र
यातौगुरोः॥३२॥ आज्ञांश्रुतधराह्वानेप्राप्यभ्रांतौमहीतलं॥ कालेनत्वद्गृहेमानदृष्टोसौतनयस्तव॥३३॥ यथा
र्थनामामतिमानयंश्रुतधरःशिशुः॥आवांवररुचिश्चायंतद्दत्तोवर्षमंदिरं॥३४॥ विद्यार्थिनस्त्वास्मिंतोगच्छामःशं
सनःशिवं॥ ताभ्यामभ्यर्थितामातकथंचिदथमांशिशुं॥३५॥आदिदेशाश्रुवदनाप्रत्यग्रविहितव्रतं॥हृष्टस्तद
नुगंप्राप्यवर्षवेश्मतावेरहं॥३६॥ तस्मात्प्राप्याखिलान्वेदान्विद्यानामाश्रयोभवं॥ ततःकदाचिदेकांतेभुक्त्वोत्तर
मवस्थितः॥३७॥पृष्टःपाटलिपुत्रीयामुत्पत्तिंप्राहमेगुरुः॥अनावृष्टिहतेकालेभ्रातरोब्राह्मणास्त्रयः॥३८॥
भार्यास्तिस्त्रःपरित्यज्यपुराजग्मुर्दिगंतरं॥अजीजनत्स्वतंकालेतासामेकैवगर्भिणी॥३९॥ हेमलाभःसदात
स्यमूर्ध्निगौरीपतेर्वरात्॥ हेम्नाप्रत्यहलब्धेनसहस्रेणसबालकः॥४०॥ कालेनपुत्रकाभिख्यःप्राप्यराज्यंजन
प्रियः॥ तस्मिन्हरार्चनरतेदातर्यक्तिमागते॥४१॥ भ्रांत्वादिगंतानाजग्मुर्भिक्षार्थंतेद्विजास्त्रयः॥विज्ञायजनीवा ३

क्यात्पुत्रकस्तान्महीपतिः॥४२॥पितरंचपितृव्यौचतदाहृष्टोभ्यपूजयत्॥सत्कृत्वाविवितास्तेशानैकैःसंभोगादसतांययुः॥
४३॥ कंवानाभिनवालक्ष्मीर्वारुणीचविमोहयेत्॥तेषांबुद्धिरभूद्रूढमस्मिन्पुत्रेनिपातिते॥४४॥ स्वयंराज्यमवष्टभ्य
स्थास्यामइतिनिश्चितं॥ तेविंध्यवासिनीपूजामपिदिश्यात्मजंनृपं॥४५॥निन्युर्गर्भेहंसमादायतद्वधायमहाभटान्॥त
द्विज्ञायगुरूणांसप्रतीकारपराङ्मुखः॥४६॥ विंध्याटवींविवेशैकस्त्यक्तराज्योथपुत्रकः॥ पुत्रकेत्यक्तराज्येथयातेतेषां
द्विजन्मनां॥४७॥ राज्यंहृतंकातराणांशत्रुभिर्बलवत्तरैः॥पुत्रकोप्यटवींप्राप्यनिर्जनांधैर्यसागरः॥४८॥अमर्त्यो
चितसंचारमवापगिरिकंदरं॥भ्रात्रोरसुरयोःपैत्रधनेविवदमानयोः॥४९॥ धावतोरधिकोवेगेयःसत्वामीधनेपि
तुः॥इतितद्वचसावेगगमनेद्रुतपाजयोः॥५०॥ उपानहौचयष्टिंचप्रापपात्रंचतत्रसः॥ यष्टिंसमस्तनिर्माणेनभोगत्या
मुपानहो॥५१॥ सेव्यमानस्तयाप्रह्वंसततंकांचनप्रदः॥ महेंद्रवर्मणोराज्ञस्तनयांनूपशालिनीं॥५२॥ विश्रुतांतत्रशु
श्रावपाटलांपाटलाधरां॥ उपानहौसमादायरात्रावुत्सत्यखेचरः॥आकाशमंदिरगतांतत्प्रविश्यददर्शसः॥ शयानां
शयनेस्वच्छेनिजकांत्युत्तरच्छदे॥ नभोगतिःसनांस्रस्तामैंदवीमिवदेवतां॥ लावण्यसलिलस्मेरस्मरकल्लोलिनीमिव॥
खचरैरिवविन्यस्तांमानसाकर्षणौषधिं॥ यौवनोद्यानसंरूढांविलासलतिकामिव॥ तांविलोक्यस्फुरद्रत्नकपिला
लोकमंदिरे॥ सहसाबोधयाम्येनांसखस्तामहंकथं॥ चित्रन्यस्तइवक्षिप्रमितिध्यानपरोभवत्॥ चिंतादोलायिते
जस्मिन्बहिःकश्चित्प्रसंगतः॥५८॥ यामिकोयामिकंप्राहस्वैरंनिजकथांतरे॥ निद्रामुद्रितलोललोचनरुचिभ्राजिष्णु
कर्णोत्पलामर्द्धोद्वृत्तनिषेधहुंकृतिपदांजृंभाभिरामांमुहुः॥ यःप्राप्येंदुमुखींस्वयंनसहसाकंठेसमालंबनेसप्रायः
समयायदग्धविधिनासृष्टःशिलापुत्रकः॥ इत्याकर्ण्यतदातस्यवचनंप्राहविस्मितः॥मामेवोद्दिश्यसाभूत्कमहोकेनापि
धीमता॥ इत्युक्त्वापाटलांकंठेजग्राहमदनाकुलः॥नवोत्कंपिकुचन्यस्तहस्तस्वस्तिककंचुकां॥ सातेनत्रासविचलल्लोच
नव्याकुलोत्पला॥ क्रांताननानलिनांभोजागजेनेवसरोजिनी॥ श्यामेवविस्फुरच्छिन्नहारमौक्तिकतारका॥स्मरस्मयभ
यभ्रांतिभाजनंसहसाभवत्॥ एवंप्रतिनिशंश्यामासंगतानंगभंगिना॥ तेनकांतवसंतेनस्वैरंसापुष्पिताभवत्॥का

बृ· क· लेनसपरिज्ञातोराज्ञाप्रछन्नकामुकः॥आदायपाटलंव्योम्नाप्रययौजान्हवीतटं॥सुखोषितस्तयातत्रसेव्यमानोथपु
त्रकः॥चकारनगरंयष्टिलेखाभिर्हैममंदिरं॥पाटलावचसाराज्ञापुत्रकेनविनिर्मितं॥पुरंपाटलिपुत्राख्यमिदंवि
४ द्यानिवेशनं॥ पाटलिपुत्रकथा॥ इतिश्रुत्वागुरोर्विद्याःप्राप्यसर्वाःसुखोषितः॥अवापमुपकोशाख्यामुप
वर्षगुरोःसुतां॥उपकोशामवाप्याहंनीलनीरजलोचनां॥स्मरसाम्राज्यमभवंभाजनंसुखसंपदां॥व्याडींद्रदत्तसहितेसर्वज्ञेमयिवि
श्रुते॥पाणिनिर्नामवर्षस्यशिष्यःपूर्वंजडाशयः॥तपसात्र्यंकरात्प्राप्यनवंव्याकरणंवशी॥दिनान्यष्टौविवादेमेप्रतिवादीसमोभवत्
॥मयाजितेततस्तस्मिन्हुंकारेणविमोहयन्॥जहारनोहरःकोपादैंद्रव्याकरणस्मृतिं॥सहसाविस्मृतेतस्मिन्तपसेकृतनिश्चयः॥द्र
ष्टुंस्मरहरंभर्गंवरदंपार्वतीपतिं॥हिरण्यगुप्तनाम्नोथवणिजःप्रतिवेश्मनः॥हस्तेगृहव्ययधनंविनिक्षिप्यगतेमयि॥उपकोशाविरहि
णीनवयौवनशालिनी॥श्रुतशाप्रोषितायोग्यंव्रतंचक्रेपतिव्रता॥यातिकालेकदाचित्तांहारिणींहंसगामिनीं॥ननुस्वच्छांबरस्मेरस्फा
रफेनविलासिनीं॥विस्तीर्णश्रोणिपुलिनांश्यामांनेत्रनचोत्पलां॥सततस्नायिनींगंगांव्रजंतींयमुनामिव॥युवालक्ष्मीमदोन्मत्तःक्ष्मापते
र्दंडवासिकः॥पुरोहितश्चमंत्रीचददृशुःस्मरमंजरीं॥तांवीक्ष्यमन्मथावेशाक्लिष्टेष्वथपृथक्पृथक्॥तेषुमंत्रिसुतःप्राहप्रथमंभजमा
मिति॥स्नानात्प्रतिनिवृत्तासावीक्ष्यसंध्यामुपस्थितां॥भीतातमभ्यधाद्स्तुतृतीयेन्हिनिशागमे॥समागमस्त्वयिमयावंचयित्वेतितंय
यौ॥तस्मात्प्रतिनिवृत्ताथपुरोहितमुवाचसा॥द्वितीययामेयामिन्यास्तृतीयेन्हिवशास्मिते॥उक्तेतितस्मादुत्तीर्णादंडवासिकमभ्य
धात्॥तृतीयेन्हितृतीयांशेशर्वर्यांवशगास्मिते॥इतिसंविदमादायमुक्तानेनाविशद्गृहं॥कीर्णोत्पलाइववदिशोविधायचकितेक्षितैः॥
प्रस्तुतापन्हवोपायांनिजभर्तृधनार्थिनीं॥हिरण्यगुप्तोपिगृहेनामयाचतसंगमं॥तृतीयेन्हिनिशाशेषेस्वाधीनातेस्मिकांक्षितः
॥इत्युक्त्वातंपरिजनेकथामेतांन्यवेदयत्॥ततःप्राप्तेतृतीयेन्हितस्यांमंत्रिवरोगृहं॥विनष्टदीपंसांकंपोविवेशाविवशोनिशि॥उपको
शातमवदन्नास्नातेत्वयिमेरतिः॥इतितस्यागिरास्नातुंविवेशांधगृहोदरं॥तत्रोद्वर्तनमादायमसृणंतैलकज्जलं॥लिलिपुश्चेटि
कास्तस्यचिरंगात्राणिकामिनः॥अथान्यस्मिन्निशायामेतूर्यप्राप्तेपुरोहिते॥मंजूषरूपंसंदृश्यचितंदारुकोष्ठकं॥प्रविश्यप्रक्षिप्रा ४
क्षिप्रमसौयातोगृहाधिपः॥इत्युक्त्वाकोष्ठकेन्येष्मुपकोशान्यवेशयत्॥दत्त्वालोहार्गलंतस्मिन्पुरोहितमुवाचसा॥नास्नातोर्हसि

मांस्प्रष्टुमितिसोपितथाकृतः॥तस्मिंस्तैलमषीलिप्तेतृतीयोपिसमाययौ॥सत्यंस्मरविदग्धेनमूर्खःकोनविडंबितः॥पुरोहितेपिवि
न्यस्तेतत्रैवभयविह्वले॥सोपिक्रमेणतेनैवपिशाचसदृशःकृतः॥हिरण्यगुप्तेसंप्राप्तेरात्रिशेषेवणिग्वरे॥दारुभांडेतथैवासौनिहितो
दंडवासिकः॥अथोपकोशावणिजंसूपविष्टंवरासने॥कोष्ठकाभिमुखीप्राहनिक्षेपोदीयतामिति॥हिरण्यगुप्तस्तामाहभजमां
चारुहासिनि॥तवभर्त्राविनिक्षिप्तंविद्यतेस्वभुमेधनं॥साश्रुत्वेत्यवस्तारंशृण्वंतुगृहदेवताः॥भूतानिसाक्षिणःसंतुविद्यते-
स्मिन्धनंमम॥इत्युक्त्वास्नानकूटेनकृत्वातमपिकज्जलैः॥दुःप्रेक्ष्यमब्रवीत्स्त्रीयाकृपागच्छेतिसत्वरं॥वणिक्प्रातर्जेन
भयात्प्रययौसंवृताननः॥लुंप्यमानांबरोमार्गेकृतकोलाहलोजनैः॥इतिरक्षितचारित्रागतेतस्मिन्मनस्विनी॥प्रातर्नंदस्य
नृपतेःसर्वास्थानसभांययौ॥उपवर्षस्यदुहिताभार्यावररुचेःसती॥प्राप्तेत्यावेदितातत्रमानिताभूभुजावदत्॥निक्षुतंव
णिजाराजन्ममभर्तृधनंबहु॥न्यासंहिरण्यगुप्तेनप्रमाणमधुनानृप॥ततस्तस्मिन्समाहूतेप्राप्तेवितथवादिनि॥उपको
शावदद्देवसाक्षिणःसंतिमेगृहे॥आनीयतांममगृहाद्देवताःकोष्ठकस्थिताः॥तावक्ष्यंतियथातत्वमित्युक्त्वाविररामसा॥
नृपाज्ञयासमानीतेमंजूषाकोष्ठकेनरैः॥विन्यस्तेचसभामध्येपुनराहपतिव्रता॥भोभोःसत्यतपूजार्हासत्यंमेब्रूतदेवताः॥
क्षिप्रंदहामिमंजूषांसाक्ष्येचेन्मौनमाहितं॥श्रुत्वेतिभीतास्तेप्राहुःसत्यमस्त्येवतेधनं॥हस्तेहिरण्यगुप्तस्यसाक्षिणोत्र
त्रयोवयं॥इत्याकर्ण्याद्भुतंसर्वेविस्मितास्तेसभासदः॥ददृशुस्तान्समुद्घाट्यमसीलिप्तान्दिगंबरान्॥ततोविदितवृत्तां
तस्तान्निगृह्यमहीपतिः॥धनेनधर्मभगिनीमुपकोशामपूजयत्॥अत्रांतरेवराच्छंभोःस्मृतव्याकरणोप्यहं॥श्रुत्वानिज
गृहोदंतंप्रहृष्टोगुरुमभ्यगां॥ ॥उपकोशाख्यायिका॥ ॥प्रतिश्रुत्यगुरोस्तत्रहेमकोटिमहंस्वयं॥व्याडींद्रदत्तस
हितःप्रयातोनंदभूपतिं॥एकोनंजातरूपस्ययस्यकोटिशतंगृहे॥तस्याथनंदनृपतेरेककोट्यर्थिनःशनैः॥प्रविष्टानगरं
दृष्ट्वायस्मिन्नेवदिनेवयं॥तस्मिन्नेवदिनेदेवात्सभूपालोव्यपद्यत॥अकालाशनिसंकाशंतच्छ्रुत्वादुःखितावयं॥दिनैक
जीवनेराज्ञोलोभाद्यत्नंसमास्थिताः॥अथेंद्रदत्तःसंमंत्र्यसंत्यज्यनिजमंदिरं॥विवेशराज्ञोयोगेनशरीरमनिलोपमः॥
तस्मिन्प्रविष्टेसहसासमुत्तस्थौसभूपतिः॥व्याडिंनिधायरक्षार्थमिंद्रदत्तकलेवरे॥अभ्येत्ययाचितोराजासमयागु

बृ· क·
५

रुदक्षिणां॥ इंद्रदत्तसमाविष्टः सुप्तोत्थित इवाथ सः॥ मंत्रिणं स शकटालाख्यं दीयतामित्यभाषत॥ केनाप्याविष्टदे
हो यमिति निश्चित्य बुद्धिमान्॥ अशाहयन्मंत्रिवरः सोन्विष्य नृपतेर्विग्रहान्॥ ततो नंदशरीरस्थो दग्धदेहो निदुःखि
तः॥ इंद्रदत्तो रहः प्राह मां व्याडिं चाश्रुगद्गदः॥ द्विभो भूत्वा कथं लोभादस्मिन् शूद्रकलेवरे॥ स्थास्यामि शकटालेन
निर्दग्धं निजविग्रहः॥ इति दुःखाकुलं व्याडिरहं च नृपतिं शनैः॥ वीतशोकं समाधाय तद्राज्ये मंत्रितां श्रितौ॥ गूढं निब
द्धमूलोपि विनाशभयशंकितः॥ स ततं नृपतिर्वैरं शकटाले व्यचिंतयत्॥ योगानंदोथ कालेन मंत्रयित्वा चिरं मया॥ ब
द्धांधकूपे विक्षेप शकटालं सुतैः सह॥ बद्धः पुत्रशतं प्राह प्राप्यैक पुरुषाशनं॥ सोभातु यः प्रतीकारे शक्तो भूमियतेरि
ति॥ अशक्ता वयमित्युक्ते तैः स नक्तुक्तवांस्तदा॥ उपवासकृशांगाश्च ते तत्र निधनं ययुः॥ योगनंदोपि संप्राप्य विभूतिं
रतिमाययौ॥ कुंभेषु च करींद्राणां कुचेषु च मृगीदृशां॥ गुरवे दक्षिणां दत्वा विमुखो भवसंततेः॥ व्याडिर्विरक्तहृदयः समा
मंत्र्य नृपं ययौ॥ इति नंदस्य सा बिंब्यं प्राप्तस्य मम जान्हवी॥ भक्त्या बभूव वरदा सदा हेमशतप्रदा॥ ततः कालेन करुणाक्रं
णितेन मया नृपं॥ संबोध्य शकटालोपि ततः कूपाद्विमोचितः॥ पुनर्मंत्रिपदं प्राप्य मदेकस्मारणः सदा॥ प्रदध्यौ मनसा वैरं
शकटालो महीपतेः॥ कदाचिदथ गंगायां करं पंच निजांगुली॥ दर्शयं तं नृपो दृष्ट्वा मामपृच्छत्स कौतुकः॥ अदर्शनं करं
नीत्वा समं दर्श्यांगुलिद्वयं॥ द्वावप्यभेद्यौ तिष्ठं तु पंचेति स हमपाभ्यधां॥ इति मद्बुद्धिविभवं दृष्ट्वा विस्मयमाययुः॥ राजा च
शकटालश्च ये चान्ये तत्र संगताः॥ एवं नंदशरीरस्थः सभोगासक्तमानसः॥ इंद्रदत्तो विसस्मार ब्राह्मण्यं क्षीर्यमाश्रितः॥
तस्य लक्ष्मीमदांधस्य संभोगासक्तचेतसः॥ ईर्ष्यालोर्दृश्यु नैवमरुतोपि वधूजनं॥ स कदाचित्स्त्रियां तुंगबलभीशिखर
स्थितः॥ तिथिप्रश्ने द्विजन्मानं भाषमाणां च शोकितां॥ विलोक्य क्रोधविधुरो भ्रुकुटीकुटिलाननः॥ ब्राह्मणस्य वधोक्षि
प्तं दंडवासिकमभ्यधात्॥ स तीव्रशासनेनाशु राज्ञादिष्टः पुराद्बहिः॥ निनाय निग्रहस्थानं ब्राह्मणं संभ्रमाकुलं॥ कृष्यमाणं
महाकार्ये द्विजमालोक्य वर्त्मनि॥ जहास विक्रयन्यस्तो मत्स्यो विगतजीवितः॥ तं दृष्ट्वा महदाश्चर्यं निवृत्तो दंडवासिकः॥ ५
व्यजिज्ञपन्महीपालं राज्ञा पृष्ठाव यं च तत्॥ शकटालप्रभृतिषु क्ष्मापतेः क्षणमंतिके॥ विस्मयध्यानमूकेषु ध्यात्वा पृष्टो

हमभ्यधां॥ निवार्यतां मद्वचसा ब्राह्मणो वधसाहसात्॥ प्रवक्ष्याम्यद्भुतं पार्थ मत्स्यहासस्य कारणं॥ इत्युक्त्वाहं त्रिपथगां गत्वा
निशि निशातधीः॥ अपृच्छं मत्स्यहासस्य हेतुं पृष्टाब्रवीच्च सा॥ योयं शिखरिसंकाशः शाखावलयसंकुलः॥ करालस्तालविटपी
छन्नोत्रश्रोष्यसि स्थितः॥ इत्यहं तद्गिरा गूढं स्थितस्तालधरोधरः॥ अर्धरात्रे महाकायामपश्यं रजनीचरीं॥ कृतां तु यात्रां विकटा
कार राक्षसपुत्रकैः॥ दीप्तार्धकेशानयनां कालरात्रिमिवापरां॥ ततो मातुः प्रणयिनां निबिडाडंभरक्षसां॥ भोजनं देहि देहीति
तेषामशृणवं गिरः॥ प्रातर्विशासिता पुत्राः सा विप्रो राजशासनात्॥ दिनमेकं परित्रातो मंत्रिणा मत्स्यहास्यतः॥ तस्यैव मांसैः षण्मा
सां तृप्तिं यास्यत पुत्रकाः॥ मातुः श्रुत्वेति पप्रच्छुस्ते मत्स्यस्मितकारणं॥ साब्रवीदीर्ष्यया राजा मूर्खो द्विजवधे विभुः॥ अंतःपु
रेषु स्त्रीरूपान्न वेत्ति पुरुषान् स्थितान्॥ एतन्मत्स्येन हसितं श्रुत्वैतद्राक्षसीवचः॥ प्रातर्विदितवृत्तांतो नरेंद्रमवदं रहः॥ अंतःपुरे
षु स्त्रीरूपा स्थितास्ते माद्विजे क्रुधः॥ अजानत्वमश्चर्वो देव देवीनां दयिता नराः॥ मत्स्यस्य हसने हेतुरयमेव नरेश्वर॥ श्रुत्वेति ता
न्नरान् राजा निजग्राह प्रियाश्रितान्॥ ॥ इति योगनंदे मत्स्यहासः॥ ॥ अथ कालेन भूपाले सर्वस्थानसमाहिते॥ प्र
तिज्ञां चित्रवैचित्र्ये कृत्वा चित्रकरो विशत्॥ स चिंतयित्वा चित्रज्ञो राजानं दयितासखं॥ लिलेख लेखाकुशलः प्रतिबिंबमि
वांबुनि॥ ततः कदाचित्तं राज्ञः प्रतिमापदमद्भुतं॥ अपश्यमहमेकाग्रोनूतनांतःपुरे स्थितं॥ तत्र सर्वगुणोपेतां दृष्ट्वा नरप
ते स्तनुं॥ विद्युद्योताभिधां देवीं विलोक्य स्फुटलक्षणां॥ मानोन्मानप्रमाणज्ञश्चित्रवैचित्र्यसिद्धये॥ ध्यात्वाहं तिलकं त
स्या गुह्यदेशोन्यवेशयं॥ ततः संपूर्णलावण्यां कदाचिदवलोक्य तां॥ चित्रस्थां महिषीं राजा चुकोपेर्ष्याविनष्टधीः॥ जघने
लक्षणं देव्याः केनेदमुपपादितं॥ नादृष्ट्वा विहितं मन्ये प्राहेत्यं तः पुराश्रयात्॥ देवकात्यायनेनेदं न्यस्तं मंत्रिवरेण ते॥ इ
ति वर्षधरान् श्रुत्वा शकटालमुवाच सः॥ पापो वररुचिः क्षिप्रं हन्यतामिति तद्वचः॥ प्रतिगृह्यैव मामेत्य शकटालो गृहे वदत्॥
राज्ञा तव वधोदिष्टश्चित्रे तिलककारिणः॥ कर्तानत्वस्मि तद्वाक्यं त्वं हि देवो न मानुषः॥ अयत्नेन समर्थस्त्वं निहंतुमपकारिणं॥
इति शात्वाभयाभीत्या रक्षितोसि नगौरवात्॥ दुर्वीत्याभिहतो राजा ध्रुवमेव विनंक्ष्यति॥ नोरिवाकर्णधाराश्रीर्मंत्रिहीना हि सी
दति॥ असमीक्षितकारित्याच्छोच्यो नंदस्त्वया विना॥ आदित्यवर्मनो राज्ञः किं कथा न श्रुता त्वया॥ इत्युक्त्वा शकटामालोंध्य त्वा

बृ· क· गूढंस्वमंदिरे॥ हतोमयेतिराजानंचोरं हत्वाव्यजिज्ञपत्॥ निगृहीतंतुमांराज्ञाज्ञात्वापुरनिवासिनः॥ शुश्रुवुर्दुःखसंतप्ताबंधु
६ हीनाइवानिशं॥ प्रच्छन्नचारीसोहार्दात्ततोहमवदंनिशि॥ शाकटालेसखेधार्ष्ट्यात्त्वबुध्यारक्षितस्त्वया॥ अस्तिमेराक्षसोमित्रं
सहंतिममहिंसकान्॥ भवतारक्षितोह्यात्मावर्तमानेनमिद्धते॥ इत्युक्त्वाशास्तनयनंध्यानमात्राद्दुपस्थितम्॥ करालाकारविस्फा
रंराक्षसंतमदर्शयत्॥ ततस्तद्दर्शनाद्धीतः शाकटालोभ्यभाषत॥ कथांतरेमयापृष्टकथामादित्यवर्मणः॥ आदित्यवर्मणोरा
ज्ञः पुरास्वैरवतीप्रिया॥ अप्राप्तसंगमाभर्त्रा गर्भमादत्तनिस्त्रया॥ ततोविनष्टचारित्रांज्ञात्वांतः पुररक्षिणां॥ वचसाशिव
धर्माख्यंमहामात्यमशंकत॥ तंवयस्यस्यनगरंनृपतेर्भोगवर्मणः॥ गूढलेखोदितवधंबद्धमूलंविसृष्टवान्॥ भोगव
र्माणमासाद्यशिवधर्माप्यशंकितः॥ गूढलेखाहितंराज्ञाविवेदवधमात्मनः॥ सोब्रवीद्भोगवर्माणंतूर्णंछिंधिशिरोमम॥
नचेत्प्रभुहितोद्युक्तः स्वयंछेत्स्याभिमस्तकं॥ श्रुत्वेतिविस्मितेनाशुपृष्टोराज्ञाब्रवीत्पुनः॥ यत्रामियत्रनिहतस्तत्रावृष्टिभ
यंभवेत्॥ इत्याकर्ण्यभयाद्राजाविचिंत्यसहमंत्रिभिः॥ सुरक्षितंप्रयत्नेनस्वपुरेविससर्जतं॥ अत्रांतरेवभूरूपंस्थित
मंतः पुरेनरं॥ आदित्यवर्माविज्ञायपश्चात्तापंसमाययौ॥ ॥आदित्यवर्मकथा॥ ॥ इत्येवंकर्णचपलामदांधारा
जकुंजराः॥ विश्वंखलाविनश्यंतिपतिताःस्मयशासने॥ कंचित्कालेभवानास्तांप्रच्छन्नोमद्गृहेसुखं॥ विशुद्धंभवतोभावंनृपो
ज्ञास्यतिसानुगः॥ कथंतेराक्षसोमित्रमभवत्कौतुकंमम॥ इत्यहंशाकटालेनपृष्टोविश्रब्धमभ्यधां॥ नंदस्यराज्ञोनगरेप्रत्यहंदंडवा
सिके॥ भक्षितेरक्षसापूर्वंवृतोहंतत्पदेक्रमात्॥ दंडाधिपत्यमासाद्यराज्ञाहंस्वयमर्पितः॥ रक्षसाकालरूपेणतेनैवनिशिसंगतः॥
समामुवाचाचकितंवंनगायोग्रविग्रहः॥ रूपेणाभ्यधिकानारीकास्त्यंकथ्यतामिति॥ यायस्याभिमतालोकेसातस्याधिकरू
पिणी॥ सनिशम्येतिमद्वाक्यंतुष्टोमेमित्रतागमात्॥ इत्युक्त्वाशाकटालस्यवचसाप्रयताशयः॥ प्रध्यातमात्रांसहसासाक्षाद्गंगा
मदर्शयं॥ साधूर्जटिजटाजूटमालिकाजननीवमां॥ समाश्वास्ययथौतूर्णंहारवल्लीनभःश्रियः॥ कदाचिदथनंदस्यहरिगुप्ता
भिधःसुतः॥ वनंतुरंगमारूढोविवेशमृगयारसात्॥ तस्मिंस्तमालगहनेगजगंडालिमंडले॥ मूर्छितेवनिरालोकातस्यरात्रि
रवर्तत॥ ततोवनचरभयादारुह्यतरुमास्थिते॥ राजपुत्रेसमभ्यायादृक्षः सिंहभयाद्द्रुतः॥ तमेवतरुमारुह्यतमुवाचवने ६

चरः॥ नभेतव्यंत्वयाभ्रातर्वस्यामोरजनीमिह॥ करालकेसरसटस्पष्टदंष्ट्रांशुसंचयेः॥ विपादयन्निवतमः शार्दूलोयमधःस्थितः
॥ निद्रांभजस्वराज्यर्द्धं रक्षमाणः सखेमया॥ त्वयिप्रबुद्धेराज्यर्द्धं महंस्वप्स्यामिनिर्भयः॥ इतितद्वचसातत्रसुप्तेराजसुतेहरिः॥
ऋक्षमाहप्रसुप्तोयंनरोमेत्यज्यतामिति॥ सोवदध्वंतनिः सत्वोहरिणाधिपतेभवान्॥ नहिमित्रद्रुहः पापंशाम्येज्जन्मशतैरपि॥
इत्युक्त्वासोपिसुप्तायप्रतिबुद्धेनृपात्मजे॥ राजन्यमाहसिंहोथत्यजैनंत्वंसुहृन्मम॥ इतिसिंहवचः श्रुत्वासुप्तंमित्रमशंकितं॥ उ
त्संगन्यस्तमूर्द्धानंराजसूनुरपातयत्॥ सहसापातितस्तेननखैर्विष्टभ्यपादपं॥ उत्तीर्णोबलवान्दैवात्दुःखाहिखलसंगतिः॥
शशापकुतोभ्येत्यनमृक्षोविगतत्रयं॥ योज्ञास्यतिकथामेनांसतेत्राणमितिब्रुवन्॥ उन्मत्तोथसच्छायात्भूत्वाप्रातर्निजांपुरीं॥
प्राविशयविगतच्छायःशोकदस्मापतेरभूत्॥ पुत्रमुन्मादविधुरंयोगनंदोविलोक्यतं॥ सस्मारमांवियत्प्राप्तः शाकटालस्ततोवद
त्॥ देवजीवत्यसौमंत्रीहितः कात्यायनस्तव॥ श्रुत्वेतिनृपतिः पुत्रंप्राहिणोत्संमदंतिकं॥ ऋक्षसिंहकथाभिज्ञोमोचयित्वानृपा
त्मजं॥ ततोहमगमंद्रष्टुंयोगनंदंक्रियातंतं॥ कथंज्ञातस्त्वयाशापः पृष्टोहमितिभूभुजा॥ यथातेतिलकंबध्वाबुद्धंवेत्यभ्यधामहं
॥ ॥ योगानंदपुत्रशापमोक्षो॥ ॥अथराजानमामंत्र्यराजकार्यविरक्तधीः॥ प्राप्तोस्मिपाटलपुरीमशेषंगृहचेष्टितं॥
योगनंदेननिहतेदिक्षुव्यक्तिंगतेत्वयि॥ मातातेस्वर्ययोशोकादुपकोशाग्निमाविशत्॥ उपवर्गेणकथितंश्रुत्वेत्यशनिदारु
णं॥ अगमंतपसाद्रष्टुंनिःसंगोविंध्यवासिनीं॥ वियोगदावदग्धानांतृष्णासंतप्तचेतसां॥ सुखायसर्वसन्यासः संतोषामृत
निर्झरः॥ ततस्तपोवनस्थोहंयोगनंदपुरोहितं॥ वार्तांयदृच्छयायातमपृच्छंकौतुकाकुलः॥ सप्रोवाचमयापृष्टः स्त्वयियाते
सभूपतिः॥ प्रज्ञयाशाकटालेनसपुत्रोविनिपातितः॥ चरणाघातकोपेनमूलेद्धतकुशांपथि॥ सदृष्ट्वाकोपनंविप्रंमत्वा
श्राद्धेमहीपतेः॥ न्यवेशायन्मुक्तशिखंचाणक्यंणनामदुःसहं॥ उपविष्टमधःपंक्त्यांशाकटालस्तमब्रवीत्॥ राज्ञावमानितो
सीतिसचजज्वालतद्गिरा॥ चाणक्यनाम्नातेनाथशाकटालगृहेरहः॥ कृत्यांविधायसप्ताहात्सपुत्रोनिहतोनृपः॥ योगनं
दयशःशेषेपूर्वनंदसुतस्ततः॥ चंद्रगुप्तोधृतोराज्येचाणक्येनमहौजसा॥ एवमेतज्वलद्वैरः शाकटालोमहीपतिं॥ निपा
त्यसानुगंबुध्यातपसेप्रययौवनं॥ श्रुत्वेतिकलिकल्लोलसंसारार्णवविभ्रमं॥ रुद्राणीमगमंद्रष्टुंजरामरणवारिणीं॥ ततो

देवीप्रसादेन दृष्टस्त्वं शापमुक्तये ॥ स्वस्तिते ऽस्तु तनुं त्यक्त्वा प्रयास्यामि निजं पदं ॥ संगतस्त्वं गुणाढ्येन न चिरात्प्राप्स्यसि प्रियं
॥ उक्त्वेत्यामंत्र्य संहृष्टः काणभूतिं ययौ वनं ॥ महर्षिभिर्मोक्षकथाः कृत्वा दृष्ट्वाथ पार्वतीं ॥ सर्वत्र ज्ञाननिर्धूतविकारः स्वप
दं ययौ ॥ इति वररुचिरुग्रशापमुक्तो घनपटलादिव निर्गतः शशांकः ॥ अविकलनिजबोधदुग्धसिंधुः शिवपदमेत्य बभू
व निस्तरंगः ॥ ॥ इति क्षेमेंद्रविरचितायां बृहत्कथायां वररुचिमुक्तिर्नाम ॥ ॥ माल्यवान्पार्वतीशापादवतीर्य मही
तलं ॥ अमात्यः सुचिरं भूत्वा शातवाहनभूपतेः ॥ गुरुर्गुणवतां लोके गुणाढ्य इति विश्रुतः ॥ काणभूतिं समासाद्य शाप
बंधाद्विमुच्यत ॥ जातिस्मरः स पृष्टोऽथ कथां तेन काणभूतिना ॥ उवाच निजवृत्तांतं कथां श्रुत्वाभवोदितो ॥ अभूतां दाक्षिणा
त्यस्य द्विजातेः सोमशर्मणः ॥ वत्सगुल्माभिधौ पुत्रौ श्रुतार्था कन्यका तथा ॥ याते सभार्ये कालेन त्रिदिवं सोमशर्मणि ॥
श्रुतार्था यौवनवती भ्रात्रोश्चिंतावहाभवत् ॥ कदाचिदथ कन्यैव गर्भिणी दुःखदा तयोः ॥ बभूव सा पांडुमुखी गर्भजं
भास्वलद्गतिः ॥ परस्परं शंकितयोर्भ्रात्रोः सा प्राह लज्जिता ॥ स्वयं वृताहं नागेन ततो मे गर्भसंभवः ॥ इत्युक्त्वाध्यानमा
स्थाय ताभ्यां नागमदर्शयत् ॥ सोऽब्रवीद्वासुकिर्भ्रातुः पुत्रोहं दयिता च मे ॥ शापाद्विद्याधरवधूः कन्येयं युवयोः स्वसा ॥
गुणावतारः पुत्रोऽस्या भविष्यति गुणाधिकः ॥ उक्त्वेत्यदर्शनं याते भुजंगे मामसूत सा ॥ मज्जन्मावधिशापौघ वत्सगुल्मौ
निर्जंनतः ॥ प्राप्तो विद्याधरपदं कालेन जननी च मे ॥ ततो निखिलविद्यानामाश्रयो वेदपारगः ॥ शातवाहनभूपालं द्रष्टुं यातो
स्मि तत्पुरं ॥ तत्राशृणवमाश्चर्यं फल्गुविद्याश्रयः पथि ॥ कथापण्यगृहद्यूतगीतनाट्यादिजीविनां ॥ कश्चिदाह घनालो
द्यतनवाद्येऽस्मि कोविदः ॥ कश्चिदाह प्रगल्भोहमेक एव धनार्जने ॥ उवाच कश्चिद्विक्रीय शुनासं मूषकं पुरा ॥ चणकैर्हेमको
टीनां प्रभुर्यास्मि भूरिदः ॥ कश्चित्प्रोवाच विक्रीय धनिनो मुग्धकामुकान् ॥ वेश्यागृहेषु मतिमान् दाताती वभजे स्मितं ॥ शृ
ण्वन्निति गिरस्तत्र नृपं वैश्रवणोपमं ॥ प्रविश्य शिष्यैः सहितो दृष्ट्वाहं मंत्रिणाश्रितः ॥ तत्र मंत्रिपदं प्राप्य द्रष्टुमुद्यानमुत्तमं
॥ मया गोदावरीतीरे कात्यायन्या विनिर्मितं ॥ इति श्रुत्वा कथामध्ये काणभूतिरुवाच तं ॥ स शातवाहनाभिख्यां कथं प्राप्तो ७
नरेश्वरः ॥ इति पृष्टो गुणाढ्यस्तं प्रोवाच विकचद्युतिः ॥ दीपकर्णाभिधो राजा हरपूजारतोऽभवत् ॥ तस्य शक्तिमती देवी वल्ल

भाभूच्छुचिस्मिता ॥ यस्याः कटाक्षबाणेन जज्रंभे विजयी स्मरः ॥ ततः कदाचिदानंदसिंधौ मधुपबांधवे ॥ आमोदमंदिरे काले कलि
कालंकृते मधौ ॥ देवीकुचस्थले राजा पुल्ले च बकुलस्थले ॥ विजहार स्मरोदारः स्वैरं हारिणि हारिणि ॥ राजपुत्री रतश्रांता स्रस्तलक
र्णोत्पला ततः ॥ अवाप निद्रामुद्याने बालानिलचलालका ॥ सुखप्रसुप्तामभ्येत्य तां भुजंगो दशाकरे ॥ रम्यं छिन्नं निसहसा पापः काल
कुठारकः ॥ स तया रहितो राजा विरहक्षामविग्रहः ॥ ब्रह्मचर्यरतः स्वप्ने ददर्शावरदं शिवं ॥ सिंहादिरूढो विपिने सप्तवर्षस्थितः शिशुः ॥
अपुत्रस्य सते पुत्रो भविष्यति वरान्मम ॥ इत्युक्तवाक्यमालोक्य प्रणतः शंकरं नृपः ॥ अपश्यत्काननं गत्वा बालं केशरिवाहनं ॥ डिंभे
थ नलिनीखंडक्रीडाडंबरतत्परे ॥ दिदृक्षौ भूमिपालस्तं जघाने केषुणा हरिं ॥ शार्दूलो निहतस्तेन यक्षोभूत्वा वराकृतिः ॥ त्वत्प्रसा
दादहं मुक्तः शापादित्यभ्यधान्नृपं ॥ सातो नामास्मि यक्षः प्राक् धनदानुचरो नृप ॥ मुनिभिः कन्यकाकामी शप्तः सिंहत्वमागतः
॥ सिंही भूत्वा च सा कन्या शिशुं हरिणलोचनं ॥ अजीजनदिमं कालेन मृतैव महाबलं ॥ तस्यां विमुक्तशापायामहं वर्धितबालकः
त्वच्छरापातपर्यंतं शापः प्राप्तो निजां श्रियं ॥ इतिवादिनमामंत्र्य सातं यक्षं नरेश्वरः ॥ शातवाहनमामंत्र्य पुनः प्रायान्निजां पु
रीं ॥ द्व्यन्वर्थाभिधः काले दीपकर्णसुतो नृपः ॥ ररक्ष वसुधां धन्वी धैर्यभूः शातवाहनः ॥ स कदाचिद्विहरोद्याने वितानेपुष्पधन्वनः
॥ वसंते कामिनीकांते जलकेलिरतोऽभवत् ॥ निषिंचन्कंकणमणिच्छायाशबलवारिणा ॥ तरुणीनां स्तनतटीं विजहार स्मरोप
मः ॥ तत्रैका महिषी राज्ञा हता सा वेगमंबुना ॥ मामोदकेन राजेंद्र ताडयेत्यभ्यधान्नृपं ॥ श्रुत्वेति मूर्खो भूपालः क्षिप्रमाहृतमोद
कः ॥ मा वारिणेति देव्यास्तद्वचः श्रुत्वा ह्रियं ययौ ॥ शब्दज्ञानेभिः सदेवीभिर्भृत्यैश्च श्रुतिशालिभिः ॥ सांतर्हासं मनाग्दृष्टो बभूव
भृशदुःखितः ॥ अस्पृष्टतीर्थसलिलै रजापैरतपस्विभिः ॥ त्रिलोचनमनाराध्य कथं विद्याधिगम्यते ॥ सोऽथ शोकाग्निसंतप्तः
समुत्सारितसेवकः ॥ अविज्ञातामयो वैद्यस्तस्थौ मौनी दिवानिशं ॥ कालेन सर्ववर्माख्यो मंत्री सह मया नृपं ॥ प्रोवाच राजन्न स्था
ने कोऽयं शोकग्रहस्तव ॥ स्वयं शिक्षितया किं ते विद्यया चक्रवर्तिनः ॥ विबुधास्त्वां निषेवंते पश्य शक्रमिवेश्वरं ॥ अथाहमवदं ध्या
त्वा गुणाढ्योहं यथार्थवान् ॥ पंडितं त्वां विधास्यामि पंचभिर्वत्सरैरिति ॥ ततोऽब्रवीत्सर्ववर्मा मासैः षड्भिर्बहुश्रुतं ॥ अहं नृपं करिष्या
मि विश्राम्यं तु भवद्विधाः ॥ इति श्रुत्वा विहस्याहं कुपितस्तारमभ्यधां ॥ भाषात्रये भविष्यामि मौनी पारंगते त्वयि ॥ सर्ववर्माब्रवी

दस्मिवो ढाह्वा दशवत्सरान्॥ त्वसादु केप्रतिज्ञेयं यदिमेन फलिष्यति॥ प्रतिज्ञायेति तपसा विलोक्य वरदं गुहं॥ स कातंत्रेण नृपतिं मासैः षड्भिरबहुश्रुतं॥ ततः पराजितो मौनी नृपेण स्थातुमर्थितः॥ शिष्याभ्यां सहितो दुःखाद्यातो हंदि शामुत्तरां॥ तपसा तत्र रुद्राणीं दृष्ट्वा तद्वचसा ततः॥ त्वामासाद्य गतेः शापे मया जातिस्मृता सखे॥ ज्ञात्वा देवीप्रसादेन त्यक्तभाषात्रयोप्यहं॥ पैशाचीमनपभ्रंशां संस्कृतप्राकृतांश्रितः॥ ॥ इति गुणाढ्यकथा॥ ॥ गुणाढ्येनेति कथितं श्रुत्वा संहृष्टमानसः॥ काणभूतिं पुनः प्राह मुमुक्षुः शापबंधनात्॥ त्वदागमनमद्यैव मित्रेण कथितं निशि॥ मम दिव्यदृशा धन्यं रक्षसा भूतिवर्मणा॥ इदं कथय तावत्वं विपुलं कौतुकं हि मे॥ त्वं कथं माल्यवान्नाम्ना पुष्पदंतः कथं च सः॥ इति पृष्टः पिशाचेन गुणाढ्यः प्राह दिव्यधीः॥ द्विजाग्रहारे जान्हव्यास्तीरे बहुसुवर्णके॥ विप्रो गोविंददत्ताख्यो बभूव श्रुतिपारगः॥ पंचाशत्तस्य तनयाः सरूपाः शास्त्रवर्जिताः॥ मूर्खान् विनष्टमर्यादांस्तान् दृष्ट्वाभ्यागतो द्विजः॥ वैश्वानराभिधस्तेषां निनिंद पितरं क्रुधा॥ गोविंददत्तोप्यभ्येत्य प्रसाद्य क्रुद्धमग्रजं॥ शुशोच तनयान्मानी चांडालानिव वर्जयत्॥ ततः कनीयान् ज्येष्ठश्च पुत्रौ तस्य लज्जया॥ जग्मतुस्तपसा द्रष्टुं देवदेवं त्रिलोचनं॥ विचित्रमाल्यवलयैरर्चयित्वा महेश्वरं॥ तद्वरान्माल्यवान्नाम योभवत्सोयमग्रजः॥ धन्योपरश्च यतधीर्वरं प्राप्य महेश्वरात्॥ कालेन भुक्तसंभोगो गणतां प्राप्स्यसीति सः॥ चंद्रमौलेर्वरं प्राप्य विद्यार्जनरतो महीं॥ भ्रांत्वा गुरुं वेदगर्भमवाप श्रुततत्परः॥ स कदाचिच्छ्रियं नाम भूपतेर्वसुवर्मणः॥ ददर्श यौवनवतीं तनयामुत्तमद्युतिः॥ सापि स्मरेणाभिहता तेन रूपवशीकृता॥ संज्ञां ददे तेन पुष्पाणि खंडयंती मुहुर्व्यधात्॥ संज्ञानभिज्ञो विवशः पुष्पचायशिली मुखैः॥ तत्संज्ञार्थमुपाध्यायाद्विवेद शरलाशयः॥ उद्याने पुष्पदंताख्ये मूढसंवित्तया कृता॥ ॥ गुरोः श्रुत्वेति तत्रैव प्रयातस्तद्वासवान्॥ तामासाद्य सुधासिक्तशरीर इव कानरः॥ जग्राह कंठे सोत्कंठमकुंठस्मरलालसः॥ साबभाषे तमानंदमंदिरं स्मरसुंदरी॥ कथं ज्ञाता त्वया संज्ञा पृष्टइत्यब्रवीच्च सः॥ संततं प्रेमयि विज्ञातमुपाध्यायेन धीमता॥ श्रुत्वेति सा त्रपं मेने तं विषाणविवर्जितं॥ ततो भयापदेशेन त्यक्त्वा तं हंसगामिनी॥ प्रययौ मुग्धमनसा रमं तेन न हि योषितः॥ लज्जावगानविधुरस्तद्वियोगाग्नितापितः॥ संमुमोह दुर्वरनाध्यानस्तिमितलोचनः॥ अत्रांतरे व्रजन् व्योम्ना भगवान्पार्वतीपतिः॥ तं विलोक्य कृपाविष्टो दे

व्याच स्वयमर्थितः॥ दिदेशायं चचूडाख्यं गणं तद्वांछितासये॥ स धूर्जटिसमादिष्टः समेत्य ब्राह्मणांतिकं॥ तं समाश्वास्य विहितब्रह्मवेषोज्वलन्निव॥ द्विजं कृत्वा वधूवेषं वसुवर्माणमभ्यगात्॥ तमुवाच महीपालमिमां रक्षस्नुषां मम॥ चिरं यातं सुतं यावज्ज्ञात्वा द्रक्ष्यामि भूतले॥ इत्युक्तोन्यासभूतां तां भीतो जग्राह भूपतिः॥ कन्यकांतःपुरे राज्ञो धृत्वा तां ब्राह्मणो ययौ॥ स राजपुत्रीमालोक्य वधूवेषः शनैर्निशि॥ प्राह किं नास्मि विज्ञातस्त्वया प्रज्ञासमन्विते॥ पुरा संज्ञानभिज्ञोहं मूर्खोस्मीति विडंबितः॥ त्वयास्मरशरैः कृष्टः सदा सर्वो हि मुह्यति॥ उक्त्वेति स्मरमंजर्या स्कंदर्या संगतस्तया॥ ययावलक्षितः प्रातर्द्विजवेषधरं गणं॥ गणोपि तं समादाय तरुणं जर्जराकृतिः॥ उवाच गत्वा राजानं प्राप्तोयं तनयो मया॥ स्नुषां देहीति तच्छ्रुत्वा राज्ञा ज्ञात्वाच तां गतां॥ श्येनरूपेण शक्रेण शिबिर्नरपतिः पुरा॥ परीक्षितोभ्रमं स्येवं देवा इति भयान्नृपः॥ द्विजं प्रसाद्य प्रणतो निजां दुहितरं ददौ॥ एवं गणप्रभावेन प्राप्य राजसुतां द्विजः॥ तस्यामुत्पाद्य तनयं महीपालं महीधरं॥ पुष्पदंतो गणः सोभूत्तथैवोद्यानसंज्ञया॥ ॥ पुष्पदंतमाल्यवान्नामनिरुक्तिः॥ श्रुत्वा गुणाढ्यकथितं काणभूतिरुवाच तं॥ शोणितेन लिखक्षिप्रं सप्तानां चक्रवर्तिनां॥ कथो विद्याधरेंद्राणां कथयामि स्थिरो भव॥ इति श्रुत्वालिलेखाशु स सप्तलक्षाण्यनन्यधीः॥ प्राहिणोत्कां लिखित्वा च शातवाहनभूभुजे॥ स च लक्ष्मीमदोन्मत्तो नामन्यत विशृंखलः॥ पैशाची वाङ्मखी रक्तं मोनोन्मत्तश्च लेखकः॥ इति राजाब्रवीत्कोवा वस्तुसारविचारधीः॥ बुधास्त्यजंत्यनास्वाद्य मूर्खाश्चाचर्वणक्षमाः॥ श्रोतारो नाप्रसिद्धेषु राजते कस्य भाषितं॥ अवमानावभूतां तां ज्ञात्वा मानी बृहत्कथां॥ व्याख्याय शिष्यसहितो गुणाढ्यो वाचयत्स्वयं॥ जुहावाग्नौ महाकोपः पत्रं पत्रमनारतं॥ तस्मिन्व्याख्यातरि कथां निःशेषा मृगपक्षिणः॥ त्यक्ताहाराः समभ्येत्य शुश्रुवुः साश्रुलोचनाः॥ ततस्त्वच्छुष्कमांसाशी नृपतिर्भृशमातुरः॥ विवेद लुब्धकगिरा मृगाणां शोषकारणं॥ द्रष्टुं स महदाश्चर्यमाययौ शातवाहनः॥ लक्षैकशेषामासाद्य ततो राजा बृहत्कथां॥ शुशोच चर्वणाशक्तः प्रेक्ष्यमाणः पदं पदं॥ सदा पूर्णः कवीनां शुक्र दृष्टममृतं बहु॥ कवाहरमुखोद्गीर्णा लभ्यते नाखिला कथा॥ श्रुत्वा गुणाढ्याद खिलं वृत्तांतं कौतुकाकुलः॥ ययौ तच्छिष्यसहितः समादाय नृपः कथां॥ गुणाढ्योपि परिज्ञानवह्निनिर्दग्धविग्रहः॥ माल्यवत्सदमासाद्य

विजहार हरप्रियः॥ राजार्पितच्छिष्यसमर्पितश्रीरैपूर्वाभ्यधिकप्रभावः॥ कथांत्रिनेत्राननपद्मसूतांसौभाग्यपूतांकथ
यन्जहर्ष॥ ॥ इतिक्षेमेंद्रविरचितायांबृहत्कथायांकथापीठंप्रथमोलंभकः॥ १ ॥ गुणाढ्येनेतिलिखितांशातवा
१ हनभूपतिः॥बृहत्कथामकथयद्विदुषांस्फुटांपुरः॥महेश्वरात्पुष्पदंतः काणभूतिरिमांततः॥ तस्माद्गुणाढ्यःस्तस्माच्च
श्रुतवान्शातवाहनः॥ ॥अतःपरंकथामुखंभविष्यति॥ ॥ कांताकटाक्षवपुषेनमःकुसुमधन्वने॥ज्ञायतेये
नसच्छायोविरसोपिभवद्रुमः॥भुजंगभंगिस्फुभगाकंदर्पजयन्नालिनी॥कौशांबीशांभवीवश्रीरस्तिस्वस्तिमतीपुरी॥
नीलरत्नमहासौधरश्मिवल्लीवितानके॥यत्ररात्रिषुकुर्वंति तारकाःकुसुमभ्रमं॥अर्जुनाभिजनेजातोजनमेजयसंभवः
॥शतानीकोभवत्तत्र राजाराजेंद्रशेखरः॥ बभारचंदनार्द्रेणयोगंगानिर्झरोज्वलं॥भुजेनभूमिवलयंमुक्ताहारंचवक्ष
सा॥संपूर्णचंद्ररुचिरामुक्तानिकरहारिणी॥स्वकीर्तिरिवयस्यश्रीःकीर्तिःश्रीरिवचाबभौ॥अद्वितीयगुणोदारंयस्य
सच्छायमुन्नतं॥ छत्रंयशइवस्वच्छंयशःछत्रमिवामलं॥सारसालंकृतिर्यस्य रणेकुवलयाश्रयः॥बभौस्फारामल
जलःकृपाणःकमलाकरः॥योवसंतइवक्ष्माभृन्मौलिन्यस्तशिलीमुखः॥ मंत्रीयुगंधरोनामशक्रस्येवबृहस्पतिः॥
सेनानीःस्कप्रतीपश्चविप्रःशास्त्रार्थकस्तथा॥स्वैरेषुनर्मसचिवस्तस्याभूद्वल्लभोविभोः॥तस्यविष्णुवतीनामविष्णोः
श्रीरिववल्लभा॥बभूवविभ्रममहीजैत्रमस्त्रंमनोभुवः॥समृगव्याप्रसंगेनकदाचिन्निर्गतोवनं॥ददर्शतेजसांरा
शिंमुनिंशांडिल्यमाश्रमे॥नामाभिजनमावेद्यतंप्रणम्यमहीपतिः॥अवापतस्मादुचितंपुत्रलाभवरंवरं॥सराज्ञो
वरदःश्रीमान्कौशांबीमित्यसादरं॥पुत्रेष्ट्यापुत्रकामस्ययाजकोभून्महामुनिः॥ततोमुनिप्रसादेनराजादशर
थोपमः॥ इक्ष्वाराममिवप्रापसहस्रानीकमात्मजं॥संपूर्णकांतिवपुषिप्रौढिंयातेकलापतौ॥तस्मिन्कृतकथा
धाम्निप्रोल्लासन्नृपांबुधिः॥सयौवराज्येतनयंविधायविधिनान्नृपः॥पीयूषबिंबितइवप्रालेयकिरणोभवत्
॥अत्रांतरेस्करपतिर्दसोयुद्धायसानुगः॥सहायास्थूलशिरसायमदंष्ट्रोमहासुरः॥वर्तमानेदिविमहासम
रेस्करक्षमां॥आनिनायशतानीकंसाहाय्येतंपुरंदरः॥नीतोमातलिनाभ्येत्यसादरंसधनुर्धरः॥विधायप्रेक्षका १

न्देवान्जघानदितिजान्रणे॥हतदैत्याधिपःसोथनिहतःसम्मुखोदिवि॥जहासेवाभ्रविभ्रांतिरवइल्लग्नैर्मौक्तिकैः॥त
तःशक्रस्यवचसाशरीरंतस्यमातलिः॥नीत्वामहीतलंचक्रेतनयेनयथोचितं॥महिष्यासहभूपाले संप्राप्तेकीर्तिशेषतां॥भेजे
राज्यंशतानीकतनयोमंत्रिणांगिरा॥यातिकालेमहेंद्रेणसनंदनमहोत्सवे॥निमंत्रितस्तत्कथितांभाविनीमभ्रणांकथां॥स्व
र्योषिद्भ्रलणःशापाद्योध्यायामलंपुरा॥जातामृगावतीकन्याभूपतेःकृतवर्मणः॥विधूमोनामचवसुःस्वर्लोकललनांपुरा॥ता
मेवब्रह्मसदनेदृष्ट्वानिलहतांशुकां॥बभूवमदनाक्रांतःशापान्मर्त्यत्वमागतः॥सैवतेदयितार्राजन्भाविनीनचिरादिति॥श्रुत्वा
तदुत्सुकमनाःसमामंत्र्यसचापतिं॥कौशांबींप्रस्थितोदृष्टःसतिलोत्तमयापथि॥स्मरस्मेरंकिमपितांभाषमाणामनन्यधीः॥
ध्यायन्शानक्रतुवचोनालुलोकेमहीपतिः॥साशशापनृपंस्फुभ्रूरनादरतिरस्कृता॥सौभाग्यमत्तामानिन्योनसहंतेवधीरणां
चतुर्दशसमाभूयाद्वियोगोहृदयस्थया॥तवराजन्निति तयाशप्तःप्रायान्निजांपुरीं॥ततःकालेनतनयांक्ष्मापतेःकृतवर्मणः
॥तामाससाददयितांसर्वस्वंपुष्पधन्वनः॥ मृगावतींसमासाद्यविलासनववल्लरीं॥विभ्रमांभोधिलहरींनंदमदनद्युतिः
सातस्माद्गर्भमादायभवानीवेंदुशेखरात्॥पांडिम्नाशशिलेखेवपीयूषक्षालिताबभौ॥अत्रांतरेमंत्रिवरःसेनानीश्चमहीप
तेः॥द्विजोनमेवयस्यश्चपुत्रान्प्रापुःकुलोचितान्॥स्फुतोयुगंधरस्यासीन्श्रीमान्योगंधरायणः॥रुमण्वान्स्कप्रतीपस्य
द्विजस्यचवसंतकः॥सुंदरीदोहदव्यक्तेरथपौरंदरीवदिक्॥राजराजमहिषीरजनीकरगर्भिणी॥पत्योसमाहितकृतिस्वि
छयामतिरुद्ययौ॥तस्यारक्तसरस्नानेनतच्चामन्यतभूपतिः॥कौसुंभसलिलस्फारेवाहितेसरसिक्षणात्॥सस्नेमृगदृशा
धीमान्कोहिदैवेपराङ्मुखे॥ततस्तामामिषधियास्कपर्णकुलसंभवः॥जहारविकटःपक्षीमुग्धांदग्धविधेर्वशात्॥नीत्वा
विहायसादूरंसनामचलसन्निभः॥तत्याजमोहविवशामुदयाचलकंदरे॥लब्धसंज्ञाशनैःकंपविलोलतनुवल्लरी॥कीर्णो
त्पलाइवदिशश्चकारचकितेक्षितैः॥तस्याःशोकानिलोत्कंपिकुचपर्यंतपातिनी॥असूत्रहारतांप्रापक्षणमश्रुकणावली
॥हानाथकृतपुण्याहंकनुद्रक्ष्यामितेस्करवं॥इत्युक्त्वागजसिंहानांपुरोभूद्वधकांक्षिणी॥सास्वयंकेसरिगजेस्यत्कानिनि
धनंययौ॥विपद्विसंकटेकालेमरणंलभ्यतेकुतः॥तस्याःकरुणमाकर्ण्यक्रंदितंसाश्रुलोचनाः॥मृगाविच्छिन्नरोमंथनिष्पं

बृ॰ कथा दृगतयोभवत्॥ ततोयदृच्छयायातस्तांविलोक्यतथास्थितां॥ निनायकरुणासिंधुर्मुनिपुत्रस्तपोवनं॥ सतेनाश्वासिता
१० तत्रकृपयाजमदग्निना॥ असूततनयंकालेसेनान्यमिवपार्वती॥ तस्याकाशभवावाणीचकारोदयनाभिधां॥ निजवंशशश
शांकस्यभविष्यच्चक्रवर्तिनः॥ आश्रमेसमुनींद्रेणकृतचूडादिकव्रतः॥ ववृधेबालकःशश्वत्सहमातुर्मनोरथैः॥ विद्याकला
कलितधीर्युवानयननंदनः॥ सोपश्यन्मृगयासक्तोव्याधबद्धंभुजंगमं॥ दीनमालोक्यभुजगंशबरायधनार्थिने॥ अमोच
यन्स्वजननीदत्तंदत्वास्वकंकणं॥ ससर्पोमोचितस्तेननागोभूत्वाकृतांजलिः॥ सख्यंविधायपातालंनिनायतमुदारधीः॥ स
किन्नराभिधोनागोधृतराष्ट्रसुतःप्रियं॥ पातालेप्रेमविनतस्तंवयस्यमपूपुजत्॥ भगिनींललिताभिख्यांददावुदयनाय
सः॥ यस्यामुखशशिज्योत्स्नातेजोनापातालकौमुदी॥ तद्गर्भाधानपर्यंतसङ्गापाथभुजंगमी॥ ययौविद्याधरपदंस्वयमामंत्र्य
वल्लभं॥ तांबूलीस्त्रजमम्लानांवीणांघोषवतीमपि॥ अवाप्यराजतनयःफणींद्रात्स्वाश्रमंययौ॥ मुनींद्राश्वास्यमानांसज
ननींशोककर्षितां॥ समेत्यानंदमुदितांचक्रेनयइवश्रियं॥ अत्रांतरेसशबरःकौशांब्यांवणिजंययौ॥ सहस्तानीकनामां
कमणिकंकणविक्रयी॥ आदायरत्नकटकंशुचिर्भीतोमहीभुजे॥ निवेद्यशबरोपेतंप्रणम्यसययौवणिक्॥ मृगावतीवि
योगाग्निदह्यमानतनुर्नृपः॥ तद्बाहुवल्लीसंसर्गसुधार्द्रंप्राप्यकंकणं॥ नीलकंठइवोत्कंठोनूतनांबुदनंदितः॥ श्रुत्वावल
यसंप्राप्तिकथांकृत्वापुरोगमं॥ शबरंतांदिशंहृष्टःप्रतस्थेसहमंत्रिभिः॥ यत्रेंदुभास्करमुखालभंनेसहसोदयं॥ सव्रज
न्गजसिंदूरसंध्यायितदिगंतरः॥ कंचिन्मार्गंसमुल्लंघ्यतस्थौविश्रांतसैनिकः॥ तस्मिन्विनिद्रेदयितासंगमध्यानतत्परे॥
कथासंगमकाभिख्यःकथकोकथयन्निशि॥ भविष्यत्यचिरादेवतवदेव्याःसमागमः॥ निस्तीर्णेदुःखजलधौभद्रमेवा
प्यतेयथा॥ अभूतांमालवेविप्रौकालनेम्यभयाभिधौ॥ गुणाभिजनशीलाढ्यौनिर्विश्योकृतवेतनौ॥ विष्णुवक्षस्थलन
होम भश्चंद्रलेखामथश्रियं॥ यज्ञैर्व्रतपरःकालनेमिरतोषयत्॥ विभूतिंप्राप्यतनयंश्रीदत्ताख्यमवाप्तवान्॥ पृथिवीनाथतां
यस्यजन्मनिश्रीरभाषत॥ प्राप्तोविक्रमशक्तेःसराजसूनोर्वयस्यतं॥ रूपविद्यागुणोपेतोललासद्द्विजपुत्रकः॥ वयस्या १०
बहवोप्यासन्बाहुशालिपुरोगमाः॥ तैर्युतंराजतनयोनसेहेतंबलाधिकं॥ तस्मिन्गूढवधोद्युक्तेश्रीदत्तोदूरदेशगः॥

अपश्यदंगनांगंगातरंगौघहृतांपुरः॥ चक्राजाक्रंदिनींत्रातुंतामंभसिविगाह्यसः॥ दृशाऽनुसारीबलवान्मग्नामनुममज्ज
च॥ जलांतरेततोपश्यद्दृक्पुष्पकृतार्चनं॥ शंकरंतत्सरःपूजाव्यग्रांतामेवचांगनां॥ कृतपूजांमणिगृहंनिजंप्राप्तांसखीवृतां
तामपृच्छत्सयत्नेननिषण्णांशोककारणं॥ साब्रवीद्दितिसुनादग्धःपितास्माकंविरोचनः॥ सिंहेनतत्प्रयुक्तेनसंनिरुद्धंपुरंचनः
श्रुत्वेतिललनावाचंसजघानमहाहरिं॥ खड्गरत्नमदात्तस्मैशापमुक्तोपिकेसरी॥ असुरेंद्रसुताचाग्र्यंविततारांगुलीय
कं॥ विषापहारंतत्प्राप्यस्नानायप्रेषितस्तया॥ स्नातुंमग्नःपुनर्गंगाकूलादेवोन्ममज्जसः॥ वयस्यानत्रसप्रापचनृपेणापित
रंहतं॥ भावीनृपःसुतोस्येतिश्रुत्वाविक्रमशक्तिना॥ श्रुत्वेत्युज्जयिनींगंतुंप्रस्थितोभृशदुःखितः॥ वयस्येनसहाटव्यां
ददर्शाक्रंदिनींस्त्रियं॥ माभैषीरितितामुक्त्वातयैवसहितोनिशि॥ प्रविष्टःशून्यनगरींतामपश्यन्निशाचरीं॥ तयैवभ
क्षितंदृष्ट्वावयस्यंकोपकंपितः॥ धाराजग्राहकेशेतांकंकालोत्तालितायुधां॥ सागृहीताहढंतेनप्राप्यशापांतमभ्यधात्॥ कौ
शिकेनास्मिशप्ताप्राकृतपसोविघ्नकारिणी॥ त्वत्करस्पर्शपर्यंतःशापोयंविगतोमम॥ इत्युक्त्वानिष्ठुरंनामतद्वयस्यमजी
वयत्॥ ततोव्रजन्पथिपुनःश्रीदत्तोन्यान्वयस्यकान्॥ प्राप्यस्वैरंगृहेतस्थौसुहृदोबाहुशालिनः॥ कदाचिद्दथमत्तालिललि
ताशोकचंपके॥ वसंतेसचिवैःसार्द्धमुद्यानेविजहारसः॥ तत्रापश्यन्नृपसुतांचामरालोलितालकां॥ विभूतिमिवरूपस्यवि
भ्रमस्येवसंपदं॥ लक्ष्मीमिवशशांकस्यकुसुमेषोरिवस्त्रियं॥ समृद्धिमिवदर्पस्यशृंगारस्येवदेवतां॥ निर्वर्णयन्सतांकांतां
रागान्मूढइवाभवत्॥ स्फूर्जद्दिशालविषवन्हिकरालदंष्ट्रानाशीविषान्वशमुपेत्यनयंतिधीराः॥ सिंहांश्चकेसरसटावि
कटाट्टहासान्कंदर्पदर्पदलनेनतुकश्चिदीशः॥ सामृगांकवतीदृष्ट्वाभूपतेर्बिंबकेःसुता॥ श्रीदत्तंमन्यथोदारंययोप
चेषुलक्ष्यतां॥ मनोभववनारंभविभ्रमव्यग्रमानसो॥ भुजंगःकदलीकेलिलोलोतामदशात्करे॥ जातस्मरविकारेण
सुहृदाप्रेरितस्ततः॥ निजांगुलीयंदत्वैवश्रीदत्तस्तामजीवयत्॥ आशीविषविषोन्मुक्ताततःसालब्धजीविता॥ मनोभुवा
भुजंगेनमुमोहमुहुरर्दिता॥ ततोविदितवृत्तांतासखीभावनिकाभिधा॥ स्मरार्तमेनंश्रीदत्तंतस्याःसंतापमभ्यधात्॥ सु
हृद्भिरयमामंत्र्यविरहक्षामविग्रहः॥ वन्हिदाहापदेशेनजहारसनृपात्मजां॥ वयस्यैस्तांपुरोनीत्वास्वयंगत्वान्यवासरे॥

बृ॰ कथा ददर्शशरनिर्भिन्नांदीनांभावनिकांपथि॥ किमेतदितिपृष्टाथनिखिलान्सचिवोऽस्तव॥ शरैर्विदार्याभिमुखान्क्षत्रियैर्मेहता
सखी॥ श्रुत्वेत्यशनिसंकाशांस्कंदोवीक्ष्यवीक्षनान्॥ जवेनसतुरंगस्थःक्षत्रियान्कुपितोन्वयात्॥ भुजगेनसखड्गेनकीर्तिं
११ निर्मोकशालिना॥ व्यसून्व्यधायसहसाराजन्यान्प्रापतांप्रियां॥ रणातुरगमादायविपुलाघातपीडितं॥ प्रययौहर्ष
संपूर्णः समारुह्यप्रियासखः॥ विकटामटवींप्राप्यतुरगेपंचतांगते॥ अधश्रमार्तादयितंकांताजलमयाचत॥ तृष्णा
र्तांतांतरुतलेनिधायसजलाशयात्॥ खड्गद्वितीयोरण्येथवभ्रामोद्भ्रांतमानसः॥ अत्रांतरेसहस्रांशोपद्मिनीविरहादि
व॥ प्रविष्टेजलधिंसांद्रतमांस्यनुजजृंभिरे॥ तमालतालव्यालोलमत्तालिकुलमांसलैः॥ सविसस्मारतद्भ्रांतमोभि
र्दुनयेरिव॥ हाप्रियेक्वनुलप्स्यामिलपन्नितिससंभ्रमः॥ नाससारवनस्यांतंव्यसनस्येवदुर्मतिः॥ ततःप्रभातेदयि
तावियोगविधुराशयः॥ न्यग्रोधमधिरुह्यासाविलोक्यविललापसः॥ वृक्षमूलधृतंखड्गंतस्यायातोयदृच्छया॥ ज
हारशबराधीशोदुःखंदुःखेनतन्यते॥ सतमाहप्रियान्नूनंतवपल्लीनिवासिभिः॥ मङ्गल्यैःकृपयानीतातामन्विष्यस्व
यंव्रज॥ ततःप्रतिनिवृत्तस्यखड्गंदास्यामितेसखे॥ श्रुत्वेतिसहतद्भृत्यैर्ययौपल्लींस्खलद्गतिः॥ तत्रश्रांतश्चिरंश्रांतः
क्षणंनिद्रावशंगतः॥ भित्वेंदुर्गोपहारायनिबद्धोगाढशृंखलैः॥ ततोनेत्रोत्पलच्छायाजितकर्णोत्पलखंडिका॥ शबरेंद्र
सुतावीक्ष्यतंस्मरव्याकुलाभवत्॥ सबिंबाधरशोणांशुव्यक्तगुंजाफलस्रजं॥ पुलिंदस्कंदरींभेजेस्वकांतासंगमा
शया॥ ततःसासंगमव्यक्तगर्भजृंभालसाशनैः॥ अमोचयत्तंदयितापुनर्दर्शनसंविदा॥ तयाश्रीदंडसुतयाश
र्वर्यामुक्तबंधनः॥ मत्खड्गोजनकाद्ग्राह्यइत्युक्त्वातांविनिर्ययौ॥ समृगांकवतीमेवविचिन्वन्काननेचिरं॥ चचार
विश्लथगतिर्यूथभ्रष्टइवद्विपः॥ अपिकश्चासनामार्गेप्रियादृष्टेतिवादिनां॥ तंवृद्धशबरोभ्येत्यजगदेजीवैर्न्विव य
॥ शोचंतीत्वामदुःखार्हासामयातववल्लभा॥ दृष्टाश्रीदत्तकृपयारक्षितावसुतायथा॥ साशशांकमुखीमुग्धा
तरुणीपल्लिवासिभिः॥ नीत्वेतिमथुरांग्रामंनीतानागस्थलंमया॥ साधोर्द्विजन्मनोगेहेविश्वदत्तस्यमानिनी॥ न्यस्ता ११
तत्रस्वयंगच्छेत्युक्त्वातंशबरोययौ॥ तच्छ्रुत्वामारुतजवोविश्वदत्तंसमेत्यसः॥ देहिप्रियामितिप्राहसचप्रीतस्तमभ्य

धात्॥ अमात्यःशूरसेनस्यनृपतेरभयाभिधाः॥ द्विजन्मातस्यसागेहेमयान्यस्तामनस्विनी॥ श्रुत्वेतिगंतुकामो
थस्नातुंयातःसदार्थिकां॥ चौरबद्धमहाहारंव्यस्यत्याप्रापकर्पटं॥ तंतुदृष्ट्वैवराजार्हमुक्ताहारंवहन्पथि॥ अवाप्तो
राजपुरुषैर्भर्त्स्यमानोव्यरुध्यत॥ तंवधायसमारुह्यराजडिंडिमघोषणैः॥ निर्गतान्ब्राह्मणीमध्येददर्शनिजवल्लभं॥
सागत्वादुःखसंत्रासदारितेवामुनाथतं॥ अमात्यतःप्रियतमंवधबंधादमोचयत्॥ रक्षितःसोभयाख्येनमंत्रि
णाप्राप्यतांप्रियां॥ ज्ञात्वातमेवचशनैःपितृव्यंप्रापनिर्वृतिं॥ यक्षांगनाराधनतःप्राप्तातांमहतींश्रियं॥ सपि
तृव्योददौतस्मैविवाहंचतयोर्व्यधात्॥ ततस्तैःसंगतोमित्रैःशूरवर्मसुतामपि॥ पितृव्यस्यधियाप्रापसहहस्त्य
श्वसंपदा॥ कदाचिदथकालेनसंनिरुद्धःसवर्त्मनि॥ दस्युभिर्दस्युसेनान्यमवधीद्विक्रमोद्यतः॥ शक्तिघाताकुलंय
श्वान्विन्युस्तंदस्यवोबलात्॥ चंडिकायतनंघोरंनररक्ताक्तवेदिकं॥ श्रीदंडतनयांतत्रददर्शार्चितचंडिकां॥ वीरसे
नाभिधंपुत्रंतस्यांजातमवापच॥ खड्गरत्नंप्रियांतोचश्रियंचशबरार्जितां॥ कल्पितांकीर्तिशेषेणश्रीदंडेनपुरा
स्वयं॥ राज्यंतस्यसमासाद्यबिंबकश्रियमापच॥ हत्वाविक्रमशक्तिंचपापंपितृवधक्रुधा॥ अवाप्यदयितास्तिस्रः
सर्वराज्यमवाप्तवान्॥ श्रीदत्तेनेतिदुःखाब्धिमुत्तार्याप्ताःसुखप्रियः॥ ॥श्रीदत्ताख्यायिका॥ ॥श्रुत्वे
तिसंगमकृतःकथकाद्भुतांकथां॥ निनायरजनींराजाराजपुत्रींविचिंतयन्॥ ततःकालेनककुभंप्राप्यजंभारिर
क्षितां॥ जामदग्न्याश्रमंप्रापनिर्वैरहरिकुंजरं॥ मुनिनापूजितस्तत्रदयितांविरहार्दितां॥ लेभेहर्षविकोशाक्षस्तनयं
चामितद्युतिं॥ अयंतवोनरपतेमृगवत्यांयशोनिधिः॥ जातःश्रीमान्सुतोजेताधनंधयइवापरः॥ उक्तेतिमुनिनाद
त्तंगृहीत्वोदयनंनृपः॥ प्रियासहायःस्वपुरींप्रतस्थेमंत्रिभिर्वृतः॥ ततःप्रविश्यकौशांबींतनयायददौनृपः॥ पुत्रान्
युगंधरादीनांयौवराज्यश्रियासह॥ यौगंधरायणोमंत्रीरुमण्वान्वाहिनीपतिः॥ वसंतकोनर्मसुहृद्राजसूनोरभूत्ततः
॥ ततोविहृत्यसुचिरंदयिताकेलितत्परः॥ सहस्रानीकनृपतिःकीर्तिवजयाश्रितः॥ पवनाकंपिकदलीदललोलांभवस्थि
तिं॥ ध्यायेवकलयन्प्रायात्सहामात्योमहापथं॥ रामानकस्यरतयेमदनाभिरामाकस्यामृतंनधनयौवनकेलितत्वं॥

सर्वात्मनाविषयसंगसुखंचकिंनुभ्रंगोन्तरंगकरिकर्णविलासलोलं॥ ॥इतिक्षेमेंद्रविरचितायांबृहत्कथायांकथामुखे
महत्स्वानीककथा॥ ॥गुलोत्सितगतिर्यानेपार्थवंश्येमहीपतौ॥प्रियासहायःतत्सूनुश्चक्रेराज्योचितांक्रियां॥क्रमागतं
समासाद्यराज्यंवत्सेश्वरस्ततः॥किरीटिचरिताश्चर्येजनंचक्रेश्लथादरे॥यौगंधरायणन्यस्तराज्यचिंताभरोनयन्॥कालंवी
णाविनोदेनसमृगव्यारसेनच॥अत्रांतरेश्लथारंभंतंज्ञात्वोज्जयिनीपतिः॥चक्रेचंडमहासेनस्तज्जयायाचलंमनः॥कन्यावा
सवदत्तेयंतद्योग्यैवसुतामम॥निसर्गशत्रुर्नाथ्योंमेमानीसत्वनयाचते॥बहुदुर्गोमहाकोशोरक्तामात्योविशालधीः॥उपाये
नैवशक्योसौमृगव्याछद्मनाविना॥इत्यवंतीपतिर्ध्यात्वाचिरंवत्सेश्वरछले॥तुष्टावदुर्गामुद्यानंगत्वापुष्पकरंडकं॥इच्छासिद्धि
वरंप्राप्यभगवत्यास्ततोनृपः॥विविच्यधीमान्सुचिरंबुधदेवेनमंत्रिणा॥बध्नातिकुंजरान्नित्यंवीयास्वनहतान्वने॥शाद्यः
सकूटनागेनविधायेतिधियंपुरः॥दिदेशदूतंकृतकप्रणयोपायनैःसह॥वत्सेश्वरायसंदेशमित्यदाच्चदाशयः॥स्वप्रका
शश्रियस्फारमिंदोरिवकलानिधेः॥मानसोल्लासिनीयंतेप्रस्तुताकीर्तिकौमुदी॥पुत्रीमेकुलसर्वस्वमियंगांधर्ववेदिनः॥वी
णायाःश्रुतितत्वज्ञाशिष्यतांनववांछति॥तदेह्युज्जयिनींदेवप्रणयाद्दुहितुर्मम॥संतोर्थनासुमहतांनिषेधंनहिशिक्षिताः॥
इत्युक्ताप्रेषितोदूतःकौशांबींत्वरितोययौ॥तत्रोदयनमासाद्ययथादिष्टंन्यवेदयत्॥वीणांवासवदत्तासोज्ञातुमायातुमत्पु
रीं॥शिष्योगुरुगृहंयातिनहिशिष्यगृहंगुरुः॥इतिप्रतीपसंदेशंप्राप्यदूतेगतेनृपः॥यौगंधरायणोमंत्रीचुकोपावंतिभूभुजे
सप्राहभ्रुकुटीधूमव्यक्तकोपानलाकुलः॥यौगंधरायणंधीरःसंरंभाकंपिकुंडलः॥पश्यराजपत्रोस्तस्यसंमोहाध्मातचेत
सः॥असमशाव्हानसंदेशनिःपंकस्यप्रगल्भता॥बध्वाहंसानुबंधंतंमिथ्याप्रणयवादिनं॥यास्यामिकोपजलधेःपारंसेनावि
धीयतां॥श्रुत्वेत्याहमहामंत्रीराजन्सद्दशमुच्यते॥अवज्ञामंथरावाचोनसहंतेमनस्विनः॥स्वाछंद्यसुखशक्तेनरतिपेशलितो
जसा॥दैवत्वयास्वयंनीतःप्रतापोदिक्षुशांततां॥भवंतंमृगयासक्तंविज्ञायांकुरितानयं॥मन्येहंप्रतिसामंतैःकिंचिदुच्चैःकृ
तंशिरः॥प्रणयेनैवलत्नावविनयेनैवकीर्तयः॥नरनाथविनश्यंतिकुनयेनन्नपश्रियः॥महेंद्रवर्मणोनप्ताजयसेनसुतोनृ
पः॥चंडवीरश्चंडसेनःसचंडाकोनृपोभवत्॥राजाचंडमहासेनःसविजेतुंनशक्यते॥यस्मैददौस्वयंदेवीकृपाणंविंध्यवासिनी॥ १२

Dr. BHAU DAJI

नडागिरिर्गिरींद्राभोगजेंद्रस्तवविद्यते॥मन्येयस्यमदामोदैर्वैमुख्यंयांतिदिग्द्विपाः॥मृगयाभिर्गतोहत्वासदैत्यंक्रौडरूपि
णं॥अंगारकाख्यंपाताले ततःप्रापतदात्मजां॥तामंगारवतींप्राप्यरूपलावण्यशालिनीं॥गोपालपालकौपुत्रौतस्यांप्राप
सुतौयथा॥पुत्रीवासवदत्ताख्यास्वप्नेवासवसूचिता॥श्रूयतेतनयोभावीयस्यांविद्याधरेश्वरः॥यौगंधरायणस्येतिश्रु
त्वाराजसुतोनृपः॥प्रदध्यौमनसादृष्टांस्मरोद्दिशानलोचनः॥वत्सेशोक्तंप्रतिवचोदूतादाकर्ण्यनिस्पृहं॥ध्यायंश्चंडमहा
सेनःकिमपिव्याकुलोभवत्॥योधैरंतःकृतावासंचंडोयंत्रमहागजं॥विंध्यांतर्विससर्जांशुसशैलमिवजंगमं॥तंविला
सालसगतंविलोलश्रवणान्वितं॥व्याधैःसुरगजाकारंविवेदोदयनोनृपः॥हृष्टोथतुरगप्रायंसैन्यंकृत्वाटवीमुखे॥ग
जेंद्रबंधकुशलोविवेशोकोमहद्वनं॥तत्रापश्यन्महानागमहंकारमिवोन्नतं॥संसारमिवनिःसारमैश्वर्यमिवचंचलं॥अ
शीलमिवदुःखांतंकुमंत्रमिवनिःफलं॥स्त्रीचित्तमिवदुर्लक्ष्यमज्ञानमिषमोहदं॥अधर्ममिवमायाढ्यंमनोरथमिवाय
तं॥वेश्यारागमिवासत्यमनंगमिवहारिणं॥दुर्बुद्धिमिवदुःसाध्यंनिरंकुशमिवेश्वरं॥परद्रोहमिवाभद्रमदानंलोभिसंनि
भं॥कूटकुंजरमालोक्यवीणामधुरगीतिभिः॥सजिघृक्षुर्युधातस्थौसेवाभिरिवदुर्जनं॥कथंयंत्रकृत्रिमोहस्तीवाणयाकृ
चतक्रूहः॥प्रायेणव्यसनासक्तिर्मोहायमहतामपि॥तस्मिन्घोषवतीग्रेयोधाःकुंजरनिर्गताः॥अभ्याययुःसु
संरब्धाःसहसातंजिघृक्षवः॥सतानशंकितोदृष्ट्वाधैर्यनिःकंपमानसः॥मंडलोन्नालचरणोजघानसुभटान्रणे॥ह
तशेषैःसहाभ्येत्यमहाकालवरोर्जितः॥एकोवीरवरःपश्चाज्जग्राहछद्मनानृपं॥तच्छ्रुत्वास्वयमेत्याथहर्षोदुज्जयि
नीपतिः॥वत्सेश्वरंसमादायप्रविवेशनिजांपुरीं॥पौरैरभ्यर्थितोभ्येत्यसकूटविजयीनृपः॥लज्जयामार्दवंप्रापविर
रामचतद्धात्॥ततःप्रणम्यवत्सेशंसहपौरैर्व्यजिज्ञपत्॥मान्योसिममराजेंद्रनहिमेकिल्बिषंत्वयि॥इत्युक्त्वातन
यानस्मैन्यवेदयदमंदधीः॥वीणागेयकलाज्ञानेशिष्येयंभवतामिति॥तांददर्शततोराजानीलनीरजलोचनां॥शृंगार
सागरोद्भूतांविलासलहरीमिव॥भ्रूलतावीचिरचनाहारडिंडिमपांडुरां॥छद्मग्रहावमानाग्निनिर्वापणनदीमिव॥दध
तींत्रिवलीकांतिकल्लोलेरोमवल्लरीं॥हारहंससमुत्सृष्टांसेवालललतिकामिव॥शोणाधरांशुसिंदूरकुचकुंभाभिरागिणीं॥स्मि

बृ· कथा तांशुचामरोदारां कंदर्पकरिणीमिव ॥ विलोक्य राजतनयां स कंपतरलोभवत् ॥ कांतिकल्लोलिनीकूले दशां कद्ववबिंबिनः
१३ ॥ राजपुत्री तमालोक्य लज्जानतमुखी बभौ ॥ मेखलारत्नकिरणैर्दृते वोर्ध्वविकासिभिः ॥ स्वेदजालपरामृष्टकपोलागरुप
त्रिका ॥ चकंपेवारुणास्त्रेण साहतेव मनोभुवा ॥ प्रेमप्रणयशालिन्या सेव्यमानस्तया नृपः ॥ राज्यस्थितिं विसस्मार स्कंधये
वामरीकृतः ॥ श्रुत्युत्कर्षापकर्षेण स्वरैः स्थाननिपातिभिः ॥ मूर्छनालक्षणोदारतालछिन्नायतिक्रमैः ॥ निर्विशेषं प्रियत
मा तत स्तरललोचना ॥ प्रावीण्यं प्राप वीणायामवंतिनृपतेः सुता ॥ अत्रांतरे तथाभूतं ज्ञात्वा वत्सनरेश्वरं ॥ संमंत्र्य सेनाप
तिनार्यो रैश्च सह दुःखितः ॥ योगंधरायणो धीमान् निर्ययौ योगकोविदः ॥ विपद्वल्लीकुठारो हि सत्सहायसमुद्यमः ॥ व्रजन्
विंध्याटवीं प्राप्य सद्वृक्षगहनाकुलां ॥ प्लवत्कपिकुलालोलबालहिंतालपल्लवं ॥ शल्लुकीकवलोद्गारिकरकुंजरसंकुलां ॥
जृंभमाणमहासिंहदंष्ट्रांशुपटलोज्वलां ॥ तामतीत्याचलोपांते पल्लीपतिमुदारधीः ॥ पुलिंदकाभिदं प्राप वसंतकसखः प
थि ॥ सुहृदं वत्सराजस्य तं सर्वशावरेश्वरं ॥ सहायः कार्यशेषे त्वमित्यामंत्र्य ययौ रहः ॥ दिनैर्दशभिरासाद्य योगेनोज्जयि
नीं ततः ॥ महाभयं महाकालश्मशानमविशन्निशि ॥ कपालशकलाकीर्णं चटत्कारिचितानलं ॥ वेतालोत्तालकंकाल
केलिकोलाहलाकुलं ॥ तत्र योगीश्वराख्येन मित्रतां ब्रह्मरक्षसा ॥ प्राप्य रूपपरावृत्तियोगं लेभे महामतिः ॥ क्षणाद्बभूव
खल्वाटः पंचचूडो महाहनुः ॥ लंबोदरस्तनुग्रीवः ककुदी जरयार्दितः ॥ वसंतकोपि तेनैव नीतः क्षिप्रं विरूपतां ॥ बभूव वि
कटाकारो हास्यायतनमात्मनः ॥ योगंधरायणः प्राप्य राजमार्गं स्खलद्गतिः ॥ गायन् हसन् पठन् धावन् नृत्यन् जनम
हासयत् ॥ स बालकरतालौककेलीकलकलाकुलः ॥ कन्यकांतःपुरापांते नितांतोन्मत्तकोभवत् ॥ कौतुकात्तत्र नारीभि
र्नीतो गंधर्वशालिकां ॥ कन्यागुरुं ददर्शाथ नृपं पुनरिवार्जुनं ॥ स संयतं समालोक्य रुरोद विगतज्वरं ॥ रहो युक्तं समा
भाष्य योगेनांतर्हितोभवत् ॥ वत्सेश्वरोपि संप्राप्य योगं यौगंधरायणात् ॥ ददर्श मंत्रसंकेतविपरीतं वसंतकं ॥ तेन नर्म
विदग्धेन रंजिता राजकन्यका ॥ जहर्ष श्रीयुताः सत्यं विपरीतेषु सादराः ॥ धुर्यः कथाविशामस्मि ब्रुवाणमिति तां कथां ॥ प
प्रच्छ राजतनया पृष्टो प्याह वसंतकः ॥ मथुरेत्यस्ति नगरी यदग्रे नगरीयसी ॥ सा चित्राकृपुरी रम्या रुक्मिणीव हरिप्रिया ॥ १३

पौरकीर्तिसुधाधौतरत्नभ्राजिष्णुमंदिरे ॥ श्वेतद्वीपधिया यत्र साक्षात्सन्निहितो हरिः ॥ बभूव रूपिणी नाम तत्र वारविला
सिनी ॥ वशीकरणचूर्णेन निर्मितेन मनोभुवा ॥ सुरालयगता पश्यत्सा कदाचिन्मनोरमं ॥ द्विजं संगमिवानंगं साकारमिव
यौवनं ॥ दृष्टकामुकलोकापि तं विलोक्य जहर्ष सा ॥ करोति किं न वशगं सत्संसाति शायं वपुः ॥ ततस्तं लोहजंघाख्यं दूत्या
प्रसभमार्थितं ॥ निजं निनाय सा गेहं रत्नांशुकपिशोदरं ॥ तेन बालकुरंगाक्षी रममाणा घनस्तनी ॥ ललास रुचिरं तत्राभि
षिद्धाशेषकामुका ॥ ततो मकरदंष्ट्राख्या जननी हरिणीदशः ॥ अनेककामुकच्छिन्ननासाश्रवणभीषणा ॥ सदा कलह
निर्लूननिःशेषकचसंचया ॥ अतीव कामुकव्रातकशाघातव्रणांकिता ॥ भयदा कालरात्रीव वज्रधारेव कुट्टिनी ॥ घोरा
चिताग्निमालेव कंकाली वनराशना ॥ विलोक्य निर्धनं पुत्र्या वल्लभं स्थविरा स्थितं ॥ कपालमांसरसिका राक्षसीवाब्रवीत्सु
तां ॥ अहो विभूतिरहितं पुत्रि गेहं न राजते ॥ शुक्लवीथीव वेश्या हि पूर्यते लोकयात्रया ॥ पत्युर्दारिद्र्यसाहाय्यं सतीनामे
व शोभते ॥ अस्माकं तु धनिव्रातैः सदा नवनवोत्सवः ॥ अभ्यासरहिता विद्या निरुद्योगवतां श्रियः ॥ वेषयोषाश्च रागि
ण्यो हास्यायतनमंगने ॥ इदं हि यौवनं बाले तरंगगयाभंगुरं ॥ अस्मिन्प्रयाते वेश्यायां को ददाति कपर्दिकां ॥ दृष्टिछ
टेव तीक्ष्णांता कुटिला भ्रूलतेव या ॥ स्तनस्थलीव कठिना वेश्या सर्वस्वहारिणी ॥ अकामाः कामचारिण्यो भोगिन्यो न
कुलादराः ॥ निर्लोपहारहारिण्यो जृंभंते वारयोषितः ॥ विचित्रमाया बहुलास दासंमोहिनी नृणां ॥ अस्मद्विधानां स
रलेसंसृता वपसंसृतिः ॥ धनेनात्योपचारेण हरंति द्रविणं बहु ॥ विदग्धा वारललनाकर्णोदकमिवांभसा ॥ स्मितं नृ
त्यं प्ररुदितं रागो रूढिरुदारता ॥ स्वप्नदृष्टमिवाशेषमसत्यं वारयोषितां ॥ कामुके नूतनासंगगाढालिंगनकातरे ॥ ग
णिकारोह गणनां करोति ध्यानमास्थिता ॥ धनार्जने यत्नपरा भव पुत्रि महीभुजां ॥ वेश्यानां चार्थहीनानां तृणेनापि
न विक्रयः ॥ पतंति खरुधारासु विशंति मकराकरं ॥ किं न कुर्वंति सुभगे कष्टमर्थार्थिनो नराः ॥ पुत्रि धन्या वयं यासां
संभोगेन धनार्जनं ॥ करं शिरो वा विक्रीय धनं मुग्धि न लभ्यते ॥ त्यजैनं निर्धनं विप्रं मा रूपवशगा भव ॥ न हि दारुमयो
हस्ती करोति समरक्रियां ॥ इति मातुर्वचः श्रुत्वा रूपिणी भृशकंपिता ॥ नैवं वदेः पुनरिति प्रोवाच दृढरागिणी ॥ गूढं म

बृ॰ था॰ करदंष्ट्राथ राजपुत्रं स्वमंदिरे ॥ निधाय निर्दनं क्रुद्धा निराससपदि द्विजं ॥ स निरस्तो र्द्धचंद्रेण ताडितो लकुटैर्भृशं ॥ क्षिप्तश्च
१४ कर्दमे प्रायाद्दर्वीरविताषितः ॥ रागापमानसंतापदुःखदैन्यसमाकुलः ॥ छायार्थी शुष्ककरिणः प्रविवेश कलेवरं ॥ अरण्ये
जंबुकस्यक्तकीटनिष्कुषितांतरे ॥ स निद्रामाययौ तस्मिन् रंध्रवातगतागतैः ॥ अत्रांतरे समुत्तस्थौ मेघस्तापिच्छसच्छविः ॥
यद्वृष्टिपूरैः ककुभो बभूवुर्जलसंकुलाः ॥ महौघेन हृतः सोथ सरिद्धीचिगतो द्विजः ॥ समुद्रमाससादाशु तरंगालिंगितो मु
हुः ॥ तार्क्ष्यवंशस्तपः पक्षी तमादायामिषाशया ॥ भीतस्तस्या जलं कायां दृष्ट्वा तं निर्गतं नरं ॥ निःसृतोथ गजाद्विप्रः क्षणेः
प्राप्य बिभीषणं ॥ अवाप तस्मात्सत्कारं तत्र राघवगौरवात् ॥ पृष्टो बिभीषणेनासौ प्राहाहं मथुराश्रयः ॥ विसृष्टो विष्णु
ना साक्षाद्रत्नार्थं भवदंतिके ॥ बिभीषणोपि तच्छ्रुत्वा विस्तोर्दैयमुपायनं ॥ शंखचक्रगदारत्नमिसुत्कास्मै ददौ विभुः
॥ तदाज्ञयैव सौपर्णे वाहनं प्राप्य पक्षिणं ॥ रत्नानि च महार्हाणि मथुरां प्रययौ क्षणात् ॥ तत्र दिव्यांबरधरः स्रग्वी रुचिरकुं
डलः ॥ शंखचक्रांकितो रात्रौ रूपिणीं संगतः पुनः ॥ रूपिणी विष्णुना साक्षात्कामिताहमिति स्फुटं ॥ उवाच लक्ष्मीसौ
भाग्यगर्वभरणमानसा ॥ निषिद्धजनसंलापा देवताहमिति स्थिता ॥ कथंचिज्जननीं वक्ति रापटांतरिताकृतिः ॥ एवं प्रति
निशां तस्यां संगते देवविग्रहे ॥ परान्मकरदंष्ट्रां तं यत्नैकाग्रान्यलोकयत् ॥ ततः प्रणम्य तनयां रूपिणीं साभ्यजिग्यपत् ॥
स शरीरा दिवं गंतुं त्वत्कांतेनाहमर्थये ॥ इति मातुर्गिरा प्राह सा प्रियं विष्णुमविग्रहं ॥ मातामे त्वत्प्रसादेन स्वर्गं गंतुं समीह
ते ॥ तच्छ्रुत्वा केशवाकारस्तथेत्युक्ता दिदेश तां ॥ लिप्ता च पंचचूडा च प्रातः कार्यस्यनादरात् ॥ तदादेशात्स्वयंकृता कुट्टिनी
पंचचूडिका ॥ सिंदूरलिप्तैककुचा मसीन्यस्तात्रिपुंड्रिका ॥ एकादश्यां सन्निधि मे माथुरेस्मिन्सुरालये ॥ उक्तेति न्यांसह
सानिनाय खरवाहनं ॥ ततस्तां तोरणस्तंभे निधायैवादरोऽव्रतान् ॥ उवाच निश्चितो देवाग्रे संस्थितान् ब्राह्मणान् लघु ॥ मारी
पतिष्यति क्षिप्रं मघवोभीषणाकृति ॥ रक्षा विधीयतां काचिदित्युक्त्वा लक्षितो ययौ ॥ आकाशभाषितं श्रुत्वा ते द्विजा
स्त्रासविह्वलाः ॥ शांतिस्वस्तिकमंत्रांकस्तोत्रैश्च क्रुर्महारवं ॥ कुट्टिन्यपि चिरन्यस्ता तत्र शीतानिलार्दिता ॥ हा हा पता १४
मीति भयाद्विरुराव खरस्वरं ॥ तच्छ्रुत्वा ब्राह्मणाः सर्वे मा पतेत्यार्तवादिनः ॥ मारि मारि नमस्तुभ्यं त्राणं त्वमिति चक्रुशुः ॥ सात्र

वान्विय ताम्येव कंपमाना पुनः पुनः ॥ मामापतेति चासंतं भीताः प्रादुर्द्विजातयः ॥ पताभिमा पतेत्येवं नस्यास्तेषां च सानिशा
॥ प्रययौ क्रंदतामेव वसंते समयोपमा ॥ स वृद्धबालनगरे संप्राप्ते कौतुकाकुले ॥ प्रातर्दूरात्यरिज्ञाता द्विजैनैकेन कुट्टिनी ॥ लो
हजंघेन रचितं सकर्मैतदिति द्विजाः ॥ विज्ञाय कुट्टिनी वैरे प्रसिद्धं ददृशुश्च तं ॥ स्वरूपं लोहजंघोपि विहाय बकुरद्रदः ॥ रूपिणीं च
पुनः प्राप्य प्रीतिं च प्राप पुष्कलां ॥ ॥ लोहजंघाख्यायिका ॥ ॥ श्रुत्वेति राजतनया कथामद्भुतशालिनी ॥ अमंदानंदनिष्यं
दस्मितधौतमुखी बभौ ॥ अथ राजानमभ्येत्य स्वैरं यौगंधरायणः ॥ विमुक्त्युपायं संमंत्र्य यौगं दत्वाययौ पुरः ॥ प्ररूढगा
ढविश्रंभां प्रेमबंधवशीकृतां ॥ राजपुत्रीं नृपो ज्ञात्वा योगस्फोटितबंधनः ॥ भद्रां भद्रवतीं नाम करिणीं लक्षणोर्जितां ॥ आ
दायाषाढकं कृत्वा दाने हस्तिपकं वशी ॥ वसंतकेन सहितः सार्धं वासवदत्तया ॥ तत्सख्या प्रेमविश्वासभुवा कांचनमालया ॥
निशि सर्वायुधोपेतो हत्वा नगररक्षिणः ॥ ययौ करेणुकावेगधुतहारतरंगितः ॥ प्रयाते वत्सनृपतौ बभूवोज्जयिनीपतिः ॥ मि
लत्समस्तसुभटव्रातकोलाहलः पुरे ॥ नडागिरिं समारुह्य पालकः कुपितोथ तं ॥ वत्सेश्वरं ससारैकस्तन् ज्ञात्वा वंतिकोब्रवीत् ॥
कोपनः पालकः शूरो मानो वत्सेश्वरश्च सः ॥ गच्छ गोपाल तद्युद्धं निवारय ममास्य च ॥ पितुर्नियोगादारुह्य सुग्रीवाख्यं तुरंगमं ॥
गोपालः प्रययौ तूर्णं ततो भ्रातुर्निवर्तने ॥ वत्सेश्वरोथ निबिडध्वांतनीलेनिशामुखे ॥ व्रजन् ररास भ्राजिष्णुतारहारां भूसूचि
तः ॥ अथोज्जगाम ललनाकपोल्लसद्रश्मिद्युतिः ॥ रजनीराजतनयाकर्पूरतिलकः शशी ॥ मुष्टिग्राह्ये निशाकांत कांतिपूरे प्रस
र्पति ॥ अकस्माद्वज्रनिर्घोषभज्यमानेव भूरभूत् ॥ कल्पांतोद्भ्रांतचंडीशलडडमरुकोड्डरान् ॥ आषाढकः समाकर्ण्य शब्दान्
राजानमभ्यधात् ॥ एष देव महामेघघोरघोषो नडागिरिः ॥ मेघसंसर्गमलिनः स्फुरद्विपद्वापरः ॥ तदाज्ञया विना नैवं मम
सास्वपदस्थितिः ॥ इतीवागस्त्यमन्वेष्टुमायातो विंध्यभूधरः ॥ सिंदूरपूरारुणितं घंटाभ्यां तद्वपुर्बभौ ॥ उदयास्तस्थितार्केंदु
बिंबं साध्यमिवांबरं ॥ करेण दंतमुसलच्छायाशुभ्रेण शोभितः ॥ सेवानुषेव शेषेण मापीडय महीमिति ॥ मा कदाचिद्धि साका
रकरं तारापतिं हरेत् ॥ इति नक्षत्रमालाभिः सेव्यमान इवानिशं ॥ स पालकेन कृतिना युद्धसज्जेन कुंजरः ॥ प्रेरितोपि विकोपो
भूद्दृष्ट्वा भद्रवतीं पुरः ॥ आकर्णाचितकोदंडमंडलोच्चंडसायकः ॥ आलोक्य भगिनीमग्रे विररामच पालकः ॥ राजापि निर्दयोद्य

धन्वाधैर्यनिधिर्युधि॥चिच्छेदपालकस्याशुखड्गतोमरकार्मुकं॥खड्गखंडैर्निपतितैस्तस्यसंग्रामभूरभूत॥जयश्रीरतिश
य्येवकीर्णाकर्णोत्पलछदैः॥अत्रांतरेसमभ्येत्यगोपालोजवनैर्हयैः॥निनायस्वपुरीमेवपालकंपितुराज्ञया॥निवृत्तेरा
जपुत्रेथनडागिरिवलोत्कटे॥द्रुतंयातिचवत्सेशेप्रययौयामिनीशनैः॥अन्येद्युरथमध्यान्हेप्रचंडकिरणेरवौ॥तृष्णा
र्ताकरिणीत्याहनृपमाषाढकोवने॥ततस्तडागमासाद्यपीत्वाभद्रवतीजलं॥विषदूषितमाकंठमवतीर्णनृपायतत्॥अहं
मायावतीनामविद्याधरवधूर्नृप॥त्वत्सेवयामुक्तशापाभविष्याम्युपकारिणी॥भाविनस्तवपुत्रस्यसर्वविद्याधरप्रभो
रितिपंचत्वमापन्नाप्राहभद्रवतीदिवः॥ततोवसंतकेनाशुसमाहूयपुलिंदकं॥तत्पुरींप्रययौराजाहत्वादस्युगणंपथि॥योगं
धरायणोनाथनिजवेषवतानृपः॥ननंदसंगतस्तत्रसहवासवदत्तया॥अभ्येत्यतिसमादायरत्नानिवरकुंजरान्॥गोपा
लस्त्वद्विवाहेथविसृष्टोवंतिभूभुजा॥इतिपांथवणिग्वाक्यात्ज्ञात्वाराजाप्रियासखः॥विसृज्यदूतान्स्वपुरींस्वसैन्याय
व्यलंबत॥किंचिन्मनोविनोदायकथयेत्यथसादरं॥विवाहोत्सुकयादेव्यापृष्टःप्राहवसंतकः॥अभवत्ताम्रलिप्तायांध
नगुप्ताभिधोवणिक्॥ब्राह्मणान्पुत्रकामोसावपृच्छत्तेप्यथोचिरे॥एकपुत्रःपुराराजासोमकोयागपावके॥जंतुंनामस्त
तंहुत्वापुत्राणांशतमाप्तवान्॥इतिश्रुत्वास्तपुत्रेष्ट्यापुत्रंप्रापकुलोचितं॥गुहसेनाभिधोयस्यकंदर्पोलज्जतेपुरः॥ध
नगुप्तोथकालेनसस्तसोरत्नविक्रयी॥समुद्रयानपात्रेणप्रययौधनदोपमः॥वणिजोधर्मपुत्रस्यतत्रवर्घरवासिनः
अयाचतस्वपुत्रायकन्यांलावण्यशालिनीं॥दूरदेशोप्रियापत्यःपितातांनददौभिया॥वणिक्पुत्रंसमालोक्यसा
तद्रूपाभिलाषिणी॥सख्यावेदितवृत्तोतान्तद्गृहमगमत्स्वयं॥देवस्मिताभिधानंतामादायस्वयमागतां॥ताम्रलिप्तांस
मभ्येत्यपुत्रस्योद्वाहमादधे॥धनगुप्तस्ततस्तन्व्यालोलसारंगनेत्रया॥संगतोनंगसुभगःसुधासिक्तइवाभवत्॥काले
नत्रिदिवंयातेधनगुप्तेथतत्सुते॥प्रतिष्ठांप्राप्ययात्रायांचक्रेबंधुगिराधियं॥उद्यतःसततोगंतुंसमृद्धधनवृद्धये॥विवे
शावल्लभांप्रष्टुंवियोगभयकातरां॥दोलाविलोलहृदयस्तांपप्रच्छचिरंदशा॥रागोनिर्भरतामेतिविरहेहिभविष्यति॥
थियास्कंदयितंज्ञात्वासावदत्सांजनाश्रुतिः॥प्रौढाप्रावृडिवश्यामाश्यामीकृतपयोधरा॥ध्रुवंसौभाग्यमेजर्यस्त्वांसोदर्यस √ १५

रद्रुमं॥दृढबद्धकशिष्यंतिदिगंतेषुमृगीदृशः॥इतिप्रणयिनीवाक्यंसनिशम्यस्मराकुलः॥स्वप्नेददर्शवरदंसभार्यःपार्वती
पतिं॥वियोगेरतिमन्यत्रयुवयोर्यःप्रयास्यति॥शोषमेष्यतितद्दत्तंहस्तेनस्येदमंबुजं॥इतिरक्तांबुजयुगंस्वप्नेनाभ्यांददौ
शिवः॥तदादायप्रबुद्धौचदंपतीतौननंदतुः॥ततोयातःप्रशस्तेन्हिदिगंतंसचिवैःसह॥कटाहद्वीपमासाद्यतस्थौबहुलवि
क्रयः॥वणिग्भिःसंगतस्तत्रतत्रस्थैर्मधुमोहितः॥पृष्टोरक्तांबुजंदृष्ट्वातत्कथामब्रवीत्वसः॥युवानस्तस्यतेज्ञात्वाप्रि
यांदेवस्मिताभिधां॥गूढाययुस्ताम्रलिप्तांपापास्तत्संगमाशया॥तद्गृहान्वेषणपरास्तेथभ्रांत्वाखिलांपुरीं॥तापसीं
विजनेप्रापुर्वृद्धांयोगकरंडिकां॥तयासंजातविश्वासानिजागमनकारणं॥निवेद्यतस्मैकामार्तास्थिरंतस्थुस्तदाश्रमे॥देव
स्मितार्थिनांतेषांसाहाय्येप्रतिपन्नधीः॥मंत्रप्रयोगकुशलातानुवाचाथतापसी॥गुहसेनस्यदयितांनामहंभवतांवशे।
करिष्याम्यस्तिमेशिष्यासर्ववंचनशालिनी॥साहिसिद्धिकरीनामपुरादेशांतरागतं॥मंत्रज्ञावशगंचक्रेवणिजंचालिता
भिधं॥तस्यभूरिधनंहृत्वामणिकांचनमौक्तिकं॥प्रययौबुद्धियोगेनसर्वसर्वस्वहारिणी॥धनभारान्तांमार्गेहंतुकामोथ
भीषणः॥दस्युःश्वपाकोविजनेशनैरनुससारतां॥क्रूरंतमागतंदृष्ट्वासाप्रोवाचधनार्थिनं॥भर्त्रानिरस्ताक्रुद्धेनप्राप्ताहं
शरणार्थिनी॥अस्मिन्न्यग्रोधविटपेसज्जीकुरुकृपानिधे॥पाशंनिःशेषशोकाग्निशांतयेप्रणयादिति॥अयलोपनतं
दृष्ट्वाश्वपाकस्तद्धनंबहु॥तूर्णंनिधायदक्षाग्रेपाशंतामभ्यभाषत॥सज्जीकृतोमयामानःक्षिप्रमारुह्यतामिति॥सा
ब्रवीन्ममशिक्षायैदर्शयारोहणंसखे॥इतितद्वचसामूढोललंबेद्रविणाशया॥कंठेतदुपदेशायपाशोत्कलास्फवेष्टितं॥
इत्थंविधायतांकंठेतूर्णंनमितिवादिनं॥पादेनसाचकर्षाशुसचाकृष्टोभवद्यसुः॥श्वपाकमितिहत्वासाप्रस्थितैकाकिनी
पथि॥पालितानुचरेर्दृष्टाक्रुद्धैर्द्रविणहारिणी॥सातान्दृष्ट्वासमारुह्यवृक्षंतस्थौलतांतरे॥तन्मध्यादधिरुह्यैकःशान
केशससादतां॥साब्रवीत्साभिलाषाहंत्वय्येवसततंविभो॥धनंत्वदर्थमेवेदंशापथंकुरुचुंबने॥इत्युक्त्वावदनंवक्त्रेनिवेश्य
दशनैःशनैः॥जिव्हांचिच्छेदसातस्यललल्लेतिराविणः॥ततोनिपतितेतस्मिन्रक्तक्षीविनिभूतले॥ग्रहग्रस्तोयमित्यु
क्त्वाशेषास्तेदुद्रुवुर्भयात्॥इतितद्वचनावासंधन्यंमह्यंन्यवेदयत्॥साशिष्याविश्वविश्वाससद्मसद्ममहाशया॥समा

गतैव सामन्येमम साहाय्यकारिणी॥ देवस्मितासंगमं बोलीलयैव विधास्यति॥ तस्यामित्युक्तवत्यां सा सह साभ्यागयौ कुटीं
॥ शिष्यां सिद्धिकरीं तां च दृष्ट्वा सर्वे ववंदिरे॥ ततो विदितवृत्तां तां कृत्वा योगकरंडिका॥ शिष्यां देवस्मितागेहं नयैव सहिता ययौ
॥ गुहसेनगृहं प्राप्य द्वारपालमुपेत्य सा॥ कं वेजग्राह सौ क्कं वं कृत्वा कपटसंभ्रमं॥ त्वं मे जन्मांतरस्वसृ हन्नेत्राभ्यां विनिवेदितः
॥ इत्युक्त्वा मोदकां स्तस्मै दत्वा तद्वच सा विशत्॥ गुहसेनजनन्याथ पूजिता मध्यमंदिरे॥ प्रविश्य विरहक्षामां प्राप देवस्मितां
सखीं॥ अदृष्टां भास्करेणापि दृष्ट्वा तां गुप्तमंदिरे॥ प्रणतां विविधाशीर्भिरभिनंद्याश्रमं ययौ॥ अन्येद्युर्मांससंशाकलं प्रभूत
मरिचं करे॥ कृत्वा सशिष्या प्रययौ पुनर्देवस्मितांतिके॥ दत्वा मरिचमांसेन कृत्वा वेश्मागता शुनी॥ पूजितासन पुष्पाद्यैः
सशिष्या समुपाविशत्॥ अथाश्रुवर्षिणीं दृष्ट्वा शुनीं मरिचतापितां॥ रुरोद तापसी तां च साप्यप्रच्छ वणिक्वधूः॥ ता
पसी प्राह पृष्टाथ पुत्रि जन्मांतरे मम॥ पतिव्रता सपत्नीयं बभूवाति प्रियाशुनी॥ अहमेषा च विप्रस्य भार्ये देशांतरस्थि
ते॥ लावण्ययौवनेपि ते प्राप्ते निर्देश्यतां पुरा॥ अहं नवनवोदारवल्लुभाक्कभगा भवं॥ इयमासीच्च सततं सती नियम
दुर्भगा॥ मन्यामहे न हि वयं पापीयो समतः परं॥ सन्निरुद्धेंद्रियो मोहात्त्वतंत्रं शोषयेन्मनः॥ निरर्गलेंद्रियग्राम नि
त्यनव्योपभोगिनी॥ अहं योगिपदं प्राप्ता सा सर्वजनकामिनी॥ भक्त्या च मे सपत्नीयं पुत्रि जातिस्मरा शुनी॥ तिर्यग्भा
वमनुप्राप्ता साध्वी संयमदूषिता॥ सैषा चिरेण मां दृष्ट्वा रोदिति स्मृतवल्लुभा॥ श्रुत्वेति तापसी वाक्यं निनिंद मनसा सती
॥ किल्बिषं मानसगतं तत्स्याद्रष्टुं समुद्यता॥ साब्रवीद्यदि धर्मोयं कं चिदानय मे प्रियं॥ इति देवस्मितावाक्यं श्रुत्वा यो
गकरंडिका॥ प्राहाश्रमे मे चत्वारो युवानो वणिजः स्थिताः॥ सहमोदिष्यसे तैस्त्वमित्युक्त्वा तत्कृते ययौ॥ देवस्मिता
प्यनुचरीं बभाषे कोपकंपिता॥ ध्रुवं देशांतरस्थेन मद्भर्त्रा वणिजां पुरः॥ कथिता मधुमत्तेन मत्कथा पद्मकौतुके॥ त
एव नूनं वणिजः तस्मिंस्तत्र चिरास्थिते॥ मदर्थमागतास्तेषां करिष्यामि यथोचितं॥ इत्युक्त्वा शुनिभां कृत्वा दासीं
निजपदे व्यधात्॥ ततो वणिजमानीय तापसी रत्नभूषितं॥ निसि सिद्धिकरीवेषं ययौ विन्यस्य तद्गृहे॥ सप्रवि २६
श्य निजं रूपमास्थाय स्मरमोहितः॥ दासीं देवस्मितावेषां नन्नंद प्राप्य सुंदरीं॥ ततोथ धत्तूरकोपेतं पीत्वा मधु तदाहृतं॥

बभूव स्रस्तवसनः काष्ठलोष्ठसमाकृतिः॥ निश्चेष्टं तं समादाय गृहीताभरणांबराः॥ अंकयित्वाश्वपादेन चिक्षिपुः कर्दमे स्त्रि
यः॥ प्रभाते प्रतिबुद्धोथ पादिकाच्छादितालिकः॥ गत्वापरानुवाचाहं हतो दस्युगणैरिति॥ इतिक्रमेण तेनैव सर्वेनेश्वपदांकि
ताः॥ स्वदेशं प्रययुर्गूढानिंदंतो निजदुष्कृतं॥ तेनैव मधुनामत्तां कृत्वा योगकरंडिकां॥ कर्णनासाविरहितां तच्छिष्यां च वणिग्व
धूः॥ प्रतस्थे च सा श्वश्रू गुहसेनाश्रितां दिशं॥ मा कदाचिन्ममवरं हन्युस्ते लज्जिता इति॥ व्रजंती प्राह सा श्वश्रूं गत्वा रक्षाम्य
हं प्रियं॥ शक्तिमत्याय यथा पूर्वं परित्रातः पतिर्धिया॥ मणिभद्रालये पूर्वं निरुद्धो दंडवासिना॥ वणिक्सा गरदत्ताख्यो जारः सह
परस्त्रिया॥ वध्यं विज्ञाय तज्जाया तस्य शक्तिमती सती॥ प्रविश्य पूजाव्याजेन निशि तस्यौ स कृतालये॥ ताम साध्वीं प्रियो भर्तु
र्निजाभरणवाससा॥ आत्मतुल्यां विधायाशु विससर्जाह्नियाननां॥ मिथ्याबद्धोयमित्युक्त्वा कुपितो दंडवासिकं॥ बबंधेति पुरा
सत्या रक्षितः सा ह सा त्यतिः॥ गत्वाहमपि भर्तारं रक्षामि त्यभिधाय सा॥ व्याजिज्ञपत्पुरः पत्युर्दासा मे हारिता इति॥ गृहाण ता
न्सभामध्ये विचिंत्य स कलंजनं॥ इति राज्ञा समादिष्टा तान्जग्राह धृतांबरान्॥ मयांकिताः श्वापदेन प्रतिज्ञायेति संसदि॥
तच्छिरः पट्टमुद्धाट्य सा प्रत्यक्षम दर्शयत्॥ ततो विदितवृत्तेन तस्यै दत्ता महीभुजा॥ वणिजो मोचितादास्याद्भूते न निजबंधु
भिः॥ इति भूरिधनं लब्ध्वा गुहसेनमवाप्य च॥ ताम्रलिप्तां समभ्येत्य सानंदच्चिरं सती॥ ॥ देवस्मिताख्यायिका॥ ॥
वसंतकेन कथितं निशम्येदं नृपात्मजा॥ ननंद साध्वीचरितैस्तुष्यत्येव सतीमनः॥ अत्रांतरे प्रतीहारो महासेन पहीपतेः॥ व
त्सेश्वरं समभ्येत्य समासीनं व्यजिज्ञपत्॥ देवचंडमहासेन समादिष्टः समेष्यति॥ गोपालकस्त्वद्विवाहयोग्य रत्नाश्वसंपदा
॥ श्रुत्वेति हृष्टः सेनानी सज्जीकृतबलांबुधिः॥ राजाविवेशा कौशांबीं कौतुकाकुलिताननः॥ अथ गोपालके प्राप्ते प्रवृत्ते च
महोत्सवे॥ विवाहवसुधां राजा देव्या सह समाविशत्॥ नयोर्बभौ विवाहश्रीः कुसुमायुधजीविनी॥ प्रनृत्त संहृष्ट गणा पु
नरीश्वरयोरिव॥ देवीप्रदक्षिणावृत्ततारहाराररा जसा॥ सुधाकल्लोलकलिता कमलेव नवोदिता॥ सा भेजे कीर्णकर्पू
रपूरस्मेरांबरोज्वला॥ क्षीरक्षालितबिंबस्य चंद्रस्येव स्मितच्छटा॥ विक्षिप्तलाजकुसुमा सा विवाहमही बभौ॥ देवीमुख
शशिप्रीत्या नक्षत्रैरिव सेविता॥ संपूर्णोद्वाहसुभगे नृपे मंत्रिचमूपती॥ समस्तजनसत्कारे तस्थतुः प्रभुशासनात्॥ नुमण्वान

मथोवाचध्यात्वायौगंधरायणः॥ विनियुक्तोनृपेणावांदुष्करेवतकर्मणि॥ कोहिभोजनसन्मानैरावाललनंजनं॥ समर्थः
संमुखीकर्तुमस्मिन्राजमहोत्सवे॥ भोजनेयातिविपुलंकोपंबालोप्यपूजितः॥ अवमानरुषापूर्वंकृतंबालेनकौतुकं॥ देव
सेनाग्रहारेभूद्रुद्रशर्माभिधोद्विजः॥ विनष्टकाख्यस्तस्यासीन्मात्राहीनः कृशः सुतः॥ अपरातस्यजननीनिरादरधिया
सदा॥ स्वल्पशीर्णरसंचक्रेस्नेहाच्छादनभोजनं॥ स्वपुत्रपोषणरतांक्रूरांतांवीक्ष्यबालकः॥ कदाचित्प्राहपितरंद्वितीयोस्ति
पितामम॥ इत्यव्यक्ताक्षरंवाचंश्रुत्वातस्याभवद्द्विजः॥ शंकितोनिजदारेषुसहसाभ्रुकुटीमुखः॥ ततर्वसततंबालेब्रु
वाणेपरिवर्जिता॥ भर्त्रातंदारकंप्राहरहःसाभृशदुःखिता॥ स्वस्कृताभ्यधिकस्त्वंमेकिंलयाकोपितःपिता॥ इतिश्रुत्वा
ब्रवीद्बालःकुद्धोस्वल्पाशनादिति॥ प्रसादितोथप्रणयानूतयापितरमागतं॥ निर्दिश्यदर्पणेप्राहद्वितीयोयंपितामम॥
श्रुत्वेतिप्रत्ययंप्राप्यरुद्रशर्माधृतिंययौ॥ इत्यसंमानितःकोपंयातिबालोपिभोजने॥ ॥विनष्टकाख्यायिका॥ ॥
इत्युक्त्वाभूमिपालानांनानादेशनिवासिनां॥ पौराणांचव्यधात्पूजांविवाहोत्सवसंगिनां॥ वत्सेश्वरंसमामंत्र्यगोपालेशास
नासितुः॥ प्रयातेस्वपुरींराजाविजहारप्रियासखः॥ ततोरागांकुरोदारःकटाक्षनवपल्लवः॥ विलासहासकुसुमोदेव्याःस्म
रतरुर्बभौ॥ गूढंरमतिकिंकामीराजारजकिकारतः॥ इतिगोत्रापराधेषुसाभ्रुवाणारुषंययौ॥ अयंनरेंद्रस्यशरीरतुल्यउ
ड्डीविकाचंचुरचक्रवर्ती॥ उक्तेतिदासीभिरनंगदूतंवसंतकंभूमिपतेर्बबंध॥ साकुलायत्स्थविरचितानापसीतांविदग्धा
तैस्तैःछेकप्रणयवचनैस्त्यक्तरोषांविधाय॥ शश्वत्केस्वयमविरलसत्प्रेमकंठावलंबांलक्ष्मीमिंदोरिवजलधरच्छेदलब्धप्र
सादां॥ देवीततःस्मितविभक्तकपोलकांतिर्मुक्त्वावसंतकमथास्तरुषंचकार॥ राजानंदचतदाननपद्मभंगःकोपप्र
सादकृतभंगोरतयेहिकामः॥ ॥इतिव्यासदासापराख्यक्षेमेंद्रविरचितायांबृहत्कथायांकथामुखंनामद्वितीयोलंभ
कः॥ ॥उदयनकथायांवासवदत्ताविवाहश्च॥ ॥अतःपरंलाबानकोभविष्यति॥ ॥सानंदनंदिहतपु
ष्करविभ्रमाणिहेरंबकंठरसितानिचिरंजयंति॥ कुर्वंतियन्निघनशंकिकुमारबर्हिनृत्यैर्विचित्ररुचिभांजिदिगंतरा
णिततःप्रियतमांकेलिविलासरसतत्परः॥ शनैर्बभूववत्सेशःप्रजाकार्यपराङ्मुखः॥ रुमण्वानमथाहूयनिशियौगंध १७

रायणः॥ अचिंतयन्नृपहितंमंत्रमूलाहिसंपदः॥ सोब्रवीदेषनृपतिर्हतोमकरकेतुना॥ नपश्यतिनिजांलक्ष्मींनिपातभय
दुस्थितां॥ मदमंथरसंचाराविलासालसदर्शिनः॥ सत्यंस्मरेणबध्यंतेराजानःकुंजराइव॥ कीर्तयःकुरुतेनेवव्यसने
नेवबुद्धयः॥ सहसैवविनश्यंतिदुर्नयेननृपश्रियः॥ महासेनाभिधोराजापुराशत्रुवसंगतः॥ शोकाग्निनादह्यमानोगुल्म
व्याधिमवाप्तवान्॥ तंमुमूर्षुंगतच्छायंदृष्ट्वापरहिताभिधः॥ वैद्यःकुंठक्रियाजालःसंदेहाकुलितोभवत्॥ सप्राहाभ्ये
त्यनृपतिंवल्लभातवपंचता॥ यातेतिवाक्यमाकर्ण्यभूपालोन्यपतद्भुवि॥ तस्यवेगान्निपतितःस्फुटितेगुल्मबंधने॥ शा
रीरमाययौस्वास्थ्यमितिसंसेवयुक्तयः॥ ॥परहिताख्यायिका॥ ॥युक्त्यैवनाशयिष्यामिनृपतेर्व्यसनामयं
॥मंत्रिभिःपरिरक्ष्यंतेसोन्मादाहिनरेश्वराः॥ मगधाधिपतेःपुत्रींयदिपद्मावतींनृपः॥ प्राप्नोत्यस्मत्प्रयत्नेनतद्दैषानः
सहायता॥ चक्रवर्तिवधूःसाहिभाविनीतिश्रुतंमया॥ श्रुत्वेतिमंत्रिवचनंसेनापतिरभाषत॥ नहिवासवदत्तायांसक्ताया
स्मैमहीभुजे॥ ददातिमगधाधीशोयाचितोपिप्रियांसुतां॥ इत्याकर्ण्याब्रवीन्मंत्रीदग्धादेवीतिकृत्रिमं॥ कृत्वाप्रयोगंसावश्यं
लभ्यतेमगधात्मजा॥ श्रुत्वेतिसेनाधिपतिःप्राहसाहसशंकितः॥ कथंनुसहतेराजादग्धादेवीतिदुर्वचः॥ वियोज्यतेनृ
पोदेव्यायदेतच्छमलंघनं॥ संशयायवियोगोहियूनोर्बद्धानुरागयोः॥ विशाखिलेनवणिजामथुरावासिनापुरा॥ वहिल्ल
काख्यःसचिवोविसृष्टोरत्नविक्रये॥ तेनादिष्टःसनिपुणोयुक्तानिर्धनार्जने॥ ययौप्रियांसमामंत्र्यसंस्तभ्यविरहव्यथां॥
सापितस्मिन्गतेद्वारकपाटालंबिनीचिरं॥ तद्वर्त्मवीक्ष्यशनकैर्बभूवगतजीविता॥ निर्वर्तितोथतद्भ्रात्रासदृष्ट्वातांतथा
गतां॥ सोपिव्यसृजदेवंदुःसहोविरहानलः॥ ॥वहिल्लकाख्यायिका॥ ॥सत्यमभ्युदयायैतत्किंतुमह्यंनरोचते॥
अन्यद्विधत्तेपुरुषःकरोतिविधिरन्यथा॥ देवसेनाभिधोराजास्त्रावंत्यामभवत्पुरा॥ सकदाचित्सभासीनोविज्ञप्तोमंत्रि
णाभयात्॥ देवास्तियौवनवतीतनयाममरूपिणी॥ उन्मादिनीतिसत्याख्यासृष्टेवस्मरजीविनी॥ तवयोग्येत्यनावे
द्यनदत्तासौमयाक्वचित्॥ श्रुत्वेतितद्वचोराजाद्रष्टुंतांप्राहिणोद्द्विजान्॥ विलोक्योन्मादिनींविप्राःस्मरोन्मादवशीकृतां
अनयासंगतोराजाध्रुवंराज्याद्विनंक्ष्यति॥ चिंत्येतिनृपंप्राहुःकन्यादुर्लक्षणेतिते॥ तद्वाक्याद्विमुखेराज्ञिसेनापति

बृ॰ था रवापतां॥ यातिकालेसभूपालोहर्म्यस्थांकुंजरस्थितः॥ ददर्शकोंतितटिनींतामेवोत्पललोचनां॥ निरीक्ष्यलोचनसुधांचित्तकैरव
कौमुदीं॥ ससंतप्तोभवत्सत्यंविपरीतगतिस्मरः॥ दशमींमन्मथावस्थामीयुषिक्ष्मापतौदिने॥ सेनानीर्ज्ञातवृत्तांतस्तमुवाचततो रहः
१८ ॥ ममदेवधनंदाराप्राणाश्चकिमतःपरं॥ सर्वमेतत्त्वयादत्तंगृहाणोन्मादिनींप्रभो॥ नृपःश्रुत्वेतितद्वाक्यंजगादपरस्त्रियं॥ लोक
स्थितौहिराजानःप्रमाणंधर्मसेतवः॥ सुरालयेविधास्यामिनर्तकींतांततोभज॥ इतिसेनापतिवचःश्रुत्वाकोपाकुलोभवत्॥ भार्या
मदोषांसंत्यक्तुंनार्हसीत्यरुणेक्षणः॥ इतिनिर्भर्त्स्यतंभूभृद्भूद्विचलाशयः॥ सविसृज्यचभूपालंस्मरसंतापमूर्छितः॥ त्याजितो
जीवितंराजामन्मथेनप्रमाथिना॥ ॥देवसेनाख्यायिका॥ ॥पुरोविवेशभिक्षार्थंकस्यचिद्वणिजोगृहान्॥ परिव्राट्संयतोमौ
नीकिंचिन्मीलितलोचनः॥ भिक्षादानोद्यतकरांसददर्शवणिक्सुतां॥ कल्पितामिवकामेनमनःसारंगवागुरां॥ तांदृष्ट्वामन्मथा
विष्टस्यक्त्वामौनमनन्यधीः॥ हाकष्टंकष्टमित्याहतच्छ्रुत्वानिर्ययौवणिक्॥ सोब्रवीत्कौतुकाविष्टोभगवन्सहसैवकिं॥ परित्यक्तं
त्वयामौनमितिपृष्टोब्रवीच्चसः॥ दुर्भगातवकन्येयंशरीरधनहारिणी॥ त्यजैनांनिशिगंगायांमंजूषस्थांपिधानके॥ मूर्ध्निप्र
दीपंविन्यस्यततस्त्वंमोक्ष्यसेभयात्॥ इत्युक्त्वास्वाश्रमंप्रायासरिव्राड्मदनातुरः॥ दीपांकितेथमंजूषेतांन्यस्तांवणिजा
भयात्॥ गंगाकूलस्थितःप्रापकोपिराजकुमारकः॥ तांप्राप्यराजतनयोधीमान्सततकोपनं॥ मंजूषेवानरंकृत्वाययौवि
श्रमतयासह॥ अत्रांतरेनिजाञ्शिष्यान्परिव्राडवदल्लघु॥ गंगामन्विष्यमंजूषांतूर्णमानीयनामिति॥ तैराहृतांतमादाय
सकन्यारतलंपटः॥ तान्प्राहोक्तंठितोवांछन्पातुंनिर्मक्षिकंमधु॥ युष्माभिर्नप्रवेष्टव्यंश्रुत्वापिरवमत्रमे॥ इत्युक्त्वार्ग
लितंद्वारंविवेशैकोनिजांकुटीं॥ उद्घाटितेथमंजूषेक्रुद्धोनिर्गत्यवानरः॥ कर्णनासाविरहितंतंचकारस्मरातुरं॥ कपिच्छि
कारमिश्रेणतस्यहाहारवेणते॥ नाश्रमंविविशुःशिष्यास्तदाज्ञाभंगभीरवः॥ ततस्तच्चरितंज्ञात्वाजहासस्फुचिरंजनः॥ इति
दैवगतिश्चित्रापुरुषेणनलंघ्यते॥ ॥परिव्राडाख्यायिका॥ ॥सेनापतेरितिश्रुत्वाप्राहयौगंधरायणः॥ किमेतच्छं
कसेमिथ्यावत्सेशःश्रियमेष्यति॥ नहिदाशरथीरामोजानकीजानकीविरहस्पुरा॥ प्रयातःपंचतांधीरोदशकंठकुलांतकः॥
अमात्ययुक्तिभिर्भूयःप्राप्नुवंत्येवसंपदं॥ सन्मंत्रिणोहिभूपानांश्रीरक्षापरिखाचलाः॥ पुण्यसेनाभिधोराजानिरुद्धेविषये १८

Dr. BHAU DAJI

पुरा॥ शत्रुभिर्मंत्रिणांबुध्यागूढमिथ्यामृतःकृतः॥ तंविज्ञाययशःशेषंहृष्टास्तस्यततोरयः॥ विसृष्टसेनानिःशंकास्तद
मात्यैर्धियाहताः॥ पुण्यसेनाख्यायिका॥ ॥मंत्रयित्वेतिविस्रब्धंबहुयौगंधरायणः॥ गोपालमानिनायाशुस्वपुरींनृप
सेवने॥ कृत्वाविदितवृत्तांतंतंनरेंद्रहितेरतं॥ कूटवासवदत्तायादाहेनिश्चयमाप्तवान्॥ सलावानकयात्रायांकृत्वाभूपति
मुत्सुकं॥ देवींचज्ञायतेकेनचरितंप्रौढमंत्रिणां॥ अत्रांतरेनरपतौसर्वास्थानसभाश्रिते॥ विवेशनारदःश्रीमान्दीप्तपिं
जरितांबरः॥ प्रणम्यपूजितोराज्ञासहवासवदत्तया॥ देवर्षिरभ्यधाद्दिक्षुकिरन्दशनचंद्रिकाः॥ त्वांचवासवदत्तांचदृष्ट्वारा
जीवलोचनः॥ स्मरामिपांडुपुत्रस्यकृष्णायाश्चमृगीदृशः॥ वृत्तांतंकथितंतस्यमयासुंदोपसुंदयोः॥ रक्षिताभ्रातृजंभेदं
द्रौपदीवरणेपुरा॥ सुंदोपसुंदावसुरावभूतांवनिलौपुरा॥ निदाघीकृतहेमंतौदिवापिकृतचंद्रिकौ॥ तत्पराक्रमविध्वस्तै
र्देवैरभ्यर्थितस्ततः॥ वेधाविनिर्ममेकांतांसुरनारींतिलोत्तमां॥ तिलशोनिर्मितातेनसाचविभ्रमशालिनी॥ मत्तालिकोकि
लेकालेविजहारतयोःपुरः॥ तांदृष्ट्वापृथुलश्रोणिंपवनोत्तालिकांशुकां॥ ममैवेयंममैवेयमितितौभेदमापतुः॥ ततस्तौ
समरोत्तालभुजद्वितयशालिनौ॥ कृतांतातिथितांयातावितिभेदोविपत्तये॥ इत्युक्त्वानारदोदेवींविलोक्यप्रणतांनरः॥ वि
द्याधरेंद्रजननीभाविनीसाहसारधीः॥ तिरोहितेततस्तस्मिन्राजालावानकंययौ॥ सेनापिहितदिक्चक्रःसहवासवदत्तया
॥ आसन्नंवत्सनृपतिंज्ञात्वादूतेनमागधः॥ शंकयासनृपस्तस्थौयंत्रदुर्गबलोद्यमैः॥ वत्सराजोपिदयितासंभोगामृतनि
र्भरः॥ लावानकपुरोद्यानेविजहारस्मरोपमः॥ अथतस्मिन्मृगरणक्रीडायैविपिनंगते॥ यौगंधरायणोभ्येत्यसार्धंगो
पालकादिभिः॥ कृत्वाज्ञातकथांदेवींप्राणैःपत्युर्हितैषिणीं॥ गूढंवसंतकोपेतांनिधायमगधान्क्षणात्॥ तस्ययोगेन
तरुणीसाभवद्ब्राह्मणीतदा॥ वसंतकःकाणवटुःस्वयंवृद्धद्विजश्चसः॥ तेषुयातेषुमगधान्गोपालोपिरुमण्वता॥ स
ह्लावानकंदग्धागूढमंत्रधरोभवत्॥ मंत्रीवृद्धद्विजाकारःप्रविश्यमगधापतेः॥ कन्यकांतःपुरंप्रापप्राहपद्मावतींशनैः॥
राजपुत्रिसुतेयंमेतरुणीतनयोप्ययं॥ अन्वेष्टुमस्यागच्छामिचिरविप्रोषितंपतिं॥ निक्षिप्तेयंत्वयिमयासुतश्चायंप्रि
यंवदः॥ इत्युक्त्वाप्रययौमंत्रीतथेत्यभिहितस्तया॥ साचपद्मावतींदृष्ट्वातांचपद्मावतीमुहुः॥ परस्परमहोरूपमित्यसक्त

मवोचतां॥अवंतिकाभिधानांतांछन्नांवीक्ष्यद्विजात्मजां॥मागधीदेवतांमेने रूपलावण्यसौरभैः॥उवासछन्नयोगेन
मंदंयंतीनलप्रिया॥कृष्णापिपांडववधूस्तद्विधेयंभविष्यति॥ध्यात्वेत्युपचचारैनांप्रणतादेवतामिव॥ततःपद्मा
वतीमातातांदृष्ट्वाविस्मितावदत्॥कुंतिभोजस्यतनयापुरादुर्वाससंमुनिं॥आराध्यपितुरादेशाद्वापप्रवरंवरं॥
तस्मादावंतिकापुत्रिदिव्योचिततनुःसती॥यत्नादाराधनायेयंसत्से वाहिमहाफला॥इतिमातुर्वियोगेनतांसिषेवेनृ
पात्मजा॥मंदीकृतशुचंकिंचित्सहासबटुचेष्टितैः॥विरहानलसंतप्तामूर्छितापिमुहुर्मुहुः॥संकल्पोल्लिखितप्रेयो
दर्शनेनधृतिंययौ॥अत्रांतरेमृगक्रीडानिवृत्तोवत्सभूपतिः॥देवींलावाणकेदग्धामज्ञासीत्सवसंतकं॥श्रुत्वैवसपपाता
शुविस्फुटत्कटकोभुवि॥हारांशुनिर्भरस्मेरोवज्रलून इवाचलः॥तुषारचंदनजलैर्विबुद्धोविललापप्रियां॥तत्सपत्नीनि
भास्येवमुमोचालिंगितांमहीं॥ससमाश्वास्यमानोपियत्नाद्गोपालकादिभिः॥नाससाद धृतिंराजानयहीनइवश्रियं॥
विद्याधरेंद्रजननीभाविनीतिमुनेर्वचः॥स्मृत्वाधीरोभवत्किंचिदाशालंबनजीवितः॥गोपालमंत्रिणोदृष्ट्वामंदशोको
मुखत्विषा॥इंगितज्ञःशुचिंत्यक्त्वाविचारपरमाययौ॥किंचित्प्रतनुशोकेथविरहांतेमहीपतौ॥देवीदग्धेतिसंलापेदि
क्चक्रपरिसर्पिणि॥प्रद्योतोमागधाधीशोदूतेनाभ्यर्थ्यभूभुजे॥दातुंपद्मावतींमेछलार्थतामिवभूलिने॥प्रियांप्राप्स्य
सितस्मात्स्याश्रुत्वेतिसचिवान्नृपः॥अमन्यतनिजोद्वाहंविरहानलनिःसहः॥ततस्तुरगसैन्येनमगधांप्राप्यभूपतिः॥
विवाहवस्त्रधांभेजेराजपुत्र्यासहोचितां॥वह्निप्रदक्षिणेतत्रप्राहयौगंधरायणः॥प्रदत्तांदेहिमेवाचंपूर्वंदिग्विजये
विभो॥इतिमंत्रिगिरातेनवत्सराजजयंप्रति॥निबद्धेवचनेस्वैरंविवाहश्रीरवर्तत॥अवंतिकाविरचितांतिलकेमालि
कांतथा॥अम्लानांवीक्ष्यभूपालोवरयित्र्याधृतिंययौ॥धृवंजीवतिमेदेवीनान्योवेत्तितयाविना॥तिलकंमालिकांचे
दमितिध्यात्वाजहर्षसः॥पद्मामिवसमासाद्यततःसपुरुषोत्तमः॥पद्मावतींययौध्यायन्देवीमेवनिजांपुरीं॥प्रवि
श्यांतःपुरंतत्रनवबध्वापिसंगतः॥ननंदस्मरकांतांकामकेलिकुमुद्वतीं॥ततःप्रणयवादिन्यापद्मावत्याभ्यर्थि
था॥आवंतिकांशुकच्छिन्नरथेनानुसमाययौ॥गोपालांतःपुरंप्राप्तःततस्तांवत्सभूपतिः॥वल्लभांस्वांपरिज्ञायमुमोहवि

रहाकुलः॥राजानंविह्वलंदृष्ट्वादेवींचोत्तंभितांशुचं॥पापोस्मिकारणमितिप्राहयौगंधरायणः॥अथाश्रुकणसंदिग्धतार
हारस्तनस्थली॥उवाचदेवीनिश्वासग्लापिताधरपल्लवा॥आर्यपुत्रहितायैषानीर्णागूढमतिर्यथा॥स्वस्यास्त्विदानींत्वस्या
मिवन्हौदुःखालयांतनुं॥श्रुत्वेतिवचनंदेव्याःसहगोपालकादिभिः॥पद्मावतीचराजाचमंत्रीचरुरुदुःपृथक्॥धन्योसिवत्सनृप
तेमहेश्वरइवापरः॥यस्यवासवदत्तेयंसतीहृदयवल्लभा॥इत्याकाशभवावाणीसतीभावविशुद्धये॥उच्चचारनृपस्तांचश्रुत्वा
भूत्संमदाकुलः॥ततःप्रहृष्टापीयूषसिक्ताइवपरस्परं॥प्रशंसंतोमुमुदिरेतेवर्द्धितमहोत्सवाः॥देवीविलोचनछायानीलोत्प
लमधुप्रियं॥पद्मावतीस्मितस्मेरकुसुमांकंपयोनृपः॥॥ पद्मावतीविवाहः॥ ॥देव्योर्मध्येसभूपालोरतिप्रीत्योरिवस्मरः
॥विराजमानःप्रोवाचमहामात्यंकथांतरे॥वत्ससादृभवोयंमेहर्षःप्रीणातिमानसं॥वियोगदुःखप्रशमेप्रसीदतिसुखश्रियः
॥पुरापुरूरवानामराजाराज्ययशःशशी॥बभूवभूमिकंदर्पःशत्रुत्रासनभासनः॥सुरवारवधूरासीदुर्वशीतस्यवल्लभा
॥जातःशोकादिवापांडुर्येन्मुखाब्जितःशशी॥सकदाचित्सुरपुरीमारूढोदैत्यसंयुगे॥सहायःसुरराजस्यददर्शविजयोत्स
वं॥तत्रप्रनृत्ताःशक्रस्यपुरोवीक्ष्यसुरांगनाः॥जहासाभिनयछेदेवैदग्ध्यादुर्वशीप्रियः॥हासेनकुपितस्तस्यनाट्याचार्यो
हितुंबुरुः॥वियोगस्तेसहोर्वश्याभूयादितिशशापतं॥प्रार्थितःसुरराजेनसतच्छायांतमभ्यधात्॥पर्यटन्पृथिवीमेषउ
र्वशीविरहातुरः॥बदर्याश्रममासाद्यशापस्यांतमवाप्स्यति॥इत्युक्तोदुःखितःप्रायाद्राजधानींनिजांततः॥वियुक्तःस
तयादुःखीबभ्रामविवशोमहीं॥बदर्याश्रममासाद्यदुःसहंशापमत्यजत्॥उर्वश्यासंगतोराजाविजहारततःसुखी॥इतिदुः
खानलस्यांतेभवंतिसुखसंपदः॥ ॥उर्वश्याख्यायिका॥ ॥अवंतिराजतनयाश्रुत्वेतिनृपतेर्वचः॥विरहेनिधनंनास्मि
यातेत्यासीद्विलज्जिता॥वैलक्ष्यविनतांदेवींदृष्ट्वायौगंधरायणः॥धीमानुवाचराजानंयुक्तिज्ञःश्रूयतामिति॥राजाविहितसे
नाख्यःकंपिलायामभूत्पुरा॥तस्यतेजोवतीनामबभूवाभिमतावधूः॥सकदाचिज्ज्वराक्रांतोवारितोपिभिषग्वरैः॥नमुमोच
प्रियापार्श्वेतन्मुखन्यस्तलोचनः॥ततःसंमंत्र्यदुःखार्तोभिषग्भिःसहमंत्रिणः॥चक्रुर्मिथ्यामृतांदेवींगूढमारोग्यकांक्षिणः
तयाविरहितोराजादुःखितःस्वास्थ्यमाययौ॥मुक्तामयश्चतांप्रापस्मितमुक्तामयछविः॥सहंतेदुःखमप्येवंसाध्व्योभर्तृहितेरताः॥

यत्पुरप्युदयं कृत्वा जीविताऽलंबनं हृदि॥ ॥विहितारव्यायिका॥ ॥श्रुत्वेति मंत्रिवचनं राजा लज्जानतोऽभवत्॥ आ
यासितं मनो देव्याः किं मयेति विमर्षधीः॥ अहो सततदुःखाय कर्कशा मंत्रिवृत्तयः॥ निर्वेदमाययोऽध्यायन्निति यौगंधरा
यणः॥ रतिमानथ वत्सेशो मनोभव इवापरः॥ ननंद यौवनोद्याने देव्या मधुमहोत्सवे॥ वत्सराजप्रणयिनीं ज्ञात्वा दूतेन माग
धः॥ कृतां प्रेमपदं पत्युः सपत्न्याश्च धृतिं ययौ॥ संत्यक्तवटुवेषोऽथ हासयन्पूर्ववेष्टितैः॥ कथां वसंतकः पृष्टः प्राह देवीवि
नोदिनीं॥ अभवद्धर्मगुप्ताख्यो वणिक्पाटलिपुत्रके॥ तस्य सोमप्रभा नाम तनयाभूच्छुचिस्मिता॥ उवाच जातमात्रैव सा
स्फुटार्थपदाक्षरं॥ दातव्यास्मि न कस्मैचिद्विहितेति विद्योतितां नरा॥ गूढं पित्रा विनिहिता नास्ति पुत्रीति वादिना॥ सा प्राप यौव
नं काले वसंतमिव माधवी॥ तां शक्रोत्सवयात्रायां देवाद्दातायनस्थितां॥ गुहसेन कृतोपद्र्यद्गुरुचंद्राभिधो वणिक्॥ विलो
क्य मन्मथशरासंगजर्जरितस्मृतिः॥ सोऽभवद्दीर्घनिश्वासस्तत्स्वपवनैरिव॥ गुहसेनः कृतं दृष्ट्वा स्मरोन्मादवशीकृतं॥ य
याचे ज्ञातवृत्तां तो धर्मगुप्तकृतां स्वयं॥ न ददौ नास्ति पुत्रीति यादातां जनको भिया॥ तदातर्थे दसाहाय्ये वज्रे रत्नप्रदोन्न
यं॥ ततो राजबलाक्रांतो धर्मगुप्तः कृतां ददौ॥ स्यन्नौ न दूषणीयेयं नेत्याभाव्य भयाकुलः॥ वणिक्पुत्रः कृतोद्वाहः स्वजयां
ववसापितुः॥ तां स्नुषां मुद्यतोऽपश्यद्भीमभ्रुकुटिविभ्रमं॥ क्रोधोनाला गलिभ्रांता तया क्षिप्रं निपातितः॥ जनको गुहचंद्रस्य
भस्मीकृत इवाग्निना॥ ततस्तां सानुगे गेहे प्रोद्दामाग्निशिखामिव॥ नानुलोकेन पस्यर्शनानुमेने च सोऽनिशं॥ शत्रुसेनामिव
ध्यायन्वर्जयपन्नगीमिव॥ तां वणिक्तनयस्तस्थौ गृहदुःखानलाकुलः॥ ततः कदाचिद्दासाद्यमंत्रमभ्यागताद्द्विजात्॥
अतोषयद्व्रतपरः स हेतोर्हव्यवाहनं॥ अग्निर्जोदिव्यपुरुषो द्विजवेषधरो गृहे॥ क्षपामुवास भुक्त्वैकांतस्य वांछितसिद्धये॥
विधाय भ्रमराकारं तमात्मानं च स द्विजः॥ देवतासंगतां रात्रौ तस्य जायामदर्शयत्॥ ततो विप्रविनीर्णेन मंत्रेणास्याभवत्प्रिया
॥ सा निषिद्धान्यललनास्वयं कंठावलंबिनी॥ इत्येवं संगतो देव्या ननंद सतनयावणिक्॥ देवताभिर्भवंत्येव पत्नीनामिव संग
माः॥ ॥सोमप्रभाख्यायिका॥ ॥अवंतिराजतनये देवताभ्यां स्ववंदतः॥ त्वयाच पद्मवत्या च धन्यो वत्सनरेश्वरः॥ स्व
कृतैरेव सुकृतैरादशा प्राप्यते स्थितिः॥ शापदुःखभयक्लेशाः सत्यं नेतु विपर्यये॥ पुरा मार्जाररूपेण प्रियां शक्रेण धर्षितां॥ २०

अहल्यां गौतमो ज्ञात्वा प्रोवाच ज्ञानलोचनः॥ आश्रमं कः प्रविष्टो मे श्रुत्वेति प्राह तद्वधूः॥ मार्जार इत्यपभ्रंशगिरा जंभारिरागिणी
॥ इत्युक्तिकुपितस्याथ तस्य शापेन वृत्रहा॥ अभूद्भगसहस्रांकः शिला च मुनिकामिनी॥ तिलोत्तमां सहस्राक्षो दृष्ट्वाहल्या च राघवं
अवाप्स्यतः शापशांतिमित्याह मुनिपुंगवः॥ इत्यापदोऽभवंत्येवं महतामपि दुःकृतैः॥ वसंतकस्येति वचः श्रुत्वा देव्यो ननंदतुः॥ ॥
अहल्याख्यायिका॥ ॥ पद्मावतीमुखांभोजमधुपो नृपतिस्ततः॥ लला सावंतितनयावदनेंदुसुधांबुधिः॥ इत्थं विरहसंता
पतापितां गामुहुर्मुहुः॥ इदं मया कृतमिति प्रायावंतिसुताधृतिं॥ तनये प्रेयसः प्रेमप्रोद्दामालंबनं रते॥ आवंतिमागधौ ज्ञात्वा दू
तौ निर्वृतिमापतुः॥ कदाचिदथ राजानं सर्वास्थानसभागतं॥ व्यजिज्ञपन्नृद्विजोऽभ्येत्य प्रतीहारेण सूचितः॥ एकपुत्रस्य पुत्रो मे
देव गोपैर्मदाहतेः॥ अटव्यां निगृहीतोऽयमश्रुताक्रंदितो जनैः॥ राजास्मीत्याहितक्रीडः स दास्माभिः प्रणम्यते॥ वयमाज्ञाप
रास्तस्य स्वयं प्रभुपदे स्थितः॥ अयं यदृच्छयायातः प्रणनाम न तं द्विजः॥ ततोऽस्माभिस्तदादिष्टैर्निकृत्तचरणः कृतः॥ इति वा
क्यान्महीपाले किंचिदाकुंचितभ्रुवि॥ यौगंधरायणः प्राह विमृष्य क्षणविस्मितः॥ महता कारणेनात्र भवितव्यं नरेश्वर॥ स्व
यं तत्रैव गच्छामो यत्र गोपनृपस्थितः॥ इति मंत्रिगिरा राजा तुरंगारूढसैनिकः॥ गत्वाससाद विपुलामटवीं गोपधर्षितां॥
यौगंधरायणस्तत्र भुवमाघ्राय मंत्रवान्॥ खातं विधाय खनकैर्महानिधिमदर्शयत्॥ यक्षं नीलशिलाकारं पूजयित्वा ख
निस्थितं॥ यौधिष्ठिरं धनचयं सिंहासनमवाप च॥ पृथुरत्नासनं प्राप्य निधानं च नरेश्वरः॥ स्वयं प्रविश्य कौशांबीमादिदेशा महो
त्सवं॥ युधिष्ठिरस्य साम्राज्यविजयावाप्तमासनं॥ विलोकयन्नरपतिः प्राह यौगंधरायणं॥ इदं दिग्विजयावाप्तराजसूय
स्य भूपतेः॥ अनिर्जितदिगंतेन लंघ्यते कथमासनं॥ तौ प्रद्योतमहासेनौ तया युक्त्यैव वंचितौ॥ वशीकृतौ यन्न बलान्न दद्या
पि वुनोति मां॥ वत्सराजवचः श्रुत्वा माहामात्यो वदन्मुदा॥ यदास्य देव निखिलं सत्यमेतदसंशयं॥ देव पूर्वं दिशां पूर्वां जेतु
मा याहि संभृतः॥ दिशामेतां समाक्रम्य सर्वाशाभरणो रविः॥ हस्तिनापुरमादाय भव सर्वजयी नृप॥ जिता हि ककुभः स
र्वास्तत्र सैस्तसितामहैः॥ निशम्येति नृपः प्राह किं क्रमेण दिशां जये॥ विजयः सत्वसाराणामुत्साहेन हि कल्प्यते॥
श्रूयतां सत्वसारस्य कथेत्याभाष्य मंत्रिणं॥ देवी गोपालसेनानीः कृहृदाम ब्रवीत्पुरः॥ आदित्यसेन इत्याशीत्सार्वभौमो

महीपतिः॥ विभातिभुवनोद्याने फुल्लायत्कीर्तिमालती॥ नानादिगंतभूपालमौलिलालितशासनः॥ स्फुटस्फटिकसौ
धायामुज्जयिन्यामुवाससः॥ कुलीनसत्कुलोपांतनिलयोभ्येत्यतंस्वयं॥ कदाचिद्गुणवर्माख्यःसभासीनंव्यजिज्ञपत्॥
कन्यारत्नंममगृहेविद्यतेनयनामृतं॥ पात्रंत्वंदेवरत्नानांप्रमाणमधुनानृपः॥ उक्त्वेत्यदर्शयत्कन्यांदेहबद्धामिवद्युतिं
॥ विवाहिनाथतांभेजेराजाराजीवलोचनः॥ सापितेजोवतीनामसमासाद्यनरेश्वरं॥ जहारकांतिंरोहिण्यास्ता
रापतिसमागमे॥ तदाननसुधापानमदमंथरमानसः॥ नरात्रिंनदिवंमेनेसत्यंत्यक्तनृपक्रियः॥ आक्रंदितेनपौराणांमंत्रिणांव
चनेनच॥ भेजेसंमुखतांकिंचित्प्रजानांप्रत्यवेक्षणे॥ ततःकदाचिदुद्यानयात्रायांतुरगोत्तमं॥ आरुरोहसवेगलाङ्कुर्शंरविर
थादिव॥ सहयःपार्ष्णिसंस्पर्शरोषाद्व्योमपतन्निव॥ जवाज्जहारराजानमाप्रोथप्रसरत्खुरः॥ सहृतोश्वेनसहसाव्यसनेनेव
विप्लुतः॥ निशिविप्रमठोपांतमवापोद्भ्रांतमानसः॥ तत्रप्रतिश्रयाकांक्षीसनिषिद्धोमठद्विजैः॥ रात्रौश्मशानरक्षोयमितिवेद
जडात्मभिः॥ तेषामेकोमहासत्त्वःशूरोभिजनभूषणः॥ विदूषकाभिधोवह्निवरावाप्तासिदुःसहः॥ रत्नभ्राजिष्णुकटकंरा
जानंदीप्तकुंडलं॥ तंसिषेवेनिशिस्वैरंस्नानसन्मानभोजनैः॥ तस्योपचारमाचारनिधिःसोमन्यतामृतं॥ अत्याय्युपकृति
र्यातिविस्तारंविषमस्थितौ॥ ततःप्रभातेभूपालःप्रणम्यारुह्यवाजिनं॥ जातिस्मरंराजधानींययौवेगधुतांभुकः॥ तूर्णं
प्रत्यागतेराज्ञिकल्पितेनगरोत्सवे॥ देवीतेजोवतीकन्याम सूतकुलचंद्रिकां॥ अथसादरमाहूयनरनाथोविदूषकं॥ प्री
त्यापुरोहितंचक्रेददौग्रामान्मठायच॥ प्राप्यग्रामान्महीपालाद्दर्पोद्धास्तेमठद्विजाः॥ नानामताःस्वयंचक्रुःस्वाम्यंखल
विश्वंखलाः॥ अहंप्रभुरहंस्वामीममैवेदंममाखिलं॥ इतितेषांसमालापोबभूवग्रामलुंठने॥ उत्पादितेमठेतस्मिन्नुद्द
सैस्तैरवदद्रुषा॥ एकश्चक्रधरोनामधिग्युष्मान्मंत्रकंटकान्॥ पदेपदेश्ववित्रासकक्षानिक्षिप्तकुंडिकाः॥ विदूषकप्रसादे
नताभिक्षावोद्यविस्मिताः॥ सद्यःकुंभधृताविषोल्बणरुचःकुद्धावरंपन्नगाःकल्लोलाकुललोलनीलसलिलेग्राहास्त
थोग्रग्रहाः॥ नैवतेमठपुष्टदुष्टवपुषश्चंडाःस्वयंस्वामिनः॥ कष्टंनिष्ठुरचेटकोत्कटरटीवाचाटगोष्ठीभराः॥ स्त्रीनाय
कंवरंस्थानमथवाबालनायकं॥ अनायकंवरंयच्चनतेवंबहुनायकं॥ अद्यैवशूलेनिहताःश्मशानेपुरुषास्त्रयः॥ यस्ते २९

षांनासिकास्तेभ्यश्छित्त्वादायसमेष्यति॥ अधुनैवसनःस्वामीस्पर्धाहिमग्नाशिनी॥ इतिक्रुद्धद्विजगिरातेनथेत्याहुरग्र=
जाः॥ श्मशानगमनंध्यात्वातेषुभीतेष्वसंभ्रमः॥ विदूषकोययौखड्गीकरवीरोन्मुखोनिशि॥ सोपश्यद्राक्षसोद्दाममारीफे=
त्कारभीषणं॥ उद्दंडतांडवोच्चंडभूतमंडलमंडितं॥ कपालकुहरभ्रांतिक्षिप्रहुंकारमारुतं॥ कंकालकलितोत्तालवेतालव
लयाकुलं॥ सूत्कारिदारुविचटच्चितानलचयाचितं॥ निशीथमिवतारास्थितारमेगारमेचकं॥ विंध्याचलमिवालोलप
लाशिव्रातसंकुलं॥ बहुपुण्यजनावासंमहापथमिवायतं॥ संग्राममिवनिःसत्वजनजीवितखंडनं॥ वेश्याचित्तमिवाने
कनरसंहारदारुणं॥ दारिद्र्यमिवदुःखानांप्रत्यग्राणांनिकेतनं॥ श्मशानंतच्चदृष्ट्वासौनचकंपेनिराकुलः॥ तेषांशूलनिवि
ष्टानांत्रासकारिविकारिणां॥ आदायनासिकास्तूर्णंपरिव्राजंददर्शसः॥ तंघोरमठकासीनंध्यानास्तिमितलोचनं॥
पश्यन्सकौतुकंतस्थौतच्छायायामलक्षितः॥ परिव्राट्सर्षपान्श्वेतनाभिमध्यात्समुद्धृतान्॥ आदायमठकारूढाययौ
शून्यसुरालयं॥ प्रणम्यचंडिकांतत्रतदाज्ञांप्रापदेहिमे॥ आदित्यसेनतनयामुपहारमितिस्फुटं॥ छायेवानुगतस्तस्य
सर्वंश्रुत्वाविदूषकः॥ प्रदध्यौस्वामितनयापरित्राणकृतेक्षणः॥ साधकोपिक्षणेनैवतांकन्यांराजमंदिरात्॥ आनिना
यमहामायःक्रंदंतीमप्रेतवाहनः॥ तांहंतुमुद्यतंदृष्ट्वारूपाकोपकरंबितः॥ जहारास्यशिरश्छित्त्वात्रस्तांभूपतिपुत्रिकां॥
पितुःपुरोहितंदृष्ट्वाकिंचिदुन्मीलितेक्षणा॥ गाढंजग्राहतंकंठेसाकंपतरलाकृतिः॥ आगंतव्यंपुनरितिसश्रुत्वाचाश
रीरिणीं॥ वाणींसमुद्यतोगंतुंनिशिव्याकोशलोचनः॥ तान्सिद्धसर्षपान्प्राप्यराजपुत्रींविहायसा॥ नीत्वाविदूषकःक्षि
प्रंचिक्षेपांतःपुरांतरे॥ जनालोकनभीत्यातंगंतुमभ्युद्यतंनिशि॥ नृपात्मजानतत्याजबिभेमिकातरामिति॥ तन्मंदिरे
स्थितेतस्मिन्नुश्रमान्निद्रावशंगते॥ सोविदल्लाःप्रविविशुःप्रातःकंचुकिभिःसह॥ तेद्दृष्ट्वायानंसमालोक्यकोपादेत्यव्य
जिज्ञपुः॥ आदित्यसेनंसोप्याशुतमाहूयाब्रवीत्क्रुधा॥ किमेतदितिपृष्टोथतद्वृत्तांतंनिवेद्यसः॥ अदर्शयन्नरपतेःसाध
कंकृत्तमस्तकं॥ राजाप्रत्ययमासाद्यहृष्टस्तस्मैददौकृती॥ श्रियंचोपकृतिप्रीत्याकिमदेयंमहात्मनां॥ सतयासंग
तोनंगसांगीकरणविद्यया॥ राजपुत्र्यानृपोद्यानेरामरतिलालसः॥ ततःकदाचित्कालेनस्मारितःप्रिययारहः॥

नामाकाशगिरंमोहात्तस्याश्चंडींविदूषकः॥ भद्रांनामततःप्रापपूर्वंरचितसंविदां॥ विद्याधरींययानीतःस्मरोनिःशोक
मल्लतां॥ संतापंचेषुविजयद्विपकुंभोपमस्तनीं॥ उद्भूतयौवनसरःसरोजललिक्षणां॥ कुल्लकांतिलतासक्तभ्रमराकार
२२ कुंतलां॥ आसाद्यस्फरतासक्तोविसस्मारनृपात्मजां॥ यातेकालेपितुर्भीतामर्त्यसंगापराधतः॥ तमामंत्र्योदयगिरिंसा
ययौसिद्धरक्षितं॥ तस्यांगतायामुन्मत्तस्यक्लाभूमिपतेःसुतां॥ हाभद्रेत्यसकृत्तारंविलपंस्तनुतामगात्॥ व्रजन्नथ
दिशंप्राचींनिश्वासग्लापिताधरः॥ सपांडुवर्द्धनंनामपुरंप्रापस्मरातुरः॥ तत्रविप्रगृहेवृद्धानमाहब्राह्मणीततः॥ पु
त्रसर्वंममधनंगृहाणाभिमतोसिमे॥ यतःस्वपुत्रविरहाद्द्वियंत्यक्ष्यामिजीवितं॥ दुःखलब्धाभिधापुत्रीदेवसेनस्यभू
पतेः॥ इहास्तियेनयेनासौवृतायातिसपंचतां॥ चारैर्गृहाद्गृहात्तस्यैनीयतेपुरुषःसदा॥ क्षयंयातेधनेकेषुममपुत्रो
घनीयते॥ तद्दिनाशोविनंक्ष्यामिसर्वंतुभ्यंददाम्यतः॥ इतितद्वाक्यमाकर्ण्यकरुणार्द्रोविदूषकः॥ अहंतत्रगमिष्यामिन
नंक्ष्यामीत्युवाचतां॥ तयारुक्त्रेणमुक्तोथप्राप्यभूपालमंदिरं॥ रत्नशय्यासनस्मेरंकन्यांतःपुरमाविशत्॥ अथाययौराज
पुत्रीतारहारांशुराशिनी॥ राहुग्रस्तस्यशशिनःस्त्ररत्नेवश्रीःसतारका॥ सतांकेनापिनस्पृष्टांदृष्ट्वायौवनशालिनीं॥ उ
द्दामसौरभभरांभ्रमभ्रजातांलतामिव॥ अनासादितपल्याणांकीबोजतुरगीमिव॥ कौतुकाकुलितस्तस्थौद्वारांतर्निभृ
तोनिशि॥ ततःकरिकराकारकपिशंघोररक्षसः॥ भुजंप्रविष्टंद्वारेणददर्शोद्भ्रांतमंतिके॥ दृष्ट्वाप्रदीप्तनेत्रःसदृष्ट्वाज
गरसंनिभं॥ आग्नेयेनासिकाबाहुंतस्यदीर्घंचकर्तसः॥ मृणालनालनिर्लूनेपतितेदोष्णिभूतले॥ दुद्रावविस्रवद्रक्त
स्रवस्तोनिशिनिशाचरः॥ प्रातस्तत्कर्मतुष्टोथदेवसेनोनृपःसुतां॥ विदूषकायप्रददौलक्ष्मींचाद्भुततेजसे॥ दिव्यवा
पीमिवानन्यगजगुप्तांसरद्विपः॥ सतांनेत्रोत्सलांप्राप्यविललासमुखांबुजां॥ कंचित्कालंममगृहेस्थित्वाराजसुता
प्रियः॥ प्रययौसंस्मरन्भद्रामनिद्रोविद्रुताशयः॥ समुद्रतीरमासाद्यतरंगगणभीषणं॥ स्कंददासेनवणिजाप्राप्य
सख्यंप्रियंवदः॥ आरुरोहप्रवहणंतस्योन्नतपताकिनः॥ तस्मिन्महांबुधेर्मध्येविचचालनचेटकः॥ कर्णधारेण
रचितःप्रस्तावस्तुगतागतः॥ तस्मिन्निरुद्धेवणिजामास्केरेव्योमसर्पिणं॥ स्कंददासोवदत्साश्रंशोचन्सविपुलांश्रियं॥ २२

बलेनयःप्रवहणंप्रेरयेद्द्रविणादहं॥ अर्धंतस्मैप्रदास्यामिकन्यांचायतलोचनां॥ विदूषकोथकारुण्याद्विहस्यधनलोभितः॥ म
मज्जरज्जुग्रथितोमकरालयकारिणी॥ निमज्ज्यप्राणिसंघातालुग्नान्द्रुतममोचयत्॥ तस्मिन्विमुक्तेसवणिक्छित्वारज्जुलतांय
यौ॥ वणिजाथनलुब्धेनसछिन्नालंबनोययौ॥ निकृत्तप्राणिसंघाग्रसमारूढोंऽबुधेस्तटं॥ समीयविषयंप्राप्यपथिशुश्रा
वभूपतेः॥ नित्यंहतैकपुरुषांतनयामार्यवर्मणः॥ प्रविश्यपूर्ववत्तत्रराक्षसंहंतुमुद्यतः॥ सख्यंतेनार्थितःप्रापध्यानोपस्था
नसंविदा॥ आर्यवर्माददौतस्मैपुत्रींतांसहसंपदा॥ स्थित्वातत्करतासक्तःकंचित्कालंपुनर्ययौ॥ स्मरन्विद्याधरसुतांसो
मवस्यनृपात्मजां॥ पारिजातलताभंगोनहिजातीषुसादरः॥ अगम्यांभूमिमासाद्यप्रध्यातस्तेनराक्षसः॥ स्कहस्तंमंददंष्ट्रा
स्तमुवाचमहाजवः॥ अथोदयाद्रिपर्यंतेतटेसिद्धनिषेविते॥ त्यक्तःसरक्षसातस्थौनतनोरक्षसांगतिः॥ तत्रपुष्करिणी
तीरेस्थितोदिव्यांगनाजनं॥ ददर्शरत्नकलशैर्जलाहरणतत्परं॥ ताःपृष्टाःकौतुकात्तेनप्राहुर्विद्याधरात्मजाः॥ भद्रानाम
पितुर्भीतातिष्ठतीहरसुलोचना॥ मर्त्यसक्तापुरासाभूत्तदामोदनिवारणे॥ जलाहृतिरियंनित्यमस्माकंकमलेक्षण॥
इतिश्रुत्वामृतेनेवसिक्तोरत्नांगुलीयकं॥ भद्रायैवपुरादत्तंविक्षेपकलशेलघु॥ तदवाप्यततःस्नाताविज्ञायसहसादरा
त्॥ भद्राताभिरुपानाय्यतत्याजविरहव्यथां॥ अथतत्करतारंभपराविद्याधरीक्षणात्॥ विसस्मारनिजांविद्यांभद्रा
मर्त्यानुरागिणी॥ ततोवाहनमादायराक्षसंसहितस्तया॥ व्रजन्गृहीत्वातनयांनृपतेरार्यवर्मणः॥ स्कंददासस्यवणि
जोहृत्वासहधनैःसुतां॥ दुःखलब्धांसमादायदेवसेनसुतामपि॥ अवाप्योज्जयिनींहृष्टःसत्वसारोविदूषकः॥ आदि
त्यसेनतनयांभेजेलक्ष्मींचपुष्कलां॥ ॥श्रीविदूषकाख्यायिका॥ ॥इत्येवंसतमहतांशूराणांविजयःकरे॥ इतिव
त्सेश्वरवचःश्रुत्वासर्वेमुदंययुः॥ सगृहीतजयोद्योगस्तपसात्रिपुरांतकं॥ अतोषयद्दसाध्यंहिकिंशिवस्मरणात्म
नां॥ विद्याधरेश्वरोभावीतनयोविजयश्चते॥ इतिसर्वार्हद्वरंप्रापत्रिरात्रोपोषितोनृपः॥ नृपव्रतानुव्रतेनदेव्योद्दस्या
पतिव्रतं॥ हृष्टोवसंतकःप्राहप्रज्ञांसंस्तद्धिचेष्टितं॥ पुराशर्यातितनयासुकन्याच्यवनंमुनिं॥ लोपामुद्रातथागस्त्यं
तपसैवमतोषयत्॥ इतिगोपालकादीनांपुरःशंसन्वसंतकः॥ पद्मावतींव्रतक्षामांनर्मोक्तिभिरहासयत्॥ अन्येद्यु

रथभूपालं जयोद्योगकथांतरे॥ पौरुषं दैवसफलं प्राह यौगंधरायणः॥ अवश्यं पृथिवीपालभूभुजां विजयश्रियः॥ भवंत्युत्साहसि
द्धानामिहामुत्र च सिद्धये॥ अवाप्यते शुभफलं सुकृतैः पूर्वसंचितैः॥ पश्याचिंतितमेवाप्तं यथायौधिष्ठिरं धनं॥ बभूव पाटलिपुरे दे
वदासाभिधो वणिक्॥ महाधनकुले जातो द्यूताद्दुर्गतिमागतः॥ मध्वस्तवदनच्छायो नगरे पुंड्रवर्द्धने॥ श्वसुरस्य गृहं प्रायात्स्कं
धालंबिपटांबरः॥ श्वश्रुरावसथो यांतमवाप्याचिंतयत्क्षणं॥ कथं दीनो गतच्छायः प्रविशामीति लज्जितः॥ धन्यः शावो निरुच्छ्वा
सो दीर्घनिद्रोति शीतलः॥ सावज्ञः करुणापात्रं बंधूनां न तु दुर्गतः॥ दवाग्निश्चंदनं तस्य विषपानं मधूत्सवः॥ विश्रांतिर्मरणं
चास्य स्वजनो येन याच्यते॥ शूरो विदग्धः स्वजनोभिमानी विद्वान्कुलीनः कुशलः कलावान्॥ तावद्यशस्वीह विभाति देही
यावन्न देहीति वचो ब्रवीति॥ देवदासो विचिंत्येति निशि प्राप प्रतिश्रयं॥ केनापि वणिजा दिष्टां भांडशालां पुरस्थितां॥ अ
पश्यत्तत्र वणिजं ललनां स्वैरमागतां॥ निजजायां परिज्ञाय तामेवाभूत्स दुःखितः॥ रतांते साप्युपपतिं प्राह मद्भर्तृमंदि
रे॥ तत्पूर्वपुरुषन्यस्तं निधानं विद्यते प्रिय॥ स्नुषाणामेव तत्कर्णपारंपर्यक्रमास्थितं॥ देवदासः स मे भर्ता नष्टो द्यूतेन
दुर्भगः॥ तद्गृहात्तद्धनं सर्वं गत्वा तूर्णं समानय॥ इति गूढस्थितः श्रुत्वा देवदासो मनोजवः॥ रात्रावेव ययौ गेहं गत्वा च प्रा
प तद्धनं॥ तेन स्वपदवीं प्राप्ते तस्मिंस्तत्र सुखास्थिते॥ आगत्योपपतिस्तस्मात्तन्मंदिरमयाचत॥ निधानोत्पाटनमनाः क्री
त्वा मूल्येन तद्गृहं॥ दृष्ट्वाथ शून्यं महाखातं तामाहूयासतीं वधूं॥ परदाररते राज्ञा निगृहीते स तामपि॥ कर्णनासाविरहितां कृ
त्वान्याप्तवान्वधूं॥ इत्थं पितामहधनैर्देवदासोभवत्सुखी॥ इति पुण्यवतां दैवात्स्वयमायांति संपदः॥ ॥ देवदासा
ख्यायिका॥ ॥ श्रुत्वेति मंत्रिवचनं राजा विजयलालसः॥ दिदेशाद्दिग्जयोद्योगे सेनान्यममितद्युतिः॥ ततोभ्यांतरमाहूय
पप्रच्छ वत्सानरेश्वरः॥ विदधोसिं हवर्मायं चेदिराज्ये बलाधिके॥ गोपालकं च विदिशाराज्ये ध्वजयोत्सुकः॥ ज्ञात्वा मं
त्रिगिरा दत्तं वाराणस्यां महीपतिं॥ ब्रह्मदत्तं समाकृष्टसर्वसामंतमंडलं॥ जेतुं स गजगानीकस्तुरगोत्खातभूतलः॥
ययौ सुभटसंमर्दव्यालोलितदिगंतरः॥ पांडुरेणातपत्रेण यात्रायां विबभौ विभुः॥ क्षीरक्षोभसमुत्थेन शशांकेनेव मंद
रः॥ पार्थवंशस्य तस्याग्रे गुरुगर्जा गजा बभुः॥ सेवागता इवापन्ना मेघाः खांडवनिर्जिताः॥ तस्य सैन्यभटाधूताधि २३

वभौ रवद्रुमंडली॥ पातालवासभ्रांत्येव संप्राप्ता भुजगावली॥ कापालिभिः प्रणिधिभिर्दैवज्ञव्यंजनैरपि॥ आचकर्ष रिपोर्मंत्रं गू
ढं यौगंधरायणः॥ ब्रह्मदत्तस्य सचिवो धीमान्योगकरंडकः॥ व्यधाद्वत्सेश्वरस्यांभो घासं च विषदूषितं॥ उल्कासंदर्शनं घोरं
मायास्तास्ताश्च दुःसहाः॥ यौगंधरायणस्तस्य प्रतीकारपरायणः॥ व्यर्थं चकार सकलं मायानिर्माणडंबरं॥ ततो बध्वांजलि
र्धीमान्रत्नोपायनसंयुतः॥ ब्रह्मदत्तं विजित्यैवं सर्वाशाविजयी नृपः॥ न्यवेशयत्सूर्य इव प्रतापं मूर्ध्नि भूभृतां॥ ततः समस्त
सामंतमस्तकन्यस्तशासनः॥ पूजितो बंतिराजेन मागधेन च साभुगः॥ देवीभ्यां सहितः श्रीमांल्लावानकपुरं ययौ॥ पौरना
रीमुखांभोजविकासनवभास्करः॥ ॥ दिग्विजयः॥ चक्रवर्तिश्रियं प्राप्य हेमरत्नांबरप्रदः॥ भेजे शृंगारसाम्राज्यं कां
ताकेलिकथो नृपः॥ ततः कदाचित्सचिवं प्राह वत्सेश्वरो जयी॥ भवन्मतिप्रभावोयमहो मद्विजयश्रियः॥ पश्य मेत्र लता
जालक्षेपैरुत्खातरोपिताः॥ जाता नराधिपाः पादचुंबिचूडामणित्विषः॥ मन्येहं ब्रह्मदत्तोसौ नितांतकुटिलाशयः॥ व
शीनीतोपि यत्नेन दर्पांधो विचलिष्यति॥ इति राज्ञो वचः श्रुत्वा प्राह यौगंधरायणः॥ संमानितस्त्वया देव स राजा न चलिष्य
ति॥ त्वच्छासनद्विषस्तस्य ध्रुवं श्रीर्न भविष्यति॥ शुभं शुभकृतां देव विपरीता हि पर्ययः॥ अग्निदत्तोभवद्विप्रः पद्माख्ये वि
षये पुरा॥ सोमदत्तोभवत्तस्य पुत्रः शास्त्रविवर्जितः॥ वैश्वानराभिधश्चान्यः श्रुतिस्मृतिविदां वरः॥ अग्निदत्तस्तयो
कृत्वा विवाहं प्रययौ दिवं॥ सोमदत्तस्ततो मौर्ख्यात्सदाचारविवर्जितः॥ राज्ञो विनिग्रहपदं प्राप्तो दुर्जनचेष्टितैः॥ भ्रात्रा सेर
क्षितोभ्येत्य विदुषा नृपत्रासनात्॥ स ह्यग्रहारं सभयो जग्राह कृषिजीविकं॥ वटवृक्षं पृथुच्छायं पूजयन्स ततं व्यधात्॥ क्षे
त्रकर्मरते तस्य प्रवृद्धाः सस्यसंपदः॥ हलभूतिरिति प्राप संज्ञां स कृषितत्परः॥ ततः परबलायाते क्षणेनास्य विनाशिताः॥
सा सस्यश्रीर्विधौ वामे पौरुषं हि कदर्थना॥ सशोकव्याकुलो रात्रौ नष्टनिद्रो वटांतिके॥ सुश्राव कांशवचनं सभार्यः साश्रु
लोचनः॥ मिंदिरो नाम यक्षोहं प्रसन्नस्ते सदार्चनात्॥ व्रज नागपुरं हि महाक्याद्विपुलां श्रियमाप्स्यसि॥ आदिप्रेत्य भमासाद्य श्री
कंठविषये नृपं॥ ब्रूहि गत्वा सदा कार्ये पृष्टः पृष्ट एव वा॥ शुभं शुभकृतां देव विपरीता हि पर्ययः॥ इत्यादिष्टः स यक्षेणावाचादि
त्य प्रभं गतः॥ शुभं शुभकृतां देव विपरीता हि पर्ययः॥ इत्याकर्ण्य सकृद्वाक्यं तस्य राजा श्रुतप्रियः॥ ददौ स विपुलां लक्ष्मीं तस्मै

बृ· था विस्मयकारिणीं॥ ततः कदाचिद्भूपालस्तेन विश्रंभकारिणा॥ ययौ मृगव्यां पौरस्त्रीकटाक्षोत्पलमालितः॥ चिरात्प्रतिनिवृ
त्तोथ कांतां कुवलयावलिं॥ द्रष्टुं हृष्टो विशद्द्रष्टुमेक एव नरेश्वरः॥ रुद्धप्रवेशो नृपतिर्दयितांतःपुरे ततः॥ गवाक्षांतरितोपश्य
२४ द्यागमंडलपंकजां॥ दिगंबरां मुक्तकेशीं रक्तचंदनचर्चितां॥ मांसाशनीं स दयितामभिचारोचितस्थितिं॥ प्रविष्टो विस्मयक्रो
धशंकाकुलितमानसः॥ ततस्तया नरपतिर्दृष्टश्चकितनेत्रया॥ सा त्रासतरलाकारा कंपमानघनस्तनी॥ अभयं दीयतां दे
व कथयामीत्यभाषत॥ दत्ताभया नृपतिना कथामकथयन्निजां॥ आसं देवपितुर्गेहे पुराहं कन्यका सती॥ नानादेशसमायात
सखीमंडलमंडिता॥ मधौ मधुरसंलापकोकिले कालिकाकुले॥ मलयानिललोलालिकुलाकुलितचंपके॥ उद्यानमगमं
लीलानिलयं पुष्पधन्वनः॥ तत्र मामवदन्सख्यः सखि देवः प्रणम्यतां॥ अदूरसंनिधिः श्रीमानिह विघ्नाधिपो विभुः॥ विवाह
विजयोयोगेवयं लोकैः प्रपूज्यते॥ श्रुत्वेति तामया पृष्टास्तत्प्रभावं बभाषिरे॥ ऊर्ध्वरेतास्सिंचंडीशो गौरी पुत्रार्थिनी पुरा॥ प्रदध्यौ न
च विज्ञाय हृष्टो भूत्वा कशासनः॥ ध्रुवं देव्याः सुतोस्माकं भविष्यति जयश्रिये॥ ध्यात्वेति शक्रः पंचेषुं दिदेश मधुना सह॥ स गत्वा
शंकरमनःक्षोभायाक्षयसायकः॥ चक्रे तपोवनं शंभोरकालमधुमंडितं॥ सहसोत्फुल्लकमलाशोककेसरकिंशुकं॥ तत्र त्रिलोचनं
कामो विव्याधोन्मादनेषुणा॥ विकारं मनसो दृष्ट्वा कुपितस्त्रिपुरांतकः॥ स्मृतिशेषं स्मरं चक्रे भाललोचनवह्निना॥ तदुःखात्साश्रु
नयनां देवीं पुत्रार्थिनीं हरः॥ उवाच देवि विघ्नेशः पुत्रार्थं नार्चितस्त्वया॥ इत्युक्ता भगवान्देव्यैरर्थ्यमानो मनोभवं॥ चकार मानसा
वासं द्विगुणोत्साहदर्पणं॥ अथ तारकवित्रस्तत्रिदशत्राणमात्मजं॥ स्रष्टुं सतीरतिक्रीडां भेजे शशीतांशुशेखरः॥ सहस्रं दि
व्यवर्षाणां शंकरे रतिनिःसरे॥ लुठद्भिरिव रोद्धूतसागरा विचचाल भूः॥ ततो भीतैः सुरैः सर्वैः परमेष्ठिगिरानलः॥ त्रिनेत्ररति
विघ्नार्थमन्विष्टो न व्यदृश्यत॥ शुकभेकगजेशीलापच्छन्नोग्निर्निवेदितः॥ सदा जिह्वापरावृत्तिशापं तेभ्यो ददौ तदा॥ याचितो
थ सुरेंद्रेण शर्वस्य सुरतोत्सवे॥ विवेशाभिक्षुवेषाग्निर्विरराम ततः शिवः॥ विरतो रतसौवे गं चिक्षेपाग्निमुखे हरः॥ को हि
माहेश्वरं तेजो विनाग्निं धर्तुमीश्वरः॥ ततो गिरिसुताकोपाच्छन्नापस्फुरमंडलं॥ मा वः सदृशसंगर्गजन्मा कश्चित्सुतोस्त्विति॥ पुत्रा २५
र्थं न तयोर्देव पूजितो विघ्ननायकः॥ इति पत्युर्गिरा गौर्या प्राप्ते विघ्नेर्चितोथ सः॥ ततो वर्षसहस्रांते श्रमार्तो हव्यवाहनः॥ तत्याज ग

Dr. Bhau Daji

र्भं गंगायां साप्यधत्त न मुक्तरं॥ जान्हवी तारकत्रस्तानं शंभोर्वचसात्यजत्॥ स मेरोर्दक्षिणे पार्श्वे सहस्रांशुसमद्युतिं॥ कृत्तिकाव
र्द्धितः श्रीमान्रक्षितो हरकिंकरैः॥ षण्मुखस्तेजसा चक्रे सज्वालाजटिला दिशः॥ नारदस्य गिरा ज्ञात्वा दृष्ट्वा च नमति प्रभं॥ सहस्राक्षो
मुमोचाशु वज्रं तस्मै पुनः पुनः॥ वज्रप्रहारैस्तनया बभूवुस्तस्य दुर्मदाः॥ शाखो विशाखः सुमुखश्चेति शक्रस्तानलाः॥ अथोथि
तिकार्तिकेयोडिंभे समरदुर्मदे॥ त्रासंसंकोचितकरो बभूवैरावणो रणे॥ ततस्त्रिलोचनेनैत्य सुरेंद्रः सुरूपया शिशुः॥ सांत्वितः सहसा
वैसाशाके प्रीतिं च लंभितः॥ ततोभिषेके प्रतनापलेतस्याशुकल्पिते॥ हरेः सकलशोबाहुस्तंभितां विघ्नतोययो॥ अथ शर्वस्य कन्व
सापूजिते गणनायके॥ विघ्नप्रशांत्यात्राकस्य बाहुस्तंभादमुच्यत॥ हेरंबेनाभिषिक्तोथ स्वयं सेनाम वाप्य सः॥ दिव्यशक्त्या महा
सेनोन्यवधीत्तारकासुरं॥ एवं महाप्रभावोयं प्रणम्यो विघ्ननायकः॥ सखीनामित्यहं वाक्यान्नतुं तमगमन्मुदा॥ गणेंद्रमश्वत्थतले
सखीनां पूजयित्वाहमीश्वरं॥ सहसापश्यमाकाशे न गतागतं॥ न दृष्ट्वा विस्मितात्यंतमपृच्छं कौतुकेन ताः॥ सख्यः कथं वो नभसा गतिरित्य
चिरेचिताः॥ महाकालप्रसादाच्च पूजनाच्च गणप्रभोः॥ महामांसाशनाच्चेयमस्माकं सिद्धिरुत्तमा॥ छन्नावयं हि डाकिन्यः काष्ठु
पाध्यायिनी वनः॥ अस्त्यसौ कालरात्रीति साचान्हताः समेष्यति॥ ततो मदुपदेशाय समाहूता समाययौ॥ कालरात्रिः सखी
भिर्मे कुंभलंबोदरस्तनी॥ अहं तद्दीक्षया क्षिप्रं महामांसाशनेन च॥ दृष्ट्वा देवं महाकालमभवं योगिनी ततः॥ मां रूपपराव या
त्तिदृष्टिबंधाभिचारिके॥ मारणोच्चाटनाकर्षे जाताहं तद्गुणाधिका॥ तस्याः प्रच्छन्नडाकिन्याः कालरात्र्याः पतिर्द्विजः॥ विष्णु
स्वाम्यस्त्युपाध्यायः श्रोत्रियोस्ति बहुश्रुतः॥ तस्य सुंदरको नाम शिष्यो रूपेण सुंदरः॥ कालरात्र्यायुवा स्वैरं याचितो रतिदक्षि
णां॥ जननी गुरुभार्या मे त्वं पुत्रोहं तवानघे॥ इति सुंदरकः प्राह प्रार्थ्यमानस्तया सकृत्॥ ततः क्षिप्रं स्वनखैः सा विदार्य निजं
वपुः॥ कृतं सुंदरकेणेदमित्याह कुपितापतिं॥ उपाध्यायस्ततः क्रुद्धस्तं शिष्यं शिष्यसेनया॥ लकुटैर्जर्जरतनुं विधाय बहिरत्य
जत्॥ स रात्रौ निर्जने त्यक्तः शिरेणावासजीवितः॥ उत्थाय शून्यगोवाटमविशच्चकितात्रायः॥ ततोर्धरात्रे निर्याता मपश्य
द्योगिनीवृतां॥ कालरात्रिमुपाध्यायदयितां भीषणारवां॥ तदुत्सतन मंत्रेण दिवमुत्पतिते गृहे॥ स गोवाटे स जग्राह तं मंत्रं धी
मतां वरः॥ भ्रांत्वा प्रतिनिवृत्तायां पुनस्तस्यां श्याक्षये॥ स तत्रशालाश्रितः सोथ पुनरेत्यार्थितस्तया॥ अद्यापि मन्मथरुचे भज मां स्व

स्वयमागतां ॥ उपाध्यायवधूं पाहि देहि जीवितदक्षिणां ॥ इत्युपाध्यायिनीवाक्यं श्रुत्वा कर्णौ पिधाय सः ॥ जगाम धर्ममर्या
दां लंघयंति न साधवः ॥ प्रत्याख्यानरुषाभ्येत्य विष्णुस्वामी पुनस्तया ॥ त्वच्छिष्येण हतास्मीति गिरा कोपाकुलः कृतः ॥ उपा
ध्यायोपि तत्कोपादविज्ञाततदाशयः ॥ तस्य भोजनमभ्येत्य शात्रशालामवारयत् ॥ स चोत्सृतनमंत्रज्ञः पानमंत्रार्थमाययौ
॥ पुनस्तमेव गोवाटं तत्रापश्यच्च तां निशि ॥ तासामुपलतितानां च स्थितः प्रच्छन्नवाटके ॥ अलंकारान्स्वयं प्राप महार्घ्यान्दूर
दूरगः ॥ तद्दिक्रया प्रभाते थ स तदा हृदि संगते ॥ नरेर्विवादि नृपतेः पुरस्तादवदच्च सः ॥ प्रासादमधिरुह्येमं देवं विज्ञापया
म्यहं ॥ इति प्रासादमारुह्य मंत्रेणाप्यंतदूरगं ॥ द्वितीयं नृपमभ्येत्य प्राहाहं धूर्जटेर्गणः ॥ हीयतां रत्नहेमादि मह्यं माहेश्वरो
ह्यसि ॥ इत्युक्त्वा विपुलैश्वर्यं तस्मादादाय हर्म्यगः ॥ यत्तो देपगता सिद्धा प्राप्य मंत्रं निपातने ॥ कालरात्रिकथां राज्ञे सर्वा
मेसन्यवेदयत् ॥ राजा तत्वं परिज्ञाय तस्या निग्रहमभ्यधात् ॥ स्या तद्भयात्सलाया त्रस्ति नेहांतःपुरे मम ॥ इत्येतत्कथितं तु
भ्यं यथावृत्तमया विभो ॥ एहि सिद्धिं भज क्षिप्रं योगास्मिन्समयी भव ॥ भुक्त्वा वीर महामांसं निर्विकल्पपदाश्रयः ॥ इति दे
व्या गिरा राजा घृणाकूणितमानसः ॥ तथेति कृच्छ्रेण बहुशो बाधितस्तया ॥ स याकृष्टः पशुः कोत्र पृच्छति जगतीभु
जा ॥ हलभूतिरिति प्राह स्वैरं कुवलयावली ॥ उद्विग्नस्तत्समाकर्ण्य देव्या च भृशमर्थितः ॥ राजा दोलायितमना श्विरेण
प्राप निश्चयं ॥ ततः साहसिकं नाम सूदमाहूय दंपती ॥ तानूचतुः समभ्येत्य यो वक्ष्यति महामतिः ॥ राजयोग्यां रस
वतीं कुरुष्वेति त्वमेव तं ॥ हत्वा तन्मांसभूयिष्ठं तूर्णं भोजनमानय ॥ इति संविदमादाय स सभामंडपे पुरः ॥ हलभूतिं
नृपः प्राह भोज्यं मे क्रियतामिति ॥ तूर्णं तदाज्ञया गंतुं प्रस्तुतं तं महानसं ॥ ऊचे चंद्रप्रभो ज्येत्य राजसूनुस्त्वनातुरः ॥
मत्कुंडलाहृतौ गच्छ श्रुत्वेत्याह स च द्विजः ॥ राजभोजनमादिश्य सूदमेष्याम्यहं क्षणात् ॥ इति राजसुतः श्रुत्वा हलभूति
मभाषत ॥ अहं महानसं गत्वा सूदं वक्ष्यामि ते वचः ॥ व्रज मत्कुंडलार्थं त्वमित्युक्त्वा जग्मतुः पृथक् ॥ राजपुत्रमथायां
तं दृष्ट्वा श्रुत्वा च तद्वचः ॥ हत्वा यथोक्तमकरोत्सूदः समययंत्रितः ॥ तन्मांसभोजनं राजा कृत्वा स्वैरं वधूसखः ॥ प्रात २५
र्विदितवृत्तांतः पपात विलयन्भुवि ॥ स्वपुत्रं निहतं ज्ञात्वा हलभूतिं विलोक्य च ॥ शुभं शुभकृतां देव सस्मारेति स तद्गिरः ॥

हलभूतिं नृपपदे धृत्वानुशयतापितः ॥ ब्राह्मणेभ्यो महादानं वितीर्य यमुनातटे ॥ निकृत्तनिजमांसेन हुत्वा वह्निं ससंभ्रमः ॥ स
भार्यः प्रययौ स्वर्गं सत्वनिर्धूतकल्मषः ॥ शुभं शुभकृतां देव हलभूतिरवाप्तवान् ॥ न हि कश्चिच्छुभकृतस्तव राजा चलिष्यति
॥ हलभूत्याख्यायिका ॥ ॥ यौगंधरायणवचो निशम्येति जनाधिपः ॥ एवमेतदिति प्राह विस्मयाविष्टचेतनः ॥ ततः प्रि
यतमाकेलिविलासरसिको नृपः ॥ परिस्यक्तभियं भेजे स राजविजयश्रिया ॥ कौशांबीमथ सौधसंगितरुणीनेत्रांबुनीलो
त्पलस्रग्दामाभरणं विवेश सुभगः कांतासखो सौ नृपः ॥ आकर्णांचितकामकार्मुकलतात्रिंकारतारैर्मुहुः प्रसरैः सबलो
लपौरललनाकांचीरवैः पूरितां ॥ ॥ इति क्षेमेंद्रविरचितायां बृहत्कथायां लावानको नाम तृतीयो लंभकः ॥ ३ ॥ अ
तः परं नरवाहनजन्म भविष्यति ॥ ललाटलोचनं पायात्स वो देवस्त्रिपुरद्विषः ॥ कुमाररक्षासिंदूरं चितरक्तकिरणैरिव ॥ ससा
र्वभौमविभवं प्राप्य भूमिपुरंदरः ॥ बभार वल्लभाकांतिनलिनीराजहंसतां ॥ सभास्थानसमासीनमभ्येत्याप्य सत्कृतिं ॥
जगाद नारदो दंतद्योतैर्धवलयन्दिशः ॥ अयि राजेंद्र कार्येषु प्राप्य लक्ष्मीं न मुह्यसि ॥ ऐश्वर्यमदमत्ता हि न पश्यंति नृपद्विपाः ॥
असिसंकोचमायाति नश्री व्यसनवारिदैः ॥ जडीकृतप्रतापस्य हेमंते नलिनीवने ॥ स पांडुः पृथिवीपालस्तव पूर्वपिताम
हः ॥ मृगयाव्यसनासक्तो मुनिं हरिणरूपिणं ॥ किंदमं नाम बाणेन जघान रतिमोहितं ॥ तस्मात्स रतिपर्यंतजीवितं शापमाप्तवा
न् ॥ इति राज्ञां विनाशाय व्यसनं महतामपि ॥ कुलाधिकपदं वीर संप्राप्तोसि किमुच्यते ॥ सर्वविद्याधराधीशो भविष्यति तवा
त्मजः ॥ कुमारजनकं देवमाराध्य शशिशेखरं ॥ देवी वासवदत्तेयं जनयिष्यति ते सुतं ॥ त्रिपुरारिजिविलुप्तः स्मरः सोवतरि
ष्यति ॥ रतिस्तुतिप्रसन्नेन शंकरेण विनिर्मितः ॥ उक्त्वेति नारदमुनौ क्षिप्रमेव तिरोहिते ॥ वत्सराजो भवत्स्वैरमन्दानंदमेदुरः
॥ ततः कदाचिद्दारिद्र्यविध्वस्तायमजौ सुतौ ॥ आदाय शरणं प्रायाद्ब्राह्मणी वत्सभूपतिं ॥ विसृष्टांतःपुरं राज्ञा सा कृपापूर्णचे
तसा ॥ न्यस्ता च संपदामंगीकृता वासवदत्तया ॥ पुत्रिणी वत धन्यासि निजां कथय मे कथां ॥ देव्या पृष्टेति सा स्वैरं ब्राह्मणी प्रा
ह निर्वृता ॥ पत्या विहीनया देवि चारित्र्यं रक्षितं मया ॥ न हि धर्तुं समर्था हि त्वालंप्रोषितयोषितः ॥ उत्तरस्यां दिशि पुरा देवद
त्तो भवन्नृपः ॥ जयदत्ताभिधस्तस्य पुत्रोभूद्दर्वितः कुले ॥ स राज्यपवनालोलकदलीदलचंचलां ॥ विचिंत्य संपदं राज्ञां वणि

जंचाक्षयांश्रियं॥महाधनवणिक्पुत्र्यापुत्रस्योद्वाहमारधे॥येनकांचनरत्नाद्यैःप्राप्यव्याकोशकोशतां॥ततःकाले
नभूपालेदिवंयातेतदात्मजः॥सगोत्रशत्रुविजितोजीवच्छेषाययौनिशि॥समात्रप्रेरितोदुःखाद्गच्छश्वशुरमंदिरं॥
महाधनःसहवणिक्त्वांध्रुवंपूरयिष्यति॥इतिमातुर्गिरागत्वापुरंपाटलिपुत्रकं॥श्वसुरावसथंप्राप्यनविवेशह्रियान
तः॥सपांथःशालाशालायांशयानस्तत्र्हांतिके॥निजजायांददर्शाथरात्रौकेनापिसंगतां॥तांचौर्यस्फुरत्नांकंपक्कण
न्मुखरमेखलां॥दृष्ट्वापिदुर्गतिंध्यायन्नचकंपेस्फकोपनः॥ततःस्फुरतसंमोहभ्रष्टंहेमविभूषितं॥नाज्ञासीन्मणिताटंकंरा
गांधःकोहिपश्यति॥तद्रत्नमणिसंछन्नंप्राप्यकर्णविभूषणं॥ययौलक्ष्मीकृतालंबोराजपुत्रोप्यलक्षितः॥बंधेनिधाय
बद्ध्वाद्रविणेनतदुत्तमं॥क्रीत्वातुरंगंराजानंपरमेश्वरमभ्ययात्॥तमुपाश्रित्यबलिनंहत्वाशत्रुगणान्युधि॥पितृपैताम
हंराज्यमवापविपुलद्युतिः॥ततोन्यांराजतनयांपरिणीयकुलोचितां॥वणिजःप्राहिणोत्तत्रताटंकंदुहितुश्च्युतं॥त
दालोक्यैवसाभर्त्राप्रहितंरत्नभूषणं॥स्मृत्वादुर्विनयंभीतासहसापंचतांययौ॥इतिविप्रोषितास्त्रीभिःशीलंदुःखेनरक्ष्यते
॥जयदत्तारव्यायिका॥ ॥अहंशंकरदत्तस्यजायादेवद्विजन्मनः॥ब्राह्मणीपिंगलानामदेवाद्वैधव्यमागता॥हलेकुलाग्रहा
रेमेसगोत्रैर्बलवत्तरैः॥देवरेत्वविदेशस्थेचिरंशांतिकराभिधे॥पुत्रावेमौसमादाययानास्मिशरण्यंनृपं॥भर्तारंतवसंतसज
नतास्फुरपादपं॥श्रुत्वैवराजमहिषीतद्वत्तांतंकृपावती॥पुरोहितंशांतिकरंतस्याविज्ञायदेवरं॥सन्मानमधिकंचक्रेहेमर
त्नांबरप्रदा॥सापितंदेवरंप्राप्यभर्तृदुःखंशशंसतत्॥संपूजितादेवरेणराज्ञोदेव्याश्चसादरं॥सातस्थौब्राह्मणीतत्रबालसं
वर्द्धनव्रता॥ ॥ब्राह्मणीसमागमकथा॥ ॥कदाचिदथदृष्ट्वैवदेवीवातायनस्थिता॥कुंभकार्पीःस्फुतान्यंचप्रदध्यौदुः
खिताक्षणं॥अपिपामरनारीभ्योविधिःपुत्रान्प्रयच्छति॥नतुमेमंदभाग्यायास्तनयावाप्तिसंकथा॥इत्युदश्रुमुखींदेवीं
विलोक्यप्राहपिंगला॥स्फनयश्रीरिवस्फुरत्वंदेविपुत्रमवाप्स्यसि॥रथ्याशूकरतुल्यानापापिनांबहलोन्वयः॥दैवातिसत्वमहतां
जन्मपुण्यवतांक्वचित्॥ब्राह्मणीवचसाकिंचिदवाप्ताशोकतानवं॥स्वयंवत्सेश्वराभ्येत्यदेवींचक्रेधृतेःपदं॥साथपुत्रार्थिनी
देवमाराध्यतपसाशिवं॥स्मरावतारंतनयंप्राप्स्यसीत्यापतद्वरं॥स्वप्नेचशुभ्रमहसाजटामंडलधारिणा॥दत्तंदिव्यफलंप्रा २६

प्यराज्ञेसर्वंन्यवेदयत्॥अथाधत्तशुचिच्छायागर्भंभूपालवल्लभा॥चंद्रंक्षीरोदवेलेवजान्हवीवषडाननं॥साव्यक्तदोहदापांडुमुखा
जृंभालसस्थितिः॥बभारतन्वत्रिवलीलेखाभंगितरंवपुः॥तस्यादोहदसंकल्पोबभूवोन्नतिसूचकः॥आकाशगमनोत्साहेतत्रामन्यत
भूपतिः॥विधाययंत्ररचितंविमानंपवनेहितं॥व्यधाद्वासवदत्तायानभःक्रीडागतिंनृपः॥विद्याधरकथाश्चर्यंश्रवणेजातकौ
तुकां॥यौगंधरायणोभ्येत्यतंप्राहनृपसन्निधौ॥अवश्यममिताचारसत्वंस्फुतमवाप्स्यसि॥कुतोन्यथाव्योमगतौशुभाख्यानेचते
रतिः॥शृणुविद्याधरकथांहर्षपीयूषवर्षिणीं॥भाविकल्याणतनयेफलितंत्वन्मनोरथैः॥अस्तिसाधुमनःस्वच्छस्फटिकोदिमभ्र
भृतः॥विद्याधराणांवसतिःकैलासशिरस्यशेखरः॥जीमूतकेतुरभवत्तत्रविद्याधरेश्वरः॥चंद्रौकल्पतरुर्यस्यसंपूरितमनोरथः॥
जीमूतवाहनस्तस्यपुत्रोभूत्सत्वसागरः॥यद्यशश्चंद्रिकाधौतमद्यापिभुवनत्रयं॥पित्रादत्ताभिषेकोसौविनतास्फुरद्रुमं
॥हेमवर्षिणमर्थिभ्यःकरुणापूर्णमानसः॥दत्तकल्पतरोस्तस्यपापाराज्यंजिहीर्षवः॥विद्याधराधिपास्तस्थुःसंहताःपापनि
श्चयाः॥जीमूतवाहनोज्ञात्वातेषांकुटिलचेष्टितं॥स्वयंशाकोपितत्याजराज्यंवैरपराङ्मुखः॥सपित्रासहितःप्रायाद्गिरिंक्रोम
लयाचलं॥मरुत्तांडवितोद्दंडश्रीखंडतरुमंडलं॥तत्रनिर्झरझंकारिरमणीयशिलातले॥आसीनंसददर्शाथभव्यंसिद्धकुमार
कं॥विलोक्यकौतुकाविष्टस्तंपप्रच्छमहाद्युतिः॥कस्त्वंकस्यकुतोवेतिसंपृष्टःसोभ्यभाषत॥विश्वावसोःसिद्धपतेरहंमित्रावसुः
स्फुतः॥स्वसामलयवत्यस्तिममलावण्यकौमुदी॥जानेविद्याधरेंद्रंत्वांदेवजीमूतवाहनं॥योग्यांतवैतांमन्येहंरतिंरतियतेरि
व॥इतिप्रियंवचःश्रुत्वाप्राहजीमूतवाहनः॥स्मरामिपूर्वभार्यासोदयितामेतवस्वसा॥शृणुजन्मांतरकथांममयुष्मत्समागमे॥
निमील्यलंघनाच्छंभोःपुरामानुषतांगतः॥महाधनस्यवणिजःसंप्राप्तःपुत्रतामहं॥वसुदत्ताभिधानोहंविसृष्टोद्रविणार्जने॥पि
त्राविंध्याटवींघोरामविशंशबराकुलां॥तत्रदस्युगणैर्बध्वानीतोहंचंडिकालयं॥दृष्टःशबरराजेनतद्वधात्तुविमोचितः॥ततःप्रति
निवृत्तोहंपित्रेसर्वंनिवेदयत्॥स्थितस्तत्प्रत्युपकृतिध्यानस्तिमितलोचनः॥ततःकदाचिद्बलिनोराज्ञस्त्वंवशमागतं॥कृतोपकारंशब
रंधनेनाहममोचयं॥सबधान्मोचितोयत्नात्कृतज्ञःशबरोमया॥कन्यांदृष्ट्वातुषाराद्रौप्रतिकर्तुममोद्यतः॥ततस्तेनाहमुत्तालतमा
लसरलाकुलं॥नीतःप्रालेयशैलेंद्रंकिन्नरीकेलिमंदिरं॥तत्रमामाहशबरःपुरादृष्टेहकन्यका॥मयामदनमांगल्यमालिकालोचना

मृतं॥ सिंहादिरूढा गौरीव हराराधनसंगता॥ सोत्कण्ठा हरमभ्येत्य मया लक्ष्यथाकृता॥ इत्युक्त्वा नलिनीखंडमंडितोपांत
मादरात्॥ सो दर्शयत्तदा चारुममत्तांभुनिकेतनं॥ ध्रुवं शिवार्चनरता नचिराद्देष्यतीत्यहं॥ ध्यात्वा चिरं स्थितस्तत्र कृत
स्नानहरार्चनः॥ अथ पंचाननमारूढामागतां तत्र कन्यकां॥ दर्शितां शबरेणाराद्पश्यन्मन्मथोत्सवं॥ शीतांशुशुभ्रवसनां
तारहारकरोज्ज्वलां॥ तुषारशिखरींद्रस्य प्रत्यक्षामिव देवतां॥ अयाचं तामहं कांतां पूर्वं रचितसंविदं॥ शबरेण कुरंगाक्षी
मचिरेण मनोवतीं॥ तामादाय ततः कांतां गत्वा निजपुरीं शनैः॥ अभजं शबरो येन तः कामं विभ्रमवानूश्रियं॥ ततः स सिंहः
सहसा भूत्वा विद्याधराकृतिः॥ उवाच नष्टः शापो मे दिष्ट्यायुष्मत्समागमात्॥ अहं चित्रांगदो नाम जवाद्दुर्लंघ्यनारदं॥ तच्छापा
त्सिंहतां यातः पुरा विद्याधराधिपः॥ इयं मनोवती नाम तनया मम सुंदरी॥ तव भार्या चिरं सृष्टा धृता केसरिणा मया॥ यदा नवस
तां कश्चित्सरिणेष्यति मानुषः॥ तदा विमोक्ष्यसे शापान्मामुवाचेति नारदः॥ तदेतन्मुक्तशापो हं गच्छामीत्यभिधाय सः॥ प्रययौ
भूषण्यमणिच्छायाशबलितांबरः॥ ततो हमपि काले न भुक्त्वा लोकसुखं श्रियं॥ हिरण्यदत्तमासाद्य पुत्रं वंशविवर्धनं॥ मनोव
तीसखो गत्वा पुण्यं कालंजरं गिरिं॥ शबरानुगतो ध्यायन्शंकरं तनुमत्यजं॥ जीमूतवाहनः सोहं कन्या मलयवत्यपि॥ प्रिया
मनोवती सैव शबरस्त्वं समेसुहृत्॥ इति मित्रावसुः श्रुत्वा विद्याधरपतेर्वचः॥ पित्रे निवेद्य वृत्तांतं विवाहं विदधे स्वसुः॥ अवाप्य
सिद्धतनयां मानसोल्लासचंद्रिकां॥ लावण्यविभ्रममहीं मनोरथशतोदितां॥ स्मरसंभोगसुभगस्त्वद्विलासरसाकुलः॥ अमं
दानंदमंदो हं भेजे जीमूतवाहनः॥ ततः कदाचिद्विहरन्सामित्रावसुना सह॥ ददर्श दुःखनिभृतध्यानं फणिकुमारकं॥ सते
न शंखचूडाख्यः पृष्टः प्राह भयाकुलः॥ कद्रूश्च विनता चेति कश्यपस्य प्रिये पुरा॥ बालधौ भास्कराश्वानां सितासितविवाद
तः॥ पणं दास्याय चक्राते प्रतिज्ञाकृतनिश्चये॥ कृष्णवालान्विधायाश्वान्कद्रूः पुत्रैर्भुजंगमैः॥ दास्ये निनाय विनतां व्याजा
द्रुरुडमातरं॥ तस्या निशम्य दास्यं तत्सी यूषाहरणावधि॥ वैनतेयो बलवान्नागान्मातुर्दास्यं निवारयन्॥ जवासी यूषमाहृत्य
जित्वा शक्रं खगेश्वरः॥ प्रदाय काद्रवेयेभ्यो दासभावादमुच्यत॥ धृतं पीयूषकलशं कुशेष्वभ्येत्य वासवः॥ जहार तक्षणा
त्स्राग्याल्लिलिहुः पन्नगाः कुशान्॥ ततो द्विजिह्वतां याताः खरदर्भावलेहनैः॥ विष्णोर्वरात्सुपर्णस्य भक्ष्यता भुजगा ययुः॥ त

तः कुलक्षयभयात्तस्मै वारेण कल्पितः॥ नागो वासुकिना नित्यं वारो ग्रसितुमक्रमात्॥ इत्याकर्ण्यैव करुणापूर्णो जीमूतवाहनः॥ अहं
तार्क्ष्यं भवद्वेषो गच्छामीत्यभ्यभाषत॥ निर्वैरता विनयिता प्रियवादिता च प्राणैरपि प्रणयिनां प्रियपूरणं वा॥ इत्युग्रमोहमदमानवि
षोल्बणस्य संसारघोरजलधेरमृतच्छटेयं॥ मित्रावसुं विसृज्याथ व्यपदेशेन सत्वरः॥ शंखचूडं च सत्त्वस्थो वैनतेयशिलाश्रयो॥ न
त्र नागास्थिसंघातेनिर्यद्भूरिवसाकुले॥ गरुडागमनाकांक्षी तस्थौ विगतसंभ्रमः॥ ततः प्रलयसंभ्रांतकल्पांतपवनाकुलं॥ अकंप
त जगत्तुंगतरंगोत्तुंगसागरं॥ अथादृश्यत मार्तंडमंडलोच्चंडतेजसा॥ गरुत्मान्कांचनमयीः कुर्वन्निव दिशो दृशा॥ स चंडचंचु
चरणाघातविश्लिष्टविग्रहं॥ जीमूतवाहनं चक्रे सहसा पतगेश्वरः॥ अभ्रहृष्टवदनच्छायं तमालोक्य निराकुलं॥ धुर्यः सत्त्ववतां को
यमिति तार्क्ष्यो व्यचिंतयत्॥ पृष्टः कोसीति वृत्तांतं स्वयं तस्मै न्यवेदयत्॥ तुष्टश्च वरदोस्मीति तमाह भुजगांतकः॥ हतानामस्थि
भूतानां जीवनं फणिनां ततः॥ नागाशाननिवृत्तिं च सोयाचत वरं वरं॥ पतगेंद्रे तथेत्युक्त्वा गते स्वरुचः सुधारसैः॥ पित्रा मलव
त्या च संगतो बांधवैरपि॥ विद्याधरैः समभ्येत्य प्रार्थितस्तुहिनाचले॥ चक्रवर्तिपदं भेजे निजं जीमूतवाहनः॥ श्रुत्वेति राज
महिषी विद्याधरकथाद्भुतं॥ आनंदसुंदरमुखी बभौ प्रातरिवाब्जिनी॥ ॥ जीमूतवाहनाख्यायिका॥ ॥ ततः कदा
चित्प्रत्यूषे देवी संसदि भूपतिं॥ यौगंधरायणयुतं प्रोवाच श्रवणामृतं॥ देव मामवदत्स्वप्ने भस्मस्मेरोजटाधरः॥ गजेंद्रकृत्ति
वसनः श्यावकंठस्त्रिशूलभृत्॥ सर्वविद्याधराधीशं स्मरं जन्मांतरागतं॥ जनयिष्यसि लोलाक्षि पुत्रं वंशविभूषणं॥
प्रातर्वत्सेश्वरपुरे दंपत्योर्भविता मिथः॥ विवादस्तत्र पुरुषो निष्पापो न नु तद्बधूः॥ उत्कोचदर्शनं यातेतस्मिन्हर्षवशाद्दहं
॥ प्रबुद्धा मागधवधूवृंदमंगलगीतिभिः॥ इत्युक्तवत्यां भूपालवल्लभायां नरेश्वरं॥ प्रविश्य प्रणतोभ्येत्य प्रतीहारो व्यजि
ज्ञपत्॥ देव द्वारि स्थिता कापि योषिद्बंधुजनावृता॥ भर्त्रा विवादं भर्त्रव्ययात्रायां समुपागता॥ स पुत्रयात्रया कृष्टस्त
द्बंधुजनताडितः॥ स वक्ति पुरुषः सर्वं दत्तमस्यै मया धनं॥ न किंचिद्दिति योषिच्च प्रमाणमधुना नृपः॥ इति प्रतीहारवचः
श्रुत्वा मंत्रिवरो वदत्॥ साक्ष्यं साक्ष्यात्रिनेत्रेण देव्याः स्वप्ने त्रभाषितं॥ निःपापपुरुषस्ताव त्तथाप्यन्विष्यतां पुनः॥
तस्यै दत्तं न दत्तं वा ज्ञातव्यमिति साक्षिभिः॥ लोकप्रत्ययसारा हि महतां प्रतिविश्रुताः॥ उत्कोचमात्ये विरते तयो

र्विवदमानयोः॥ स्वयंश्रुत्वान पश्चक्रे साक्षिशेषं विनिर्णयं॥ ततो वसंतकः प्राह तत्कथावसरे हसन्॥ अन्यासक्तैव योषैषा सत्यं द्वेष्टि निजं पतिं॥ वाराणस्यां पुराधीरो बभूव नृपसेवकः॥ रूपाभिजनसंपन्नो नाम्ना सिंहपराक्रमः॥ भार्या कलहकार्याख्या तस्यासीत्परुषस्वरा॥ धनप्रदोपि स तया शोषितः कलहाग्निना॥ स विंध्यवासिनीं गत्वा तपसा प्राप तद्वरात्॥ निधानं हेमसंपूर्णं हेमपात्रं च निर्मलं॥ चक्षुस्तस्मिन्समाधाय पात्रे योयः प्रतीक्षते॥ लोके स्मिंस्तस्य तद्वारा त्सर्वजातिर्विलोक्यते॥ इति देवीगिरा ज्ञात्वा पात्रे कृत्वा स लोचने॥ प्राग्जातौ सिंहमालानं जायां मृक्षीं च दृष्टवान्॥ स्वजातिविरुद्धं तत्स कलत्रं रुषः पदं॥ समानजातिः सुभगां तेनैवालोक्य कन्यकां॥ रत्नगर्भस्य वणिजो भेजे सिंहवतीं सतां॥ निरस्य योषितो नाना प्राणिजातिविरोधिनीः॥ इत्येवं पूर्वसाजात्यविरोधात्कर्मतोपि वा॥ नृणां भार्यासु हृत्सु त्रैजोयते कलहानलः॥ ॥ सिंहपराक्रमाख्यायिका॥ ॥ वसंतकस्येति गिरं श्रुत्वाभूद्विस्मितो नृपः॥ साक्षिवादजितां तां च निरासकुवधूं पुरात्॥ अत्रांतरे सुतं प्राप तुल्यं यौगंधरायणः॥ मरुभूतिकनामानं निधानमिव संपदां॥ पुत्रं हरिशिखाख्यं च रुमण्वान्समवाप्तवान्॥ नित्योद्यतः प्रतीहारो लेभे पुत्रं च गोमुखं॥ एते सहाया वत्सेशसूनोर्विद्याधरप्रभोः॥ भविष्यंतीति जातेषु शब्दो जज्ञे नतो बरात्॥ अथ पुण्यवतां योग्ये मुहूर्ते शुभदैवते॥ असूत तनयं देवी मुरारिमिव देवकी॥ सा तेन स्फारमहसा यो रवामृतरोचिषा॥ बभौ देवी कुमारेण कार्तिकेनेव पार्वती॥ ततो महोत्सवोत्साहप्रमोदाकुलितांगनं॥ बभूव नगरं हर्षादालिंगितमिव श्रिया॥ अथोच्चचार गगनात्पुष्पवर्षपुरःसरा॥ दिव्यवाणी नृपस्याग्रे पीयूषादिव निर्गता॥ अयं विद्याधरनृपश्चक्रवर्ती तवात्मजः॥ नरवाहनदत्ताख्यो जातः कामो महीपते॥ इति शंखस्वनाविद्धं दिव्यदुंदुभिसंभृतं॥ श्रुत्वाप्सरोगीतयुतं ननंद वत्साधिपः॥ मरुभूतप्रभृतिभिर्मंत्रिसेनाधिपात्मजैः॥ सेव्यमानः स ववृधे सह लोकमनोरथैः॥ जातेनोदयभूभृद्दुर्लभमहसा तेन प्रवृद्धश्रिया हर्षोल्लासिकलाकलापनिधिना तेनामृतस्यंदिना॥ आनंदस्फुटचंद्रिकामृतसुधाकांतेन बालेंदुना सर्वाशापरिवेषभूषणतुलामासाद्य वंशोभवत्॥ ॥नरवाहनजन्म॥ ॥ इति क्षेमेंद्रविरचितायां बृहत्कथायां नरवाहनजन्म नाम चतु २८

र्थो लंभकः॥४॥ ॥अतः परं चतुर्दारिकालंभको भविष्यति॥ ॥खं गङ्गं गमुदंचदिंदुशकलं वेल्लत्कपालाकुलं पायाद्वः श्वसदंगदोरुभुजगं चंडीपतेस्तांडवं॥ यस्योद्भ्रांतभुजप्रबंधवलमावातोत्सरत्सागरस्फारांभःपटलं पुरः पटह्वासक्तं समातन्यते॥ अथ हृष्टो महीपालं प्राह यौगंधरायणः॥ स्फरो चित सुतावाप्त्या देव दिष्ट्या विवर्धसे॥ रक्षायेतव पुत्रस्य स्वयमेव पिनाकिना॥ नियुक्तः स्तंभको नाम दुरितस्तंभको गणः॥ अवतीर्णं प्रभुं ज्ञात्वा सर्वविद्याधराधिपाः॥ वर्तंते भवतः सूनोरभिषेकप्रतीक्षिणः॥ इति नारदनिर्दिष्टं निवेद्यामात्यपुंगवः॥ विदधे राजपुत्रस्य विद्याविनयसंपदं॥ प्रकृष्टानंतसामंतमौलिभास्वत्सभां सभां॥ अध्यासीनेथ नृपतौ हेमपिंगमभूत्नभः॥ ततोवतीर्य नभसः सभां विद्याधरोविशत्॥ शक्रचापांकिताः कुर्वन्भूषणानां शतैर्दिशः॥ गंडतांडवितानीलरत्नकुंडलकांतयः॥ मुखेंदोश्चक्रिरे यस्य लक्ष्मलेखामृगभ्रमं॥ श्यामव्याकोशखड्गांशुभूषितः स बभौ मुहुः॥ अदभ्रमिव बिभ्राणो नीलोत्पलदलस्रजं॥ तमागतमभिप्रेक्ष्य विस्मयानिमिषो नृपः॥ लोलहारः समुत्तस्थौ संरंभारपितांगदः॥ प्राप्तं पूजासनेन स्मिन्नराज्ञा सह सभासदः॥ तन्मुखन्यस्तनयना बभूवुर्लिखिता इव॥ पृष्टः कोसीति स प्राह शुभ्रदंतांशुसंचयैः॥ कैलासवासश्रीस्ये वरचयन्स्फाटिकीं सभां॥ नेत्रोत्सवं श्रुतिसुधां कल्याणानां च संपदं॥ किरंतिदर्शनालापसंगतानिभवादृशां॥ शक्तिवेगाभिधानोहं देव विद्याधरेश्वरः॥ कैलासवासस्त्वत्पुत्रं स्वामिनं द्रष्टुमागतः॥ सर्वविद्याभृतामेष चक्रवर्ती भविष्यति॥ हरप्रसादाद्दाकल्पं स्मरः साक्षात्तवात्मजः॥ इत्याकर्ण्य सुधासारसिक्तांग इव भूपतिः॥ अदर्शयत्सुतं तस्मै देव्योरुत्संगभूषणं॥ ततः पृष्टो निजकथां भूपालेनाभ्यभाषत॥ प्रणम्य राजतनयं शक्तिवेगः कृतांजलिः॥ ॥ शक्तिवेगसमागकथा॥ ॥ राजा परोपकारीति वर्द्धमाने पुरेभवत्॥ तस्य हेमप्रभा नाम वल्लभाभूदनंगभूः॥ कन्या कनकलेखाख्या तस्यां तेन महीभुजा॥ उदयादिजगज्जैत्रयात्रालक्ष्मीमनोभुवः॥ कनकाख्या वरपुरी दृष्टा येन स मे पतिः॥ इत्युद्वाहविधौ चक्रे व्रतं सा दृढनिश्चया॥ पुत्र्याः प्रतिज्ञां विज्ञाय प्रौढयौवनसंपदः॥ अज्ञातां च पुरीं मत्वा नृपः शोकाकुलोभवत्॥ दृष्टा कनकपुर्याख्या येन लक्ष्मीं सुतां च मे॥ स प्राप्स्यतीति विदधे नृपः पटहघोषणं॥ न दृष्टा न श्रुता वा

पिसापुरीति महीतले॥ वचोनिशम्य लोकानां राजाभूद्दृढदुःखितः॥ अत्रांतरे शक्तिदेवोद्विजन्माद्यूतकृन्नृपा॥ भूपा
लमब्रवीदित्यमया दृष्टैवसापुरी॥ इतिब्रुवाणं तं राजानीत्वास्वतनयांकितं॥ अनेनपुत्रिसादृष्टापुरीतिप्राह सादरं॥ ब्रू
२९ वा कथं वा दृष्टेति पृष्टः कनकलेखया॥ पुरीमकथयन्मिथ्यावर्णनानिपुणोथ सः॥ असकृद्दृढकृत्योयमितिमिथ्याव
चः क्रुधा॥ सतयाभृकुटिभ्रांसा वेदिकाभित्तिरस्कृतः॥ सनिरस्तोवमानाग्निप्लुष्टो दुर्गतिपीडितः॥ कनकाख्यां
पुरीं द्रष्टुं प्रययौ कृतनिश्चयः॥ तं समुत्सारितं ज्ञात्वा चिंतासंतापितो नृपः॥ श्रुत्वोचतनयां पश्यन्फुल्लयौवनमंजरीं॥ अ
वाप्तं कृतकं रत्नं पारिजातमनुष्ठितं॥ निर्जने रत्नमालेव कथं दुःखायमे सुता॥ किं निरस्तस्त्वयापुत्रि स दृष्टा येन सापुरी॥
पितुः श्रुत्वेति सा प्राह कन्या कमललोचना॥ धूर्तः सकितवोदेव न तत्त्वं किंचिदुक्तवान्॥ साधुश्चान्याहि मुष्णंति धूर्ताः सर
लवंचकाः॥ पुरा रत्नपुरे धूर्तौ बभूतां शिवमाधवौ॥ यत्कौशलेन नगरे धनवान्कोन वंचितः॥ ततो महाधनं ज्ञात्वा भूमिपाल
पुरोहितं॥ उज्जायिन्यां पृथग्वेषौ जग्मतुर्वंचनोद्यतौ॥ पूर्वं शिवः समभ्येत्य स्वैरं दंभधृतव्रतः॥ सिप्रातटे व्रतपरस्तस्थौ
विश्वासयन्जने॥ विभ्रष्टराजवेषोथ धूर्तैश्च सहमाधवः॥ तत्पुरोहितमभ्येत्य दत्तोपायनमभ्यधात्॥ अहं स्वराज्यविभ्र
ष्टो राजपुत्रो महाधनः॥ त्वयासौहार्दमाधाय सेवे राजानमुत्तमं॥ इतिशंकरदत्ताख्यः श्रुत्वा वाचं पुरोहितः॥ तथेत्युक्त्वा
स्याविदधे राजसिंहेन संगमं॥ सेवमानो नरपतिं पुरोहितगृहे स्थितः॥ स कदाचिद्दिने दैन्ययरोगान्मिथ्यातुरोभवत्॥ अ
स्वस्थमथ विज्ञाय दुःखाक्रांतः पुरोहितः॥ पुनः पुनः समभ्येत्य तमपृच्छदनामयं॥ सोब्रवीद्राजयोग्यं मे विद्यते रत्न
भूषणं॥ पात्रमानय यस्मै तद्दत्त्वायास्यामि सद्गतिं॥ पिपासोः पंचतां पुंसः सुहृदां भिषजां पुरः॥ दीर्घांधकारे पततो
दानमेव परा गतिः॥ इत्याकर्ण्यवचस्तस्य सरलात्मा पुरोहितः॥ आनिनाय बहून्विप्रान्स च तान्नाभ्यमन्यत॥ ततः सि
प्रातटस्थं तं जपव्रततपरायणं॥ पुरोहितः शिवं गत्वा प्राह मित्रमभोगतं॥ पुरोहितार्थितः प्राह शिवः कपटनिस्पृहः॥ किं
धनैरगृहस्थस्य ममेत्यामीलितेक्षणः॥ अथोपपत्तिवचनैस्तमभ्यर्थ्य पुरोहितः॥ स्वीयां पुत्रीं प्रदायास्मै प्रतिग्रहमग्रा
पयत्॥ माधवस्तद्गिरा तस्मै कान्तकृत्रिमभूषणं॥ प्रतिपाद्याभवत्स्वस्थो मूर्तां मायामिवात्मनः॥ विक्रीणानो न तो ज्ञात्वा प्राह २९

ज्जामातरं शिवं॥ पुरोहितो न कालेस्मिन्योग्यस्ते रत्नविक्रयः॥ गृहाण मे सर्वधनं मय्येवार्पय भूषणं॥ तथेत्युक्त्वापरा
र्घ्यं निधनेलेख्येन चक्रतुः॥ शिवस्तद्धनमादाय माधवेन सहानिशं॥ प्रमोदे प्राप संभोगसुधासंसिक्तमानसः॥ पुरोहितोपि
कालेन ज्ञातकृत्रिमभूषणः॥ जितः स्वहस्तलेख्येन विवादे भूपतेः पुरः॥ सयाव्याजादिदं दत्तमिति पृष्टः सभाधिपैः॥ मा
धवोप्याह दत्तं यत्तत्फलं मामुपैष्यति॥ इतिभ्रमंति कूटेन धूर्ता वंचयितुं जनं॥ कस्तेषां वचने धीमान्विश्वासं याति मायिनां
॥ शिवमाधवाख्यायिका॥ ॥श्रुत्वेति वचनं पुत्र्याः प्राह शोकाकुलो नृपः॥ पुत्रि त्वया प्रतिज्ञाय संत्रायिपातिता वयं॥ त्वं
यौवनवती गेहे कन्यकैवस्कमध्यमे॥ अप्रत्ययश्च लोकोयं न जाने किं भविष्यति॥ अल्पमंतरमासाद्य कल्पिताश्चर्यवादिनः
॥ नरास्यक्तस्वकर्माणो मोदंते साधुनिंदया॥ परापवादसंदष्टा गुणलेशासहिष्णवः॥ लीलयोत्सादयंत्येव मिथ्यादो
षं सतां खलाः॥ कुसुमाख्ये पुरे पूर्वं तपस्वी नियतेंद्रियः॥ उवास ब्राह्मणवरो हरस्वामी गुणाधिकः॥ ततः कदाचिज्जनता
मध्ये तद्गुणसंस्तवे॥ उवाच दुर्जनः कश्चिद्युष्माभिः किं तु न श्रुतं॥ बालादुरात्मना तेन भक्षितानि खिलाः पुरे॥ इति तत्सप्र
थे वाक्यमेकद्वित्रिचतुःक्रमात्॥ हा हरस्वामिना कष्टं भक्षिता बालकाः पुरे॥ प्रवाद इति सर्वत्र बभूव निरवग्रहः॥ ब्रह्मान्त
रे जनपदे तद्विवासनसंगमे॥ निजापवादनिर्विण्णो हरस्वामी सभां ययौ॥ तमागतमभिप्रेक्ष्य सामर्षभयविह्वला॥
चक्रे पेभक्षणभयात्कृतांता लोकना दिव॥ ततो व्याजिज्ञपन्सर्वान्हरस्वामी कृतांजलिः॥ दारका भक्षिताः कस्य मयाब्रू
तां स संसदि॥ कियंतस्ते कियंतस्ते पुत्राः संतीति तत्क्रमात्॥ पप्रच्छ भक्षितास्तेभ्यः कियंतश्चेति गण्यतो॥ श्रुत्वेति
तस्य वचनं गणनीयिनिजान्सुतान्॥ निर्विचारा वयमिति प्रययुर्लज्जिता द्विजाः॥ इत्यनालोच्य सद्भावं वदंत्येके त
थापरे॥ पशूनामिव पूथोयं गतानुगतिको जनः॥ ॥ हरस्वाम्याख्यायिका॥ ॥पितुः श्रुत्वेति वचनं चचाल स
नि मीहितान्॥ वज्रलेपा दृषिदंष्ट्रो मौनीनां हि निश्चयः॥ अत्रांतरे शक्तिदेवः प्रययौ दक्षिणां दिशं॥ द्रष्टव्या कांचनपुरी म
र्त्यव्यंवेति संविदा॥ ततो विंध्याटवीं प्राप्य तालहिंतालमालितां॥ ददर्श सूर्यसंकाशं मुनिं मुनितपोवने॥ पृष्टः क्व प्रस्थितो
सीति मुनिना विगतक्रमः॥ गच्छामि कांचनपुरीं कनुसास्तीत्यभ्यभाषत॥ प्रयासि न च जानासि विचित्रं तव चेष्टितं॥ अहं ताव

न्नजानामिचिरायुरपितांपुरीं॥ इतोविदूरेभ्रातामेस्थितोदीर्घतपामुनिः॥अपितानेसजानातिनचेदन्योनवित्यतं॥ इतित
स्यगिरामत्वाकांपिल्येमुनिसत्तमं॥ पप्रच्छतंसचप्राहनजानामीतितांपुरीं॥ दासराजोस्तित्रलधावुत्सलद्वीपसंश्रयः॥ मन्ये
३० सत्यव्रताख्योसौवृद्धोजानातितांपुरीं॥श्रुत्वेतिदीर्घतपसःशक्तिदेवोमुनेर्वचः॥ गंतुमुत्सलकद्वीपंप्रतस्थेकृतनिश्चयः॥स
गत्वासंप्राप्यवणिजंद्वीपगामिनं॥ समुद्रमत्स्यनामानंनिधिनाथमिवापरं॥आरुह्यतत्प्रवहणंसौहार्देननिषेव्यतं॥ ददर्श
पयसांराशिंगंभीरावर्तभीषणं॥ ब्रह्मांडमंडपस्फारस्फटिकस्तंभविभ्रमैः॥उत्तुंगविपुलाभोगतरंगैर्लंघितांबरं॥घन
गर्जितविस्फूर्जन्मुरजध्वनिनोर्जितं॥ सतांडवितमुद्दंडवीचिदोर्दंडमंडलैः॥आसेव्यमानमभितःपृथुपर्जन्यसंचयैः॥मै
नाकरक्षासंजातप्रणयैरिवभूधरैः॥संसारमिवनिःसारमायासमिवदुःसहं॥मायाजालमिवानंतंमूर्खंखलमिवोद्धतं
॥तत्रप्रवहणारूढःसोपश्यन्निखिलादिशाः॥स्फारकल्लोलपटलीदुकूलवलिताइव॥अथोदतिष्ठत्व्योमश्रीकर्ण
लागरुविशेषकः॥मेघस्तमालमलिनोबालसूकरविभ्रमः॥यातःसवृद्धिंसहसादुर्जनव्यसनोयमः॥चक्रेलोकंनि
रालोकंविमोहइवमानसं॥ ततस्तत्प्रसरोद्भूतवात्यावलयसंप्लवैः॥ पयोजलधितांव्योमव्योमतांचमहोदधिः॥त
स्मिंस्तरंगसंघट्टस्फोटिताशेषदिक्तटे॥ उद्भूतप्रलयोद्भ्रांतपुष्करावर्तकध्वनिः॥ ततस्तडितिसाटोपत्रुटिताशेष
बंधनं॥अभज्यतप्रवहणंवणिजांहृदयैःसह॥ तस्मिन्निमग्नेमत्स्येनविशालवपुषाततः॥शक्तिदेवःपरिपतन्निगीर्ण
स्तूर्णंरंहसा॥ वणिग्वरःफलहकान्सागरात्प्रापजीवितं॥ मत्स्योप्यसावुत्सलकद्वीपेबद्धोनिषादकैः॥धीवरैर्विनिवृत्ते
थमत्स्योदासपतेःपुरः॥सविप्रोनिर्ययोजीवन्दुर्ज्ञेयाहिगतिर्विधेः॥ घोरांधकारान्निर्मुक्तःशक्तिदेवोथविस्मयात्॥पृ
ष्टोदासाधिपतिनाप्राहागमनकारणं।कनकाख्यांपुरींद्रष्टुंभ्रांतोसिपृथिवीमिमां॥ नसादृष्टाश्रुतावापिततःपृष्टोम
यामुनिः॥समामुवाचदासानामस्तिसत्यव्रतःपतिः॥ तंपृच्छेतिनिशम्याहंसंप्राप्तोमकराकरं॥ तत्रप्रवहणेभग्नेनि
गीर्णोहंजलौकसा॥ दैवाद्भुतमिमांप्राप्तःकर्मबद्धोदिनान्यथा॥ इत्याकर्ण्याब्रवीद्दासःकौतुकाकुलितोद्विजं॥सत्यव्र
तोहमेवासौनदृष्टानगरीमया॥ यत्नादन्विष्यवक्ष्यामिविश्रांतिंभजनिर्वृतः॥ इतितस्यगिरातस्थौतत्ररात्रिंद्विजाश्रमे॥ ३०

DR. BHAU DAJI

शक्तिदेवप्रवहणभंगकथा॥ ॥ततःससंगतोदैवाच्चिरंद्वीपनिवासिना॥विज्ञातोमातुलेयेनभ्रात्रानिजकथांतरे॥सप्रा
हविष्णुदत्ताख्यःशक्तिदेवंमुदान्वितः॥ काकतालीययोगेनदिष्ट्यामेबंधुसंगमः॥ इत्युक्त्वातत्कथांश्रुत्वावीतनिद्रंस्मरा
तुरं॥ तंसमाश्वासयन्वीरःकथामकथयन्निशि॥ गोविंदस्वामिनामाभूद्ब्राह्मणोदक्षिणापथे॥विजयाशोकदत्ताख्यौ
तस्यपुत्रौबभूवतुः॥ दुर्भिक्षोपहतांसत्कासकदाचिन्निजांपुरीं॥प्रययौकाशिनगरींसपुत्रःसहभार्यया॥ ततःप्र
यागमासाद्यपुण्यंददर्शमहावटं॥ कपालमालाभरणंसोपश्यद्धूतिनंपुरः॥ सपृष्टोब्राह्मणंप्राहवियोगस्तेभविष्य
ति॥ क्षिप्रंविजयदत्तेनभवितासमागमः॥श्रुत्वेत्सुवासशर्वर्यांभ्रूत्यदेवालयांतरे॥ सभार्यःससुतोविप्रःसदूराध्व
श्रमाकुलः॥अशोकदत्तःसहसाब्राह्मणीचनिरंतरं॥निद्रामवापतुःसर्वदुःखविस्मरणौकसं॥ ततोविजयदत्तोभूद्द्ध
त्रांशीतज्वरार्दितः॥ फालोत्फालतनुःक्षिप्रंस्थलेमत्स्यइवाहितः॥ गाढंपित्रावगूढोपिशीतंतत्याजनैवसः॥ यत्ना
त्स्नेहगृहीतोपिमात्सर्यमिवदुर्जनः॥यथाचेवन्हिमेवासौपितरंदीनयागिरा॥मध्येश्मशानमालोक्यदूरादेवचितानलं
पुत्रविप्रासजनकश्चितान्निःस्पर्शोदूषकः॥अमंगलोनसेव्योयमितिप्रोवाचतंपिता॥ दंतवीणास्फुरद्वक्त्रोरोमांचो
द्भूतविग्रहः॥शीतज्वरार्तस्तद्वह्निंपुनःपुनरयाचत॥ पुत्रस्नेहाभिभूतेथसमाहर्तुंगतेसति॥ गोविंदस्वामिनिगते
दारकोप्यन्वगाद्द्रुतं॥ सप्राप्यतापविच्छित्तिकीर्णास्थिवितांचितां॥आलिंगन्निवसावेगंशनैर्निर्वृतिमाप्तवान्॥ततः
प्रोवाचपितरंतातेदंपरिवर्तुलं॥प्रदीप्तनरमाभातिवन्हौरक्तांबुजोपमं॥श्रुत्वेतितनयंप्राहब्राह्मणोवीक्ष्यतत्पुरः॥
एतत्कपालमनलज्वालावलयवर्तुलं॥ द्विजस्यसूनुःश्रुत्वेतिकाष्ठाग्रेणजघानतत्॥ येनतत्स्फुटनोद्दीर्णवसासिक्त
मुखोभवत्॥आस्वाद्यैवसमादायतत्कपालंसमाकुलः॥ पीत्वासांवमहाकायोबभूवातिभयंकरः॥ सोभूत्प्रकटदंष्ट्रा
ग्रविकटोनिशिराक्षसः॥ यस्याट्टहासेनदिशःचक्रंदुःस्फुटिताइव॥ तस्मिन्चेगात्समारुष्यपितरंहंतुमुद्यते॥मा
कृथाःसाहसमितिप्रादुरासीद्दिवोदिवः॥सत्काजनकमाकाशमाविश्यप्रययौजवात्॥ कपालस्फोटनामायंसमाहूतः
सराक्षसैः॥ प्रातःस्नातवियोगार्तिदह्यमानतनुर्द्विजः॥सभार्योविललापोच्चैःकारुण्याद्दक्षितोजनैः॥ ससमुद्रदत्तनाम्ना

थवणिजादुःखकर्थितः॥ समाश्वास्यगृहंनीतास्ततोनिजधनेनविभुः॥ स्मरन्महाव्रतिवचः पुत्रसंगमलालसः॥ सततस्थौव
जोगेहेमनोरथशताकुलः॥ अशोकदत्तः शास्त्रार्थकलाविद्याविशारदः॥ द्वितीयोथद्विजसुतः प्रख्यातोनगरेऽभवत्॥ अत्रां
तरेनरपतिः प्रतापमुकुटाभिधः॥ समायातेमहामल्लेतद्युद्धायजुहावतं॥ अशोकदत्तस्तंभूपपुरोबलवतांवरन्॥ दाक्षिणा
त्यंमहामल्लमपातितमपातयत्॥ तत्कर्मतुष्टोथनृपस्तंचक्रेभाजनंश्रियः॥ विचित्रकर्मातिशयैः किमलभ्यंमहात्मभिः॥ से
वाविदग्धः सततदायुक्तालापोदिवानिशं॥ छायेवतस्थौनृपतेरवस्थोचितसन्नतिः॥ अथकालेनभूपालः शिवाचार्यैर्विनिर्गतः
॥ दूरात्प्रदोषसंध्यायांशुश्रावविजनेगिरं॥ राजन्नत्यापराधोहंशत्रुप्रेरणयासकृत्॥ दंडपालेननिहितः शूलेनिर्घृणचेत
सा॥ दिनमद्यचतुर्थंमेशूलस्थस्येवजीवितः॥ प्राणाः कष्टेननिर्यांतिनहिदुःकृतकर्मणां॥ भृशंमांबाधतेतृष्णातांनिवार
यभूपते॥ श्रुत्वेतिराजाकारुण्याद्दिदेशाग्रस्थितंद्विजं॥ अशोकदत्तोप्यादिष्टः क्ष्माभुजादिशिधैर्यभूः॥ ययौकलशमादाय
श्मशानंभीरुघट्टनं॥ सतत्रशूलप्रोतस्य ददर्शाधस्थितांवधूं॥ दिव्याभरणरोचिष्णुप्रभांसिद्धिमिवात्मनः॥ साप्राहवल्ल
भोयंमेराज्ञाशूलेसमर्पितः॥ अर्थानिवातिकृपणः प्राणान्यत्नयनमुंचति॥ अस्यानुमरणोद्युक्तास्थिताहंविजनेनिशि
॥ तृषितोयाचितेवारिमामयंव्यथयन्मुहुः॥ शूलप्रोतोद्धतग्रीवंदैवान्नवमिवेश्वरं॥ नास्मिपाययितुंशक्ताजलमेनम
धस्थिता॥ अशोकदत्तः श्रुत्वेतिकरुणार्द्रिरुवाचतां॥ मातर्मत्स्कंधमारुह्यदेह्यस्मैशीतलंजलं॥ श्रुत्वेतितन्म्रवपुषसा
पद्भ्यामारुरोहतं॥ प्रत्यग्रंनिपतद्भूमौरुधिरंचददर्शसः॥ उत्तानवदनोदृष्ट्वाभक्ष्यमाणंतयैवतं॥ अशोकदत्तोजग्राह
तस्याः पादंसनूपुरं॥ सात्यक्त्वानूपुरंप्रायाद्दूरंखंविहायसा॥ द्विजात्मजस्तदादायप्रययौचनृपांतिकं॥ तद्धीरचरितं
ज्ञात्वाददौतस्मैमहीपतिः॥ सुतांमदनलेखाख्यामनालेख्यामिवश्रियं॥ कदाचिदथतंदिव्यनूपुरंवीक्ष्यभूपतिः॥ तु
ष्टोस्यान्यः कुतः प्राप्यइत्याहोत्कलिकाकुलः॥ अभिप्रायंनरपतेर्विज्ञायकृतनिश्चयः॥ श्मशानंनूपुराहारीसपुनः प्रययौ
द्विजः॥ विक्रीणानोमहामांसंमंत्रात्कृष्टमहाशवः॥ गृहाणेत्युच्चयावाचावचाराश्रावयन्दिशः॥ तत्रराक्षसकन्याभिः संग ३९
तः सत्वसागरः॥ कामिनींसप्तमासाद्यप्रत्यभिज्ञामवाप्तवान्॥ ममैवासौपुरानीतस्त्वयावीरद्वनूपुरः॥ गृहाणरत्नरुचिरं

द्वितीयमपिनूपुरं॥ इत्युक्त्वानूपुरंतस्मैसासुतांचददौप्रियां॥ यस्सुरः कांतिदारिद्र्याद्विनिद्रोनिशिचंद्रमाः॥ विलासालंकृतमदां
मदालंकृतविभ्रमां॥ आकारालंकृतानंगामनंगालंकृताकृतिं॥ विद्युल्लेखांसुतांप्राप्यसतांविद्युत्प्रभाभिधां॥ हेमाब्जंनूपुरंतत्र
पुनः प्रायान्नृपांतिकं॥ राजाप्रतापमुकुटोनूपुरप्राप्तिनंदितः॥ कमलाकेलिकमलाकारंप्रापतदंबुजं॥ राज्ञः शंकरपूजायैज्ञा
लान्यकमलार्थिनां॥ अशोकदत्तः प्रययौपुनर्नक्तंचरींप्रति॥ तंयाचमानंहेमाब्जंसाश्वश्रूः प्राहराक्षसी॥ त्रिघंटनाम्निहिम
वच्छिखरेस्तिपतिर्मम॥ लंबजिह्वइतिख्यातस्तेनतत्रास्तमंबुजं॥ प्रभोः कपालविस्फोटनाम्नोराक्षसभूपतेः॥ इतितद्वा
क्यमाकर्ण्यनयमोराक्षसप्रभो॥ नत्यहेमांबुजसरोजगादेतिद्विजात्मजः॥ तयाविहायसानीतस्तत्रतत्रकांचनंसरः॥ जघान
रक्षोरक्षांसिसमारुतिरिवापरः॥ स्वयंकपालस्फोटोथनिहताशेषराक्षसे॥ तंददर्शसरस्तीरेशापंदृष्ट्वेवचात्यजत्॥ शा
पमुक्तः परिज्ञायभ्रातरंसंभ्रमाकुलः॥ भ्रातर्विजयदत्तोहमिसाहप्रणनामच॥ अभवंराक्षसपतेरहंसेनापतिश्चिरं॥ गंधर्वै
र्निहितेतस्मिन्नवापंनसदंततः॥ अधुनामुक्तशापोहंश्रुत्वेत्यनुजभाषितं॥ अशोकदत्तः स्वजनैः संगतः प्रापनिर्वृतिं॥ प्रज्ञ
प्तिकौतुकाभिख्योविद्याधरपतिस्ततः॥ तौबभाषेयुवांपूर्वंविद्याधरकुमारकौ॥ गालवस्यमुनेः कन्यांदृष्ट्वाकामवशंगतौ॥
तच्छापान्मर्त्यजन्मेदंयुवयोः क्षपितंचनत॥ गृहीतमधुनाविद्यामित्युक्त्वाविततारसः॥ ततोविद्याधरपदंप्राप्यतौसहबांधवैः॥
गोविंदकूटनामानंदिव्यंचव्योमगंपुरं॥ ननंदतुस्तमप्येवंप्राप्तः शोकेश्रियः पदं॥ ॥अशोकदत्ताख्यायिका॥ ॥श्रुत्वे
तिमातुलस्कृतादपरेद्युरुपेत्यतं॥ सत्यत्रतंदासपतिंशुश्रावनिजवांछिते॥ चित्रकूटाख्येद्वीपेसमुद्रेणप्रतिष्ठितः॥ विस्मु
स्तद्वादशीयात्रासमाजेबहुसंगमे॥ सर्वद्वीपागतजनैः संकेसाज्ञायतेपुरी॥ श्रुत्वेतिदाससहितः शक्तिदेवोबुधियो॥ ब्र
जन्योतेनजलधौद्विजंदासाभिधोभ्यधात्॥ इदमावर्तसंघट्टमहावेगतरंगिभिः॥ वाडवाग्नौप्रवहणंपातितंमेमहानिलैः
अयंमहावटतरुर्जलेदिव्यस्थलेरुहः॥ शाखामस्यावलंबस्वनाहंशक्तोज्वरान्वितः॥ इत्युक्त्वाविटपालंबितनौतस्मिन्भमज्ज
सः॥ धनंपुण्यवतामेवपरार्थेजीवितव्ययः॥ ततस्तरुलतासक्तोनिशिशोकानलाकुलः॥ ददर्शांतंमहावृक्षंमहाकायैःखगैर्वृ
तं॥ तेषामेकोगिरींद्राग्रेजटायुरिवजर्जरः॥ अवदन्मानुषगिरागत्यागमकथांतरे॥ यूयंयुवानोगंतारः प्रातर्वेगगिरिंशोदश॥

गंतव्या कांचनपुरी दृष्टेन तु मया चिरात्॥ अपि गंतुं न शक्यासा तद्यूयं यात मा चिरं॥ श्रुत्वेति दासनिधनं प्रशंसो कोपि जह
र्षसः॥ पुंसां स्वकर्मवैचित्र्यान्न दुःखं न सुखं सदा॥ ततः प्रविश्य तद्वक्त्रः पश्चान्तविवरोदरे॥ तद्दृगपानात्स्व्यूषे तां प्राप सपु
रीं क्षणात्॥ ततस्तां कांचनपुरीं कांचनस्तंभतोरणां॥ कौतुकानां कुलगृहं निधानं सर्वसंपदे॥ मनोरथैरप्यगम्यामप्राप्यां
पवनैरपि॥ प्रमोदनिर्भरो दृष्ट्वा ददर्श ललितांगनाः॥ नीतः प्रियंवदस्ताभिः संभाष्य मणिमंदिरं॥ विद्याधरेंद्रतनयां ददर्शा
नंगमंगलां॥ लीलाशिखिशिखंडाभनेत्रच्छायावतंसकां॥ पुनः श्रीकंदशाबरानुब्रतामिव पार्वतीं॥ तारुण्यकुंजरारूढां वि
लासकमलाकुलां॥ मूर्तामिव मनोजस्य त्रैलोक्यविजयश्रियं॥ विद्रुमद्रुमलावण्यलुंटाकैरधरांशुभिः॥ बालातपैरिव
स्पृष्टां कामकेलिवनस्थलीं॥ अदृष्टविभ्रम महीं नेत्रामृततरंगिणीं॥ विलोक्य शक्तिदेवस्तां विस्मयादित्यचिंतयत्॥ वि
भ्रमाभरणं रूपं लावण्याभरणं वपुः॥ अहो बालकुरंगाक्ष्या विलासाभरणा स्थितिः॥ निवेदितात्मवृत्तेन प्राप्तसत्कारसं
पदा॥ पृष्टा निजकथां तेन सा बभाषे शुचिस्मिता॥ पिता मे शशिखंडाख्यः श्रीमान्विद्याधराधिपः॥ चतस्रस्तनयास्तस्य
ज्येष्ठा तासामहं विभो॥ अहं चंद्रप्रभा नाम चंद्रलेखा ममानुजा॥ शशिप्रभा च क्रमतः शशिलेखा च कनकप्रभा॥ शापाद्दृष्टो
ग्रतपसो मुनेर्मर्त्यं च मागताः॥ जातिस्मरा भगिन्यो मे बभूवुः शोकदाः पितुः॥ तदुःखात्यक्तराज्ये थयाते ताते तपोव
नं॥ इह स्थिताहमेकैव भगिनीसंगमाशया॥ गौरीपुरा मा भवदत्मानुषस्ते भविष्यति॥ पतिर्विद्याधराधीशापदं प्राप्या
नुजाश्च ते॥ भवानेवाभिरुचितो जनस्यास्य मनोगतः॥ पित्रे निवेदयाम्येतत्स्वाधीना न हि कन्यका॥ त्वत्संगमे गुरो
राज्ञां प्राप्तुं गच्छाम्यहं वनं॥ विनोदयेथा हृदयं त्वमिहैव क्षणांतरं॥ ऊर्ध्वमंदिरपाली च द्रष्टव्या नैव तु त्वया॥ इत्युक्ता
प्रययौ कांता लिंपंती कांतिभिर्नभः॥ कौतुकाकुलितः सौधप्रविष्टो मंदिरावलीं॥ ददर्शायोपितल्पस्त्रः शयाना गा
तजीविताः॥ पृथग्देशेषु पर्यंकेषु च्छचीनपटावृताः॥ सजीवाद्रवहारिण्य श्चित्रस्था इव निश्चलाः॥ पूर्वमंशुकमुद्धा
त्य ददर्शैकां स कमध्यमां॥ जित्वा जगत्स्मृतिभुवाप्यस्तां चापलतामिव॥ स्वयं कंदर्पगुरुणा प्रतिधानत्र शांसिनीं॥
अधिवास इव न्यस्तां शयने कांतिदेवतां॥ ततः कांचनलेखां तां परिज्ञाय महीपतेः॥ परोपकारिणः पुत्रीं प्रदध्यौ

विस्मितः क्षणं॥ विरहे वीनलालोलप्रवासव्यसनांबुधौ॥ यत्कृते हं निपतितः सैवेषा मन्मथौषधी॥ इंद्रजालमिदं किं
स्विदथवा स्मरवंचना॥ ध्यात्वेति शक्तिदेवोथ क्रमेणान्यां ददर्श च॥ तां दृष्ट्वा विस्मयाविष्टो मंदिरेभ्योवरुह्य सः॥ अप
श्यद्दिव्यतुरगं भास्करस्यैव विस्मृतं॥ खुरेणोत्सारितस्तेन पतितः सरसीजले॥ वर्धमानपुरोपांता दुन्मज्जत्स संभ्रमः॥
स्वप्नदृष्टमिवाशेषं मन्यमानोति दुःखितः॥ भ्रांत्वा नगरवीथीषु राजद्वारमवाप्तवान्॥ दृष्टा हेमपुरी येन लभ्यते स नृपात्म
जां॥ पुनः श्रुत्वेति पटहं प्रतीहारमुवाच सः॥ सा मया कांचनपुरी दृष्टा राज्ञे निवेद्यतां॥ इति तस्य प्रतीहारो वचः क्ष्मायं व्य
जिज्ञपत्॥ न्यस्तः कनकलेखाग्रे शक्तिदेवोथ भूभुजा॥ मया दृष्टा पुरीत्याह सत्यान्स प्रतिभोधिकं॥ असत्यवादी धूर्तो
यं पुरास्माभिस्तिरस्कृतः॥ परोपकारितनया प्राहेति क्षणदुःखिता॥ शक्तिदेवो वदत्सुभ्रु दृष्टा चंद्रप्रभा भुजः॥ ति
स्रः कनकपुर्यां त्वं तासां मध्ये मयेक्षिता॥ जातिस्मरा निशम्येति राजपुत्री कृतादरा॥ तस्याजमानुषं देहं निर्मोकमिव
पन्नगी॥ प्रयाता कांचनपुरीं तां विलोक्य विहायसा॥ अनुगंतुमशक्तोसौ बभूव भृशदुःखितः॥ पुनरध्यवसायैक
सहायः पुरसंचयान्॥ ग्रामारण्यनदीशैलान्लंघयन्प्रययौ शनैः॥ विटंकपुरमासाद्य तमेव वणिजं पुनः॥ समुद्रमस्य
नामानं ददर्शास्ये तविस्मितः॥ तीर्णः फलके हेनाद्भभग्नपोतेन दाबुधौ॥ पित्राय दृष्ट्यास्तेन वीक्षितो द्वीपगामि
ना॥ इति तद्वाक्यमाकर्ण्य कथयित्वा निजां कथां॥ तत्कल्पितप्रवहणः शक्तिदेवो बुधिं ययौ॥ द्वीपमुत्स्थलकं प्राप द
ष्टः सत्यव्रतात्मजैः॥ अनेन नः पिता नीतो हतो वेत्यभिभर्त्सितः॥ तद्वाक्यासितरं ज्ञात्वा वडवाग्निपतं गतां॥ यातं तेन क्रु
धा विप्रं यागे पशुमकल्पयत्॥ स गाढनिगडाबद्धः स्वप्ने कात्यायनीवरात्॥ ज्ञात्वा विद्याधरीं गूढां भेजे सत्यव्रतात्म
जां॥ विमुक्तबंधनः प्राप कन्यां बिंदुमतीं कृती॥ गोमांसभारनम्रांसं ददर्शाश्वपचं पथि॥ दासपुत्री च तं दृष्ट्वा हर्म्यस्था
प्राह वल्लभं॥ गवां गरसले शोन जातास्म्यनुचिते कुले॥ गोमांसभक्षणात्पापान्न जाने यांति कां गतिं॥ धेनुस्नायुमयी
तंत्री मया दंतेन खंडिता॥ वीणाविनोदे तत्पापादियं मे दाससंगतिः॥ श्रुत्वेति स्वकथां पृष्टा शक्तिदेवेन सा वदत्॥ भवि
ष्यत्यपरा भार्या तवोत गर्भपाटला॥ यदेवास्मत्कथामेतां ध्रुवं ज्ञास्यति वल्लभा॥ इति बिंदुमतीवाक्यं श्रुत्वा विप्रः सकौतुकः॥

बहिः कलकलं श्रुत्वा निर्ययौ सज्जकार्मुकः ॥ ततः पुंजीकृतजनं ददर्श कज्जलच्छविं ॥ क्रोडानुसारी सहसा शक्तिदेवो रसा
तलं ॥ प्रविश्य नस्य नगरीं वापीं कन्यां च दृष्टवान् ॥ तमाह कन्यका दैत्यः सूकरो यं त्वया हतः ॥ अद्यैवास्मि हतानेन राजपुत्री
जनद्विषा ॥ प्रभो गृहाण मे पाणिं तुल्यो ऽसि मम वल्लभः ॥ इत्युक्तवाक्यां तां प्राप्य स जगाम यथागतं ॥ ततस्तां बिंदुलेखा
ख्यां काले नालोक्य गर्भिणीं ॥ ज्येष्ठा बिंदुमती प्राप शक्तिदेवं रहस्थिता ॥ अस्याः पाटय गर्भं त्वमिति श्रुत्वा विकूणितः ॥
स समेत्याप रां कांतामभूद्ध्यानपरायणः ॥ सा वदत्खिन्नमालोक दयितं सस्मितानना ॥ प्रियपाटय मे गर्भं बिंदुमत्या वचः
कुरु ॥ श्रुत्वेति बिंदुलेखायाः वाक्ति देवो ऽतिविस्मितं ॥ सर्वज्ञां मन्यमानस्तामुवाच रचितांजलिः ॥ नृशंस कर्म पापिष्टं कथ
मस्माद्विधो जनः ॥ कुर्यात्त्वं च कथं ज्ञात्वा तत्पापमनुमन्यसे ॥ इति प्रियतमेनोक्ता बिंदुलेखा वदत्पुनः ॥ नैतद्दश्रेयसे कर्म शृ
णु चित्रकथामिमां ॥ कुंचुकस्थाननिलयो देवदत्तः पुरा द्विजः ॥ द्यूतापहारिताशेषधनो वभ्राम भूतले ॥ महाव्रतिनमासा
द्य जालपादाभिधं ततः ॥ तेनार्थितो बभूवासौ तन्मंत्रोपरिसाधकः ॥ तेनादिष्टस्ततः गत्वा श्मशानं वटशाखिनि ॥ पूजां कु
र्वन्मधूपार्घ्यबलिपूर्णां प्रयच्छति ॥ निष्पन्नसिद्धिः कालेन प्रविश्य स वटांतरं ॥ लेभे यक्षकन्यां कांतां सिद्धिं मूर्तिमतीमिव ॥ हि
रण्यवर्णानाम्नस्तां तनयां यक्षभूपतेः ॥ विद्युन्मतीं समामंत्र्य जालपादांतिकं ययौ ॥ जालपादो ऽथ तं प्राह सिद्धो हर्षसंप्लुतः ॥
गच्छ गर्भं समुत्पाद्य तस्यास्तूर्णं समानय ॥ महाव्रतिवचः श्रुत्वा ययौ यक्षसुतांतिकं ॥ स पापकर्मनिर्विण्णो नो चेत्किं चिदधो
मुखः ॥ विज्ञायतदभिप्रायं प्राह यक्षसुता द्विजं ॥ क्षिप्रं पाटय मे गर्भं मास्म भूः संशयाकुलः ॥ तच्छ्रुत्वाप्यतिकारुण्यान्न च
कार नृशंसवत् ॥ यदा तदा स्वयं सा गर्भं पाटयित्वा स्वयं ददौ ॥ प्राप्यते भक्षयित्वैतद्विद्याधरगतिः प्रभो ॥ इत्युक्तः स तदा ग
त्वा तद्गर्भं व्रतिने ददौ ॥ जालपादो ऽपि विधिना भुक्त्वा तं गर्भमात्मना ॥ विद्याधरगतिं प्राप्त एक एवान्यवंचकः ॥ वंचितो देवद
त्तो ऽथ निष्पेषव्यरुभक्षणात् ॥ जालपादेन भूमिष्ठस्तं ददर्श नभोगतिं ॥ वंचितो हं कृतघ्नेन ध्यायन्निति स दुःखितः ॥ दत्वा
स्वमांसं विदधे वीरो वेतालसाधनं ॥ वेतालवाहनो गत्वा देवदत्तो विहायसा ॥ विद्याधरपदं प्राप्य जालपादमवासवान् ॥ य ३३
क्षजातिविमुक्तां च प्राप्तां वैद्याधरं परं ॥ विद्युन्मतीमवाप्यासौ जालपादमपातयत् ॥ वेतालबलविभ्रष्टे महाव्रतिनि सद्द्विजः ॥

विद्याधरो बभूवैवं तत्राप्यस्ति पुरः शुभं ॥ श्रुत्वैवं शक्तिदेवो ऽपि प्रसन्नहृदयो ऽभवत् ॥ ॥ देवदत्ताख्यायिका ॥ ॥ क्षिप्रं पा
टय मे गर्भं नैतद्दश्रेयसे तव ॥ इति तद्वाक्यमाकर्ण्य शुश्राव नभसो गिरं ॥ शक्तिदेवाविचार्यैव गर्भं पाटय पाटय ॥ राजा कनक
पुर्यास्त्वं व्योमचारी भविष्यसि ॥ इत्युक्तस्तद्विधायासौ त्यक्तजीवां प्रियां पुरः ॥ आकाशगामिनीं दृष्ट्वा गगनाद्दशृणोत्पुनः ॥
कंठे पाडय गादं तं गर्भमेनं विनिःसृतं ॥ श्रुत्वेति मुष्टिना गादं तं जग्राह महाशयः ॥ स तेनापीडितो गर्भः खड्गो ऽभूद्भुजगच्छविः
॥ पुलोसलवनानीव यत्प्रभाभिरभून्नभः ॥ यातायां बिंदुलेखायां प्राह दाससकृतापतिं ॥ अयं खड्गस्त्वया प्राप्तो विद्याधर
गतिप्रदः ॥ अहं कनकलेखाख्या बिंदुलेखा च यात्वया ॥ शापेनैव गतप्राणा दृष्टा वल्लभ तावयं ॥ स्थिता कनकपुर्यां साज्येष्ठा चं
द्रप्रभा मम ॥ क्षिप्रं तदेहि गच्छावः शापो ऽसौ विगतो ऽघनः ॥ इति तद्वचनाद्धीमसमुत्पत्य तया सह ॥ शक्तिदेवो ययौ खड्गी पुरीं तां
कनकाह्वयां ॥ चतस्रः कन्यकाः प्राप्य स्मरसागरचंद्रिकाः ॥ तत्र विद्याधरो भूत्वानंदामंदविभ्रमः ॥ शान्निखंडश्रियं प्राप्य श
क्तिदेवो महाशयः ॥ शक्तिवेगाभिधां लेभे खड्गविद्याधरेश्वरः ॥ इत्यासाद्विभवं वत्सेश्वरचिरायय ॥ सो ऽहमेवागतो द्रष्टुं त्वत्सु
तं नरवाहनं ॥ सर्वविद्याभृतां नाथो दृष्टो यं तनयस्तव ॥ स्वस्त्यस्त्विदानीं गच्छामि पुनरस्तु समागमः ॥ ॥ शक्तिवेगकथा ॥ ॥
इति गिरममृतौघस्यंदिनीं वत्सराजः प्रियसचिवसहायस्तस्य रम्यां निशाम्य ॥ अभवदतुलहर्षस्मेरकांतिप्रतानप्रकटित
निजसूनुस्वच्छकीर्तिप्रवाहः ॥ आमंत्र्य राजानमदीनसत्वो विद्याधरेंद्रो दिवमुत्पपात ॥ कुर्वन्मुहुः कुंडलतांडवेन मार्तंडमाला
भरणा इवाशाः ॥ ॥ इति क्षेमेंद्रविरचितायां बृहत्कथायां चतुर्दारिकानाम पंचमो लंभकः ॥ ५ ॥ अतः परं सूर्यप्रभो भवि
ष्यति ॥ ॥ देवो भवः स भवतां भवताद्विभूत्यै यस्यावहंत्यसितभूषणभोगिभोगाः ॥ नेत्रानलाकलितकालकलेवरोत्थप
र्यस्तधूमपटलीवलनाविलासं ॥ ततः कदाचिद्वत्सेशो सर्वास्थानसभास्थिते ॥ तप्तकांचनसच्छायमहाद्दृश्य नभस्तलं ॥ ग
गनादवतीर्याथ स्रग्वी रुचिरकुंडलः ॥ द्वितीय इव मार्तंडः सभां विद्याधरो विशत् ॥ स नेत्रनंदसंमोहशशांको रुचिरांबरः
॥ पूजितो वत्सराजेन पृष्टः प्राहाश्रितामनः ॥ राजन्नशेषभुवनोद्यानचंद्रोदयश्रिया ॥ त्वत्कोर्त्यामानसोल्लासः कस्य नाम न
जायते ॥ सर्वविद्याधरेंद्राणां चक्रवर्ती तवात्मजः ॥ भविता शंकरादिष्टस्तमहं मागतः ॥ अथ प्राप्तनिजोत्साहमेनं वेदाम

हेवयं॥ जनैरभ्यधिकानंदैर्बालेंदुरभिवंद्यते॥ शिखरे वज्रकूटाख्ये तुषारधरणीभृतः॥ राजा वज्रप्रभाख्योहं विद्या
भिर्वज्रविग्रहः॥ विद्याधरश्रियं पूर्णां शासतः शिवसेविनः॥ सप्रभावान्प्रणमतो यानाकल्पत्रयी मम॥ त्वत्पुत्रोस्मत्प्रभुः
कल्पं चक्रवर्ती भविष्यति॥ नरवाहनदत्तो सौ पुरा सूर्यप्रभो यथा॥ पृष्टः सूर्यप्रभकथां प्राह विद्याधराधिपः॥ देवीभ्यां
सहितो देवसुहृद्भिर्मंत्रिभिस्तथा॥ शृणु प्राप्ता मनुष्येण यथा विद्याधरेंद्रता॥ मद्रेषु शाकलपुरे राजा चंद्रप्रभो भवत्॥ इं
द्रास्थाने सुरस्त्रीभिर्गीयते यत्पराक्रमः॥ सर्वभोगसमृद्धेन प्राज्याज्यज्वलिताग्निना॥ यज्ञेनाथ वर्णोक्तेन यो रुद्रं सम
तोषयत्॥ तस्य कांतिमती नाम कांतिकल्लोलिनी प्रिया॥ भ्रूविभ्रमभ्रमद्वीचिरभूत्सौभाग्यवारिधेः॥ तस्य स्कंद इवेशा
स्य जयंत इव वज्रिणः॥ सूर्यप्रभोभवत्सूनुः प्रतापाक्रांतभूधरः॥ बभूवुः सचिवास्तस्य समग्रगुणदर्पणाः॥ महार्थ
श्च प्रभावश्च भासः सिद्धार्थकस्तथा॥ चंद्रप्रभो ददौ तस्मै यौवराज्यं मुदान्वितः॥ स्वयमेवार्पिता धन्ये रन्ये यश्श्रीर्विलोक्य
ते॥ ततः कदाचिदास्थाने सपुत्रं तं नरेश्वरं॥ दानवाधिपतिः साक्षान्मयः कार्यार्थमाययौ॥ तमालश्यामलः शुभ्रदंष्ट्रांशु
त्रिबलच्छविः॥ बलाकावलयप्राप्तः प्रावृषेण्य इवांबुदः॥ स्फुरत्कुंडलकेयूरमौलिरत्नांशुसंचयैः॥ नृत्यच्छिखंडिवलयो
नीलाद्रिरिव जंगमः॥ स पूजितो नृपतिना भेजे स्फाटिकमासनं॥ गजेंद्र इव विस्फारतुषारगिरिकंदरं॥ नम्रेण भूभुजा पृष्टः
प्राहागमनकारणं॥ स्निग्धगंभीरनिर्घोषो विवर्षिषुरिवांबुदः॥ राजन्महेश्वरादिष्टः पुत्रं सूर्यप्रभं तव॥ प्राप्तः समस्त
विद्यानां नेतुं भाजनतामहं॥ विजित्य श्रुतिशर्माणमेष विद्याधरेश्वरं॥ विद्याभृतां चक्रवर्ती भविता शिवशासनात्॥ पक्षे
स्थिताः सुराः सर्वे शक्राद्याः श्रुतिशर्मणः॥ वयं च तव पुत्रस्य दानवाः पक्षमाश्रिताः॥ इति तद्वचसा राजा हर्षपीयूषनि
र्भरः॥ उवाच त्वत्प्रसादेन सर्वं मे तद्भविष्यति॥ धन्यः सुतो मे यस्य त्वं श्रेयसे स्वयमुद्यतः॥ त्वादृशां दर्शनेनापि भवंती
प्सितसिद्धयः॥ इति ब्रुवाणं भूपालं नम्रमामंत्र्य तद्गिरा॥ सूर्यप्रभं ससचिवं पातालमनयन्मयः॥ तत्र तस्मै ददौ विद्यां सा
नुगाय यथाविधि॥ भूतासनं विमानं च स्वयमेव विनिर्मितं॥ प्राप्तविद्यो विमानेन तूर्णमेत्य रसातलात्॥ ववंदे राजतन
यो जननीजनकं तथा॥ ततस्तेन विमानेन विचरन्पितुराज्ञया॥ दिव्यस्मराकृतिः प्राप कन्यकाः स्वयमागताः॥ गांधर्वेण ३४

विवाहेण भेजे पूर्वं सुलोचनां॥ लावाणकपतेः पुत्रीं पौरवस्य महीभृतः॥ राज्ञो वीरभटाख्यस्य ताम्रलिप्तपतेः सुतां॥ लेभे
मदनसेनाख्यां मदनोद्यानमंजरीं॥ चीनकोटाधिनाथस्य सुरंभाख्यस्य चात्मजां॥ संपूर्णचंद्रवदनां विद्युन्मालामवाप्तवा
न्॥ सुभटाख्यस्य तनयां कोंकणाधिपतेस्तथा॥ आससाद सुधाख्यां दिसौंदर्यां चंद्रिकावतीं॥ जनमेजयस्य पुत्रीं च कौ
शांब्यां हरिणेक्षणां॥ वरपुष्पाभिधां प्राप जित्वा विघ्नार्थमुद्यतं॥ खेचरं हरिणा साक्षात्समरे परिपालितं॥ दामोदराभिधं
वीरं मायार्थपुरवासिनं॥ राज्ञो रंभाभिधानस्य सुतां वज्रपुरप्रभोः॥ प्राप तारावतीं नाम त्र्यामां शीतांशुसुंदरः॥ तेषां महा
भुजां गत्वा सानुगो गगनाग्रगः॥ पुराणि क्रमशो भेजे ताभिः परिणयोत्सवं॥ स ताभिः सह कांताभिः स्मरसंभोगदीक्षितः॥
रेजे निजपुरीं प्राप्य वाहिनीभिरिवांबुधिः॥ ततः कदाचिदास्थानसभां पित्रा समाश्रितां॥ समेत्य पूजितः प्राह श्रीमान्म
यमहासुरः॥ राजपुत्र रिपुध्वंसे किमद्यापि विलंबसे॥ प्रतापः कुंठतां सत्त्वं यात्यनुद्योगमंथरः॥ मानिनां सत्त्वमहतां वी
राणां शौर्यशालिनां॥ उत्साहारंभमात्रेण जायंते सर्वसंपदः॥ इति तद्वचसाक्षिप्ते राजसूनुर्जयोन्मुखः॥ नृपेभ्यः प्राहि
णोद्दूतांस्तूर्णमागम्यतामिति॥ राज्ञां स्पृष्टेषु दूतेषु सुहृत्संबंधिबंधुषु॥ सूर्यप्रभः सहामात्यो बभूव समरोत्सुकः॥ अ
त्रांतरे सुरमुनिः प्रभापिंजरितांबरः॥ तां सभां नारदोभ्यायाद्विसृष्टः शतमन्युना॥ स प्रविश्यात्तसत्कारः संप्राप्य क
नकासनं॥ शनैरुवाच राजानं दानवाधिपसंनिधौ॥ अभिधत्ते सहस्राक्षः क्षमापते त्वां प्रमादिनं॥ रुद्रयज्ञोद्धतः किं त्वं म
माप्यप्रियमीहसे॥ कुलक्रमागतोस्माकं श्रुतिशर्मा महाबलः॥ विद्याधराणां तस्य त्वं प्रतिपक्षदशाश्रितः॥ तस्य स
र्वं च युद्धविजयाशंसिनः स्वयं॥ रुद्रयज्ञकृताश्वासः किं वृथा नृप माद्यसि॥ एकयज्ञोद्धतो राजा सहस्रशतयाजि
भिः॥ स्पर्द्धां दधानस्त्रिदशैः कथमेको न लज्जसे॥ बलवद्भिर्विरोधो हि हास्यायैव न सिद्धये॥ विपुलो दुर्गतस्येव
धनिकस्पर्द्धया व्ययः॥ नारदेनेति कथिते जातक्रोधेऽथ भूपतौ॥ मयः प्राह स्फुरत्कोपकंपव्याकुलकुंडलः॥ भगवन्न
परिज्ञाय वीर्यं सत्त्वबलाबलं॥ संदिष्टं सुरराजेन रुद्रयज्ञावमानिता॥ सहस्राक्षमुखा यस्य गीर्वाणाः पक्षमाश्रिताः॥ स
खेचरश्रियं भुंक्ते श्रुतिशर्मा किमद्भुतं॥ किं च सूर्यप्रभं जेयसे रुद्रः स्वयमुद्यतः॥ यदिच्छामात्रसंपत्तिजगतां प्रलयोदयः॥

शाक्यः कतुशतानां वा तच्छ्रीरिन्द्रस्य तद्यदुच्यते॥ तत्र ब्रूमः क्रतुर्नाम बाह्यद्रविणडंबरः॥ किंच जीर्णविपुलायासैः किं व्रतैः कायशो
षणैः॥ निर्व्याजसेवा सुभगा भक्तिर्येषां महेश्वरे॥ पक्षपातेस्थिता पूज्य मस्माद्वैरिकुलेष्वयत्॥ तत्र शोकास्पदं युष्माकमभा
वो विदितो हि नः॥ बलेन वंचितो यत्र बलिस्तत्कस्य मानसे॥ प्रीणाति यच्च मुनयस्तेन वृत्र सुखावहता॥ मयः स्थेति तच्च श्रु
त्वा स मामंत्र्य नृपं ययौ॥ भगवान्नारदो व्योम्ना चंद्ररश्मिरिवोज्ज्वलः॥ ततश्चंद्रप्रभो राजा दूतैः संबंधिनो नृपान्॥ आनि
नाय मयेनोक्तः पुत्रस्य जयसिद्धये॥ रुरुंभः पौरवो वीरः सुभटो जनमेजयः॥ रंभादयश्च ते वीरास्ततस्तूर्णं समाययुः॥ सू
र्यप्रभं हरादिष्टः सानंदं नंदिकेश्वरः॥ समेत्य प्राह दिव्यां त्वं श्रियं संप्राप्स्यसीत्यथ॥ इरावती चंद्रभागा संगमांबुसदुक्षिते
॥ कृत्वा चंद्रप्रभं हृष्टः सपुत्रमवदन्मयः॥ भार्याः सूर्यप्रभस्यैता जनकैर्भूमिपैः सह॥ तिष्ठंति हे व पातालं प्रविशामो व
यं नृप॥ इति दानवराजेन निर्दिष्टो वसुधाधिपः॥ चंद्रप्रभस्तथा कृत्वा सभार्यः स सुनो विशन्॥ सूर्यप्रभप्रविष्टस्थ पित्रा
सह रसातलं॥ श्रुतिशर्मा समभ्यायान्नभसा गुटिकाधरः॥ स राजपुत्रदयितास्ता जहार बहिः स्थिताः॥ मायया मोह
यित्वाशु नृपान्समरसंमुखान्॥ सुताविमोगशोकेन लज्जया च क्षितीश्वराः॥ ते मर्तुमुद्यतास्तत्र श्वश्रुश्वशुर्नभसा वचः
॥ रक्षिताः शंकरेणैता राजपुत्रस्य वल्लभाः॥ श्रुतिशर्मा न शक्तो सा चेतन्मुखनिरीक्षणे॥ दुःखं मा जतमाप्यूयं जित्वा
सूर्यप्रभो रिपून्॥ करिष्यत्येव कांतानां वंदिग्रहविमोक्षणं॥ इति व्योम्नो वचः श्रुत्वा राजानस्ते धृतिं श्रिताः॥ जहुः शोकं
च मोहं च बंधुश्च जयेमनः॥ चंद्रप्रभादयस्ते पि सानुगाः स प्रभोज्ज्वलं॥ पातालगृहमासाद्य श्वश्रू श्वशुर्मयभाषितं॥ यूयं वि
पुलसत्वाद्याः पृथुकर्मसहं वपुः॥ भवतां वज्रकठिनं तुल्यं दानवभूभुजां॥ अत्र मा वोस्तु संमोहः स्मृत्यहं भावविभ्रमैः॥ इ
यं देहपरावृत्तिर्वस्त्राभरणसन्निभा॥ वासनानुगतो देही गृहाद्गृहमिवागतः॥ शरीरांतरमासाद्य भुंक्ते कर्म शुभाशुभं॥ दृ
ष्टांतेध्यप्ययं भावो नायं नश्यति सर्वथा॥ धेनुस्वर्गादिदानानां फलभोगाः कुतोन्यथा॥ जपध्यानमयं योगं राजंद्रभज सांप्र
तं॥ भोगापवर्गसंकल्पकल्पवृक्षोयतो जपः॥ अत्रापि श्रूयतां राजन्नूयौ राणी व्रतिनः कथा॥ बभूव कालको नाम द्विजाति
व्रतितत्परः॥ वरं गृहाणेत्यवदत्तं कालेन प्रजापतिः॥ भूयासं निश्चलध्यानजप इत्यवदच्च सः॥ तस्यान्यवरयैमुख्यात्प्रवृद्धेज ३५

यिनः फले॥ भीताः शतक्रतुमुखास्तद्विघ्नं समचिंतयन्॥ तत्स्वभाववर्द्धिसंतत्से रपि दैवैः पुरः स्थितैः॥ पुनः पुनः प्रार्थ्यमानोना
ग्रहात्स च चालसः॥ ततस्तदर्थितः प्रायात्तुहिनाचलकंदरे॥ भवं तु मंदसंतापा स्त्रिदशा इति शीतलं॥ जयंतं तत्र भूपालो ब्राह्म
णाप्रेरितोथ तं॥ उवाचेक्ष्वाकुरभ्येत्य गृहाण द्विजमद्वरं॥ भवान्ददातु वा मह्यमित्युक्त्वा स जापकः॥ मानी राजा तमवदद्दा
स्यवास्मि तेवरं॥ इति द्विजवचः श्रुत्वा सहसा क्षितियोभ्यधात्॥ प्रयच्छमे जपस्यार्द्धमित्युक्तानुशायं ययौ॥ सहस्रांशुकुले जातः
कथं नु पृथिवीपतिः॥ उत्तानपाणिर्निर्लज्जः स हेयाचकतामिति॥ ततो यदच्छयायातौ विवादाकुलितौ द्विजौ॥ तत्रैव न्यायमिक्ष्वा
कुं नृपं पप्रच्छतुर्मिथः॥ एकः प्रोवाच नृपते गोरनेन समर्पिता॥ प्रतीपदत्तां गृह्णाति नायमभ्युद्यताशयः॥ दत्तेनैव पुनर्ग्रीह्यमि
त्यन्योप्यवदद्द्विजः॥ अत्रेन्यायं नृपः पृष्टो विचार्येक्ष्वाकुरब्रवीत्॥ दीयमानं न गृह्णीयात्सत्व दुर्नयवानिति॥ ततो देवा नृपं प्राहुस्त्व
मप्येवं विधो नृप॥ दत्तं योनैव गृह्णासि जपस्यार्द्धं द्विजन्मना॥ परोपदेशे सर्वोपि स दाभवति पंडितः॥ इति राजा सुरगिरा जया
र्द्धफलमग्रहीत्॥ ततो दिव्यविमानेन प्रययौ शिवमच्युतं॥ धाममभूतपतेरम्यं सुरासुरनमस्कृतं॥ व्ययीकृतं न संपूर्य जपस्यार्द्ध
मथ द्विजः॥ स बभूव भवः क्षिप्रं तेजः परममाश्रितः॥ इत्येवं जपयोगेन दुर्लभं प्राप्यते नृप॥ तस्माद्भवानपि क्षिप्रं भजतां जपमु
त्तमं॥ ॥ कालकजापकाख्यायिका॥ ॥ मयस्येति गिरा राजा पुत्रेण सचिवैस्तथा॥ महिष्या कांतिमत्या च सह प्राप्यासुरा
लयं॥ विस्तीर्णाकारमालोक्य दैत्यमुत्तानशायिनं॥ उपविश्य जजापाशु निश्चलध्यानधारणः॥ सुनीथो नाम तनयो मयस्य
सुमहाबलः॥ केनापि हेतुना तत्र सुषुप्त इव मास्थितः॥ चंद्रप्रभश्च नृपतिर्वीडवं करणोत्तमं॥ कृत्वा देहं परित्यज्य सुनीथत
नुमाविशन्॥ ततः सुप्तोत्थित इव सुनीथे दैत्यपुंगवे॥ ननंदुर्मयमुख्यास्ते यथार्हं विहितोत्सवः॥ मयभार्या सुतं दृष्ट्वा तं चिरा
त्प्राप्तजीवितं॥ लीलावती हर्षसुधापूर्णनेत्रांबुजाभवत्॥ सूर्यप्रभमथ प्राह मयस्तज्जननीपुरः॥ अयं सुनीथः पुत्रो मेय
यो चंद्रप्रभास्सतां॥ सुमंडीकरनामा च तत्मस्यैव पुरानुजः॥ एते महार्थप्रमुखाः सचिवास्तस्य दुर्मदाः॥ अवतीर्णाः क्षितौ वी
राः कार्यार्थं दानवोत्तमाः॥ इति ब्रुवाणे दैत्येंद्रे हृष्टास्तूर्णं समाययुः॥ संप्रह्रादोन्मुखा दैत्याः सर्वे बलिपुरोगमाः॥ ततः सम
भ्ययात्तु क्रो दानवाभ्युदयेरतः॥ ईज्यमानो न मचूडारत्नार्पिगैः सुरारिभिः॥ रत्नासनोपविष्टेषु तेषु तत्र यथाक्रमं॥ सूर्यप्रभेषुषि

३५ शाकः क्रतुशतावाप्तश्रीरित्येतद्यदुच्यते॥ तत्र ब्रूमः क्रतुर्नाम बाह्यद्रविणडंबरः॥ किंयज्ञैर्विपुलायासैः किंव्रतैः कायशो
षणैः॥ निर्व्याजसेवासुभगाभक्तिर्येषांमहेश्वरे॥ पक्षपातेस्थितायूयमस्मद्वैरिकुलेषुयत्॥ तत्र शंकास्पदं युष्मत्प्रभा
वोविदितोहिनः॥ बलेनवंचितोयत्र बलिस्तत्कस्यमानसं॥ प्रीणातियच्चमुनयस्तेन वृत्र सुरवाहृताः॥ मयः स्येतिक्वचः श्रु
त्वा समामंत्र्य नृपंययौ॥ भगवान्नारदोव्योम्नाचंद्रराशिरिवोज्वलः॥ ततश्चंद्रप्रभोराजादूतैः संबंधिनोनृपान्॥ आनि
नाय मयेनोक्ताः पुत्रस्यजयसिद्धये॥ रुरुंभः पौरवोवीरः सुभदोजनमेजयः॥ रंभादयश्च तेवीरास्ततस्तूर्णंसमाययुः॥ सू
र्यप्रभंहरादिष्टः सानंदंनंदिकेश्वरः॥ समेत्यप्राहदिव्यांत्वंश्रियंसंप्राप्स्यसीत्यथ॥ इरावतीचंद्रभागासंगमांबुसदुक्षिते
॥ कृत्वाचंद्रप्रभंहृष्टः सपुत्रमवदन्मयः॥ भार्याः सूर्यप्रभस्यैताजनकैर्भूमिपैः सह॥ तिष्ठंतिहैवपातालं प्रविशामोव
यंनृप॥ इतिदानवराजेननिर्दिष्टोवसुधाधिपः॥ चंद्रप्रभस्तथाकृत्वा सभार्यः ससुतोविशन्॥ सूर्यप्रभप्रविष्टश्च पित्रा
सहरसातलं॥ श्रुतिशर्मासमभ्यायान्नभसागुटिकाधरः॥ सराजपुत्रदयितास्ताजहारबहिःस्थिताः॥ मायया मोह
यित्वाशुनृपान्समरसंमुखान्॥ सुनावियोगशोकेनलज्जयाचक्षितीश्वराः॥ नेमर्तुमुद्यतास्तत्र शुश्रुवुर्नभसोवचः
॥ रक्षिताः शंकरेणैताराजपुत्रस्यवल्लभाः॥ श्रुतिशर्मानशक्तोसांचेतन्मुखनिरीक्षणे॥ दुःखंभजतमाप्र्यंजित्वा
सूर्यप्रभोरिपून्॥ करिष्यत्येवकांतानांबंदिग्रहविमोक्षणं॥ इतिव्योम्नोवचः श्रुत्वाराजानस्तेधृतिंश्रिताः॥ जग्मुः शोकं
च मोहंच बबंधुश्च जयेमनः॥ चंद्रप्रभादयस्तेथिसानुगाः सप्रभोज्वलं॥ पातालगृहमासाद्य शुश्रुवुर्मयभाषितं॥ यूयंवि
पुलसत्वाद्याः पृथुकर्मसहंवपुः॥ भवतां वज्रकठिनंतुल्यंदानवभूभुजां॥ अत्रमावोस्तुसंमोहः स्मृत्यहंभावविभ्रमैः॥ इ
यंदेहपरावृत्तिर्वस्त्राभरणसन्निभा॥ वासनानुगतोदेहीगृहाद्गृहमिवागतः॥ शरीरांतरमासाद्य भुंक्तेकर्मशुभाशुभं॥ दे
हांतेप्ययंभावोनायंनश्यतिसर्वथा॥ धेनुस्वर्गादिदानानांफलभोगाः कुतोन्यथा॥ जपध्यानमयंयोगंराजेंद्रभजसांप्र
तं॥ भोगापवर्गसंकल्पकल्पवृक्षोयतोजपः॥ अत्रापिश्रूयतांराजन्नूयौशाणीव्रतिनः कथा॥ बभूवकालकोनामद्विजाति
र्व्रतलसरः॥ वरंगृहाणेत्यवदत्तंकालेनप्रजापतिः॥ भूयासंनिश्चलध्यानजपइत्यवदच्चसः॥ तस्यान्यवरयेमुख्यात्प्रवृद्धेज ३५

यिनः फले॥ भीताः शतक्रतुमुखास्तद्विघ्नंसमचिंतयन्॥ तत्प्रभावर्द्धिसंतप्तैरपिदेवैः पुरस्थितैः॥ पुनः पुनः प्रार्थ्यमानोना
ग्रहात्सचचालसः॥ ततस्तदर्थितः प्रायात्तुहिनाचलकंदरं॥ भवंतुमंदसंतापास्त्रिदशा इतिशीतलं॥ जयंतं तत्रभूपालो ब्राह्म
णाप्रेरितोथतं॥ उवाचस्वाकुरभ्येत्यगृहाणद्विजमद्वरं॥ भवान्ददातुवामह्यमितिश्रुत्वा सजापकः॥ मानीराजातमवदद्दा
स्यैवास्मिनेवरे॥ इतिद्विजवचः श्रुत्वा सहसाक्षितियोभ्यधात्॥ प्रयच्छमेजपस्यार्द्धमित्युक्त्वानुशायंययौ॥ सहस्त्वांशुकुलेजातः
कथंनुपृथिवीपतिः॥ उत्तानपाणिनिर्लज्जः सहेयाचकतामिति॥ ततोयदृच्छयायातौविवादाकुलितौद्विजौ॥ तत्रैवन्यायमिक्ष्वा
कुनृपंपप्रच्छतुर्मिथः॥ एकः प्रोवाचनृपतेगोरनेनसमर्पिता॥ प्रतीपस्तांगृह्णातिनायमभ्युद्यताशयः॥ दत्तंनैवपुनर्ग्राह्यमि
त्यन्योप्यवदद्द्विजः॥ अत्रन्यायंनृपः पृष्टोविचार्येक्ष्वाकुरब्रवीत्॥ दीयमानंनगृह्णीयात्सचदुर्नयवानिति॥ ततोदेवानृपंप्राकुरुस्त
मप्येवंविधोनृप॥ दत्तंयोनैवगृह्णासिजपस्यार्द्धंद्विजन्मना॥ परोपदेशेसर्वोपि सदाभवतिपंडितः॥ इतिराजासुरगिराजया
र्द्धफलमग्रहीत्॥ ततोदिव्यविमानेनप्रययौशिवमच्युतं॥ धामभूतपतेरम्यंसुरासुरनमस्कृतः॥ व्ययीकृतंनसंपूर्यजपस्यार्द्ध
मथद्विजः॥ सबभूवभवः क्षिप्रंतेजः परममाश्रितः॥ इत्येवंजपयोगेनदुर्लभंप्राप्यतेनृप॥ तस्माद्भवानपिक्षिप्रंभजतांजपमु
त्तमं॥ ॥ कालकजापकाख्यायिका॥ ॥ मयस्येतिगिराराजापुत्रेणसचिवैस्तथा॥ महिष्याकांतिमत्याचसहप्राप्यासुरा
लयं॥ विस्तीर्णाकारमालोक्यदैत्यमुत्तानशायिनं॥ उपविश्यजजापाशुनिश्चलध्यानधारणः॥ सुनीथोनामतनयोमयस्य
सुमहाबलः॥ केनापिहेतुनातत्रसुषुप्तिपदमास्थितः॥ चंद्रप्रभश्चनृपतिर्वीडवंकरणोत्तमं॥ कृत्वादेहंपरित्यज्यसुनीथत
नुमाविशन्॥ ततः सुप्तोत्थितइवसुनीथेदैत्यपुंगवे॥ ननंदुर्मयमुख्यास्तेयथार्हविहितोत्सवाः॥ मयभार्यासुतंदृष्ट्वातंचिरा
त्प्राप्तजीवितं॥ लीलावतीहर्षसुधापूर्णनेत्रांबुजाभवत्॥ सूर्यप्रभमथप्राहमयस्तज्जननीपुरः॥ अयंसुनीथः पुत्रोमेय
योचंद्रप्रभास्सुतो॥ सुमंडीकरनामाचतमस्यैवपुरानुजः॥ एतेमहार्थप्रमुखाः सचिवास्तस्यदुर्मदाः॥ अवतीर्णाः क्षितौवी
राः कार्यार्थंदानवोत्तमाः॥ इतिब्रुवाणेदैत्येंद्रेहृष्टास्तूर्णंसमाययुः॥ संप्रहारोन्मुखादैत्याः सर्वेबलिपुरोगमाः॥ ततः सम
भ्ययाच्छुक्रोदानवाभ्युदयेरतः॥ ईज्यमानोनमच्चूडारत्नार्पिगैः सुरारिभिः॥ रत्नासनोपविष्टेषुतेषुतत्रयथाक्रमं॥ सूर्यप्रभेषुभि

जयेवद्धोत्साहेषु सर्वथा॥ नारदः शक्रवचसा समेत्यावाप्तसत्कृतिः॥ उवाच सर्वैः शृण्वत्सु भवत्सु शक्रभाषितं॥ वैरं समभवत्पूर्वं भ
वद्भिः सह निश्चितं॥ शांतं तदधुनाम त्येधर्म्यमासाद्य सत्पदं॥ वैरिणो मित्रतां यांति मित्राण्यायांति शत्रुतां॥ कालस्य परिमाणे
न सर्वं हि परिवर्तते॥ दीर्घकालः प्रयातो सौ प्राप्यं नाकिंचिदस्ति नः॥ वर्तामहे मिथस्नेहेन कलिः कारणं विना॥ किंत्वद्य श्रुतिश

र्माणं विद्याधरधराधिपं॥ यूयं जेतुं समुद्युक्ताः कृतपक्षसमाश्रयं॥ सूर्यप्रभो मनुष्यो सौ स च खेचरसत्तमः॥ स्पर्द्धा नयोः कथं
नाम युष्मत्सख्यो न चेद्भवेत्॥ मनुष्यमात्रसौहार्दान्मा प्ररूढं यदल्लया॥ ऐकात्म्यं दानवव राविनाशयत निर्जरैः॥ इति श्रुत्वा वदद्दी
रो बलिर्दानवशेखरः॥ यथात्थ भगवान्सर्वं सत्यमेतदसंशयं॥ नैतन्न विदितं लोके यदस्माकं स वृत्रहा॥ वर्तते परया प्रीत्याभि
थो जानाति वामनः॥ वैरस्य कारणं शांतं यदेतदभिधीयते॥ न सत्यं भवतो लक्ष्मीः कदा नास्मत्सुखप्रदा॥ विद्याभृतां चक्रवर्ती
श्रुतिशर्मा निजां श्रियं॥ युष्मत्सख्याश्रयो भुंक्ते विमतिर्नात्र कस्यचित्॥ किं तु सूर्यप्रभस्यार्थे स्वयं देवस्त्रिलोचनः॥ उद्यतस्त्रिदशाः
सर्वे यदिच्छामात्रभूतयः॥ तदाज्ञया वयं सर्वे यदि सूर्यप्रभोद्यमे॥ निविष्टास्तत्किमस्माभिः कृतं यां विप्रियं कृतं॥ मोक्षे लक्ष्मीम
दाद्यापि प्रमादाद्वा शचीपतिं॥ अनालोच्यैव यद्भक्ति तत्कस्य हृदयं स्पृशेत्॥ अथवा भगवन्सर्वं त्वमेव वशिवशासनं॥ जानी
षे ब्रूहि नस्तत्त्वं विचार्य यदिहोचितं॥ इति तद्वचनं श्रुत्वा मुनौ याते निरुत्तरे॥ सूर्यप्रभो दानवेंद्रैः पूज्यमानो वसत्सुखं॥ ततो द
नुजमुख्यास्ते चिरादेकत्र संगताः॥ भोगान्बुभुजिरे दिव्यान्नानारसनिरंतरान्॥ अनेकयोजयोनां मम मंडलेषु महोदयाः
॥ स्वच्छैर्विविधच्छायैर्जांगलैः स्वल्पकूटकैः॥ दिव्यौषधिकृतैः शाकैः सघृतैः शुभ्रशालिभिः॥ लगेलाकेसररजः कृतगंधिद
धिपानकैः॥ प्रलेहैर्वेषवारैश्च भक्ष्यमंडकमोदकैः॥ पायसैर्मज्जिमाभिश्च दुग्धपिंडैः सशर्करैः॥ भुक्त्वा प्रासादमारुह्य प्राप्त
माल्यविलेपनाः॥ मिथो गृहीततांबूलाः कर्पूरागरुधूपिताः॥ ददृशुर्नयनानंदं नृत्तं दानवयोषितां॥ पातालवासिनो दैत्या वे
णुवीणास्वनोचितं॥ ततः सूर्यप्रभस्तत्र दैत्यकन्याः सुलोचनाः॥ स्मरार्तास्स्वयमायाता भेजे संभोगमानसः॥ ततः सक
न्यकाः कांताः सप्तपातालवासिनां॥ अवापोद्वाहविधिनाक्रमेण जनकार्पिताः॥ सुतां हि मिलकाख्यस्य दितिसूनोः कला
कलावतीं॥ पुत्रीं च मृगशावाक्षीं प्रल्हादस्य महल्लिकां॥ कांतां कुमुदिकाभिख्यां दुरारोहस्य चात्मजां॥ तरुणीं तं तु कुछ

स्यत नयां च मनोवतीं॥ संपूर्णचंद्रवदनां सुंदरीं च वलेः सुतां॥ एताश्चान्याश्च ताबह्वाः परिणीय सुलोचनाः॥ नवसंभोगसु
भगो भेजे सूर्यप्रभो रतिं॥ ततो मयेन सहितः समुत्थाय रसातलात्॥ जयोद्योगकृतारंभः सगत्वा कश्यपाश्रमं॥ दितिं दनुं चा
दितिं च कश्यपं च तपोनिधिं॥ ववंदे विपुलानंदो वीरः पात्रं तदाशिषं॥ अथ शक्रः समभ्येत्य वज्रांशुज्वलितांगदः॥ प्रणम्य
कश्यपं तत्र मयं प्राह रुषा ज्वलन्॥ अस्मत्सख्याश्रयस्यापि वीरस्य श्रुतिशर्मणः॥ वार्यमाणो तिकौटिल्याद्विप्रियेत्वं समुद्यतः
॥ उक्त्वेति कोपात्सावेगं वज्रमुद्यम्य जंभहा॥ मयं स सारक्रोधोपि निर्विकारस्मिताननं॥ काश्यपेन सभार्येण भर्त्सिते विरते ह
रौ॥ मयो जहास निःशंकः संरंभेपि प्रियंवदः॥ त्वाक्रे प्रयाते दैत्येंद्रो मयः प्राप्य वरान्वरात्॥ सभार्यात्कश्यपमुनेः सूर्यप्रभसु
तो ययौ॥ इरावतीचंद्रभागासंगमे प्राप्य तान्पुनः॥ संबंधिनो भूमिपालान्शृण्वोदथ विप्रियं॥ सूर्यप्रभो महिष्यस्ता हृताः श
त्रुकुलैरिति॥ तद्दुःखपावकव्याप्तं मयस्तं प्राह सस्मितः॥ अविज्ञात्रुकरं प्राप्ता मया तव जयेच्छुना॥ मायये ता हृताः वत्सनि
गद्येति सता ददौ॥ ततः सूर्यप्रभो हृष्टः सोत्कंठः प्राप्य वल्लभाः॥ भेजे निजपुरं गत्वा संभोगसुभगां श्रियं॥ ताभ्यो नरेंद्रपुत्री
भ्यः स कालेन ततः सुतान्॥ दैत्यान् संप्राप्य शौर्यश्रीकुलाचारक्रमोचितान्॥ ततो रत्नप्रभं नाम सुतं राज्ये जनप्रियं॥ अभि
षिच्य जयारंभव्यग्रः सैन्यैर्विनिर्ययौ॥ भूतासनं समारुह्य विमानं वल्लभासखः॥ तेनैव दत्तविद्यैश्च सहसर्वैर्नरेश्वरैः॥ सु
नीथमथ निर्दिष्टं हिमवत्पार्श्वमेत्य सः॥ सुमेरुं नाम सुहृदं चक्रे विद्याधराधिपं॥ अंशांसुवाससेनाम शंभोस्तेजोमया रु
तिं॥ कुमारं रणसाहाय्ये भेजे सूर्यप्रभस्ततः॥ तस्याभूत्कटकाबंधो गजवाजिरथाकुलः॥ अशीतियोजनायामो नरखे
चरसंकुलः॥ वल्मीकाख्यं समासाद्य दिव्यं देशं क्रमेण सः॥ विकटं जगराकारं कृपं तूणमवाप्तवान्॥ अक्षयं तूणमासाद्य
धनुर्दिव्यं च तद्विधं॥ विमानं च महापद्मं भास्करास्त्रं च सौषधीः॥ मृतसंजीवनीमुख्या गुहागर्भजयोत्सुकः॥ श्रुतशर्मा
णमाकर्ण्य दूतवाक्याद्रणोन्मुखं॥ प्रतस्थे समरारंभदुंदुभिध्वानमंथरैः॥ सैन्यैर्गजघटाघंटाघनगंभीरविभ्रमैः॥ प्रस्थितं
तं समभ्येत्य सुवासाः खेचरेश्वरः॥ प्राह सूर्यप्रभं यत्नात्त्विष्टं तु नवसैनिकाः॥ देवासुराणां समरः सुघोरो यमुपस्थितः॥ क्षी
रोदमथने पूर्वं प्राप्तश्चंद्रकौस्तुभे॥ पीयूषलुब्धैरमरैर्दैत्यानामभवत्कलिः॥ स दावदढ्छलादेवा दैत्यानां कूटयोधिनां॥

DR. BHAU DAJI

तैःसहास्मिन्‌रणेतावदप्रमादंविधेहिनः॥ एवंकृत्वाससेवावाक्यंश्रुत्वामूर्ध्नाभिनंद्यच॥त्रिकूटकटकेप्राप नगरींश्रुति
शर्मणः॥ ततोविनिर्ययौकोपात्सज्जीकृतबलोबुधिः॥श्रुतशर्मासहामात्यैर्विमानेनधनुर्द्धरः॥अथव्यूढेष्वनीकेषु प्रवृत्ते
समरोत्सवे॥आययुस्त्रिदशाःसर्वेव्योम्नाशक्रपुरोगमाः॥ प्रह्लादबलिमुख्याश्चदैत्यवीरमयानुगाः॥ समाययुःसं
प्रहारेसूर्यप्रभजयैषिणः॥ ततोविद्याधरेंद्राणां द्वंद्वयुद्धमभून्मिथः॥ मौलिरत्नपतद्बाणस्फुलिंगधवलाकुलं॥ऋं
कारैश्चापदंडानां पृषत्कानांचसत्कृतैः॥रणितैश्चकृपाणानांव्योमरंध्रमपूर्यत॥अर्धचंद्राग्रनिर्लूनैर्विद्याधरमहीभु
जां॥ वक्त्रैर्बभासे वसुधाविकाशिकमलैरिव॥दामोदरादयस्तत्रसचिवाःश्रुतशर्मणः॥ चक्रुःसूर्यप्रभानीकंशरजा
लनिरंतरं॥अथापरेन्हिरचितंचक्रव्यूहंरणेपरैः॥सूर्यप्रभगिरावीरःकुमारस्तूर्णमाविशत्॥ तस्मिन्विदारितेव्यूहे
द्विषतांत्रिदिवौकसां॥ सूर्यप्रभादयःसर्वेविविशुःशात्रवंबलं॥महावीरक्षयेतत्रकृतांतविततोत्सवे॥ युद्धंविद्याधरेंद्राणां
निर्मर्यादमवर्तत॥ तेषांसेनासमुद्राणामचलैःकुंजरादिभिः॥क्षोभितानांबभुःखड्गाःकालकूटच्छटाइव॥संसर्पद्धवलो
ष्णीषच्छत्रफेनौघपांडुरा॥खड्गमीनागजग्राहारणेरक्ततरंगिणी॥ ततोदिनांतेविपुलव्यायामश्लथकंटकाः॥अवहा
रंमिथश्चक्रुःसमरेंगुलिकाधराः॥ निशिसूर्यप्रभोवीररसोत्साहपरायणः॥ लेभेननिद्रामासन्नविवाहइवबालकः॥वि
नोदिनींकथांकांचित्कथयेत्यथसादरं॥ पृष्टःसूर्यप्रभेणाहस्कहद्धीतभयाभिधः॥उज्जयिन्यांमहासेनोबभूववसुधा
धिपः॥ तस्याशोकवतीनामसुंदरीदयिताभवत्॥ गुणशर्माभिधोविप्रःसचिवश्चगुणाधिकः॥ विद्यानांचकलानांच
केलिसौधइवोन्नतः॥ तंकदाचित्सविश्रंभोराजाभार्यासखोरहः॥प्राहदर्शयमेनृत्तंनृत्तज्ञोसीतिसादरं॥ सोब्रवीद्राज
महिषीपुरःकथमहंप्रभो॥ निर्लज्जोनर्तकइवप्रभवामिनदीक्षिते॥अहंसर्वकलाभिज्ञःपत्न्यमेकौतुकंपरं॥ नृत्तंकल
लितंवस्त्रयोषितामेवशोभते॥ वदन्निति नरेंद्रेणनिर्बंधात्सपुनःपुनः॥प्रार्थ्यमानःशनैर्नृत्तंकलाश्चसमदर्शयत्॥कौ
शिकीकोमलंलास्यंवीरोदारंचतांडवं॥सर्वरागानुगंगीतंवीणांचमृदुमूर्छनां॥ ततस्तस्यसमालोक्यपुण्येषोरिवमंत्रि
णः॥ तत्राशोकवतीदेवीस्मराईहृदयाभवत्॥अभिलाषरसावेशान्निगृह्यनृपमब्रवीत्॥ सास्वेच्छावस्थयपिनंतत्कालो

चितविभ्रमाः॥अभ्यर्थयैनंयेनायंदेवशिक्षयतिक्षणात्॥ मांमंजुसारणांवीणांस्वरश्रुतिविचक्षणः॥ इतिदेवीगिरा
राजागुणशर्मार्थितश्चिरं॥ प्राणाशिक्षयितास्मीतिनिगद्यस्वगृहंययौ॥ स्निग्धांदृष्टिंसमालक्ष्यशंकितोराजयोषितः॥ वि
वेशांतःपुरंप्रातर्वीणांशिक्षयितुंस्वयं॥अंकेवीणांसमादायतस्तुरःसासमाकुला॥शशंसाक्षिविकारैश्चभ्रूविलासै
श्चहृद्गतं॥ विदधानांनखाग्रेणसंज्ञांमन्मथकातरां॥ गुणशर्माजगादेनांदेविसंवृणुदुर्नयं॥ प्रभोर्भार्यासिमस्माकंमाकृ
थागर्हितांमतिं॥ इतितस्यवचःश्रुत्वाभजमामित्युवाचसा॥ कंपमानस्तनीलीलासंरंभगलितांशुका॥ कर्णावपिधाय
यातेथतामनादृत्यसुंदरीं॥ तस्मिन्नरेंद्रमहिषीबभूवविरहातुरा॥अत्रांतरेनरपतेःप्रविश्याहारमंडपं॥ विषदानोद्यतं
सूदंगुणशर्माव्यलोकयत्॥ सूदंनष्टमुखच्छायंसकंपंगद्गदस्वरं॥ सताडयित्वापप्रच्छभूपतेद्रोहकारिणं॥ सोब्रवीन्मालवेंद्रे
णराज्ञाविक्रमशालिना॥विषदानेनियुक्तोहंवैरिणास्यमहीपतेः॥ इत्युक्तवतितत्कोपात्सूदेतस्मिन्निपातिते॥ कालेनमा
लवाधीशःस्वयंयोद्धुंसमाययौ॥ दुर्गेयंतन्महानीकंज्ञात्वाभूरनराधिकं॥ मंत्रेणांतर्हितःप्रायाद्गुणशर्मातदंतिकं॥ स
कूटसिद्धोभूत्वातंद्विवःप्राहमहीपतिः॥ माकृथाविग्रहंराजन्महासेनेनभूभुजा॥ प्रणम्यैनंमहासत्वंश्रेयसींप्राप्यसिश्रियं
। उत्क्षेत्यलक्षितेयातेगुणशर्मणिविद्यया॥ मालवेंद्रोमहासेनंप्रसाद्यप्रणनामतं॥ कृत्वसख्यंप्रयातेथस्वपुरींमालवेश्व
रे॥गुणशर्मकृतांमायांप्रशशंससपार्थिवः॥ ततःकदाचिद्गंगायांजलकेलिरतंनृपं॥महासेनंमहाग्राहोजग्राहगजसंनि
भः॥गुणशर्मासमभ्येत्यस्वामिनंप्रोज्जहारतं॥ ग्राहंविधायदलशःशस्त्रेणविपुलाशयः॥ पुनर्दष्टंभुजंगेनमंत्रज्ञस्त
मजीवयत्॥ इत्यनेकोपकारोसौस्नेहार्द्रंनृपतिंव्यधात्॥ कदाचिदथनिःशंकंप्राप्तमंतःपुरंद्विजं॥ तंसाभूपालमहिषी
भजस्वेत्यभ्यधात्पुनः॥अनादृत्यैवभूयोपियातेतस्मिन्नृपप्रिया॥लज्जाकोपस्मराक्रांतासानिःश्वासभामिनी॥ रहः
क्ष्मापालमभ्येत्यसावदत्साश्रुलोचना॥ गुणशर्मातवात्यंतंप्रियोदेवकिमुच्यते॥पुराविषप्रदःसूदोहतोयत्तेनतच्छृणु॥
एककार्येनिविष्टौतौततोभेदस्तयोरभूत्॥ भवत्प्रसादोद्यबलालुब्धोबलतरंगिणा॥ अहंतेनाद्यविजनेयाचितास्फुरतं
सतीं॥ बलाद्विवसनांकृत्वाक्रोशंतींकाममोहिनः॥ पाणिनामांसपस्पर्शस्तनयोर्जघने तथा॥ श्रुत्वेतिमोहंप्रययावीर्ष्या

संमूर्छितोनृपः॥ तयैवाश्वासितःसंज्ञांप्राप्यकोपादकंपत॥ ससभामंडपंगत्वानिर्लज्जोजनसंसदि॥ उवाचगुणशर्माणंदे
वीवृत्तांतमाकुलः॥ परिशुद्धिवचस्तस्यक्रोधांधोवसुधाधिपः॥ अशृण्वन्नेवतंशस्त्रैःसानुगोहंतुमुद्ययौ॥ कृतश्रमोवंचयित्वा
सराजानंभटांश्चतान्॥ ययावलक्षितोवेगाद्गुणशर्माविधेर्वशात्॥ दक्षिणापथमासाद्यब्राह्मणस्यनिवेशनं॥ अग्निदत्ताभि
धानस्यसविवेशसदुःखितः॥ वेदवेदांतसारज्ञःपृष्टस्तेनद्विजन्मना॥ गुणशर्मानिजांजातिंकर्मस्नेहाज्जगादतं॥ अहंसुलो
चनाख्यायांकुलेयज्वद्विजन्मनः॥ आदित्यशर्मणोजातोगुणशर्माभिधःस्वयं॥ गुह्यकीजनसंपर्कादुन्नदस्यगृहेस्थितं॥ य
दृच्छयागतःशक्रःप्राहमज्जनकेरुषा॥ प्रणमत्सुसमस्तेषुयक्षेष्वमथिसादरं॥ व्यग्रस्त्वंनप्रणमसिप्रायोमामवमन्यसे॥
लोकपालपुरादस्मात्सत्क्षिप्रंमहीतले॥ इतिब्रुवाणोदेवेंद्रोमसिशाथप्रसादितः॥ तंप्राहत्वत्सुतोभूमिंयाद्यास्तेवसुतो
यतः॥ इतिशापान्महेंद्रस्यप्राप्तोहंवसुतलं॥ अविस्मृतानेकविद्यःप्राप्तोभूपतिमंत्रितां॥ महासेनाभिधानेनमिथ्या
तेनमहीभुजा॥ भार्यादूषितवित्तेननिरस्तोहमकिल्बिषः॥ अग्निदत्तोनिशम्येतिप्रार्थितोगुणशर्मणा॥ उवाचगुणिनेतस्मै
दातुमभ्युद्यतःसुतां॥ श्रीमतःकार्तिकेयस्यजयिनस्तारकद्विषः॥ गृहाणमंत्रमेनेनजहित्वंपार्थिवाधमं॥ रुद्रस्यदेवीसुर
तेविघ्नोभूत्सुरवासनात्॥ वन्हेस्तदाननेवीर्यंतत्याजचमहेश्वरः॥ यातेवर्षसहस्रेथतदुद्गीर्णंकृशानुना॥ जज्वालसलि
लांतस्थंगंगायांवत्सरायुतं॥ मंदाकिन्यासमुत्सृष्टेशार्वेतेजसिदुःसहे॥ जातःशरवणेतस्मिन्कृत्तिकावर्द्धितःशिशुः॥
षडाननःसमुत्थायसुरेंद्रेणार्थितोभयात्॥ सेनापतिपदंप्राप्यतारकंनिजघानसः॥ तस्येमंप्रवरंमंत्रंत्वंगृहाणजयश्रिये
॥ उक्त्वेतिविधिवन्मंत्रंतस्मैविप्रवरोददौ॥ सुतांचसुंदरींनामसौंदर्यशशिचंद्रिकां॥ तांकांतांगुणशर्माचप्राप्यायतवि
लोचनां॥ जित्वानृपंमहासेनंतद्राज्यंसमवाप्तवान्॥ ॥ गुणशर्माख्यायिका॥ ॥ इतिवीतभयाख्येनकथितांसुहृ
दांकथां॥ सूर्यप्रभोनिशाम्येवप्रीतोनिद्रांसमाययौ॥ ततःप्रभातेसन्नद्धःस्नातःकृतजयोचितः॥ अवाप्यसंग्रामभुवंदि
व्यंव्यूहमकल्पयत्॥ अथस्वयंशक्रमुखाश्चित्रस्वादैत्यदानवैः॥ अयुध्यंतसुसंरब्धाःश्रुतिशर्माजयैषिणः॥ ततोवि ३८
निहताःपेतुर्विद्याधरवराभुवि॥ रक्तांशुभासुराकाराःक्षीणपुण्याइवग्रहाः॥ स्वयंसूर्यप्रभस्तत्रध्यात्वादिव्यंपिनाकिनं॥

व्यधात्पाशुपतंघोरमस्त्रमस्त्रविदांवरः॥ तेनबद्ध्वासहामात्यैःश्रुतिशर्माणमाहवे॥ हरहुंकारविध्वस्तान्देवान्सूर्यप्रभोजयत्
॥ ततःशिवाज्ञयासख्यंविधायश्रुतिशर्मणा॥ सजयश्रियमासाद्यननंदसहबांधवैः॥ प्रल्हादतनयांतत्रकामचूडाम
णिंततः॥ परिणाय्याभिषेकायसप्राप्याहृषभाचलं॥ साक्षाद्विलोक्यहेरंबंप्रणतोविघ्ननायकं॥ गौरीपतिंचसानंदोलेभे
निर्वृतिमुत्तमां॥ सुमेरुप्रमुखैस्तत्रविधेर्घोरधराधिपैः॥ शुक्रादिभिर्गुरुवरैर्मयमुख्यैस्तथासुरैः॥ मुनिभिःकाश्य
पमुखैरभिषिक्तोयथाविधि॥ सूर्यप्रभश्चक्रवर्तिश्रियंभेजेसुहृद्वृतः॥ कांताभिःसहसर्वाभिःसंयोगसुभगोत्सवे॥ कृव
कृत्योरतिंप्रापसाक्षादिवसमन्मथः॥ इतिसूर्यप्रभेणाप्ताविद्याभृच्चक्रवर्तिता॥ त्वत्पुत्रोप्यधिकांदेवलप्स्यतेनरवाहनः
॥ अवाप्तविद्यमचिराद्विजितारातिमंडलं॥ एवंपुनःसमेष्यामीत्युक्त्वावज्रप्रभोययौ॥ सूर्यप्रभस्येतिनिशम्यवृत्तंव
त्सेश्वरोहर्षसुधाभिषिक्तः॥ देवीमुखांभोजनिविष्टदृष्टिःपस्पर्शपुत्रस्यकरंकरेण॥ ॥ इतिक्षेमेंद्रविरचितायांबृह
त्कथायांसूर्यप्रभोनामषष्ठोलंभकः॥ ६॥ ॥ अतःपरंमदनमंचुकाभविष्यति॥ भ्रूलेखाधनुरानतंविचलिविच
लितोलीलाकटाक्षःशरोहासस्त्रासितपुंखपक्षरचनामौर्वीचपक्ष्मछविः॥ झंकारःकलपंचमाश्रयिवचोयस्येत्थमा
सूत्र्यतेजैत्रंतत्वमनारतंयुवतिभिःकामायतस्मैनमः॥ सूर्यप्रभकथांश्रुत्वावत्सराजःप्रियासखः॥ पुत्रप्रभावंकल
यन्बभूवानंदनिर्भरः॥ अत्रांतरेस्मरंज्ञात्वानरवाहनरूपिणं॥ अवतीर्णंवराच्छंभोर्भुवंरतिरवातरत्॥ दयितानुव्रता
साथतपसापार्वतीवरात्॥ कांतायत्रयथाजातातदिदानीमिहोच्यते॥ अस्तिसंतोषजननीनिर्विकारसुखस्थितिः॥ वित
स्तामोक्षवीथीवसिद्धसेव्यामहानदी॥ यस्यास्तुषारनिकरस्मेरसीकरमारुतैः॥ पुंसांभवमरुग्लानितापपापेचकाकथा॥ त
स्यास्तक्षशिलानामतीरेस्तिरुचिरापुरी॥ यत्सौधकांतिभिर्व्योम्निजायतेदिनकौमुदी॥ तस्यांकलिंगदत्तोभूभूपालोधर्म
भूषणः॥ त्रिजगद्व्यापिनीयस्यपुण्याकीर्तिसरस्वती॥ शशिप्रभापराभिख्यःसविहारशतैर्भुवं॥ लोकनाथःप्रविदधेपरा
मिवसुरावतीं॥ करुणापूर्णहृदयोनानायुक्तिनिदर्शनैः॥ संदेशनाभिश्चजनंव्यधात्सुगतिभाजनं॥ वितस्तादत्ततनयस्त
स्यराज्ञःपुरेवणिक्॥ बभूवरत्नदत्ताख्योभिमुखोजिनशासने॥ भिक्षुभ्यःप्रणतंनित्यंदातारंपितरंयुवा॥ सोवदद्देववाक्या

नांधिरूक्षांनिपतितंवशे॥ जात्याचारविहीनानां दंभमीलितचक्षुषां॥ भिक्षूणां धूर्तधुर्याणां धीमान् कोनामविश्वसेत्
॥ इतिपुत्रवचः श्रुत्वा दुःखितोभूपतिर्जगौ॥ सन्मार्गे मत्कृतं देवस्थापयेतिवणिग्वरः॥ नृपोप्याहूयतत्पुत्रं सप्रत्यक्षनि
दर्शनैः॥ लोके लोकोत्तरान्धर्मानुपदेष्टुं प्रचक्रमे॥ तदा देशश्रुतिपरोनबभूववणिक्सुतः॥ भ्रूभंगभीषणक्रोधस्तमुवा
चमहीपतिः॥ अयंनराधमः क्षिप्रंहन्यतांहन्यतामिति॥ ततः संभ्रांतहृदयोवेपमानः कृतांजलिः॥ भीतः प्रसादयामास
जनकस्तस्यभूपतिं॥ तद्वाक्यान्नृपतिस्तस्य चक्रेमासद्वयावधिं॥ वधेतद्वासरारंभमुहूर्तगणनापरः॥ भयाद्विगतनिद्रो
थनिर्विण्णोनिःसुखः कृशः॥ मरणंप्रत्यहंध्यायन्सोकंपतवणिक्सुतः॥ कंकालइवनिर्मांसः सोस्थिशेषोभयातुरः
॥ जातेमासद्वयेमेनेकृतांतंशिरसिस्थितं॥ ततोराज्ञासमाहूतोवधायावधिवासरे॥ दृष्टश्चिंताग्रहग्रस्तः सनीतोव
णिजः सुतः॥ तमाहराजाचकितं कृशोसिबतनिःप्रभः॥ दृश्यसेस्त्वायुशेषांगोध्यायन्मरणजंभयं॥ मासद्वयावधेर्भी
तोमूर्खःकिंपरितप्यसे॥ मरणस्यावधिर्नास्तिमुहूर्तमपिदेहिनो॥ एवंविधंभयंनृणां सर्वदैवोपपद्यते॥ कोहिनिद्रां
समायातिमृत्युदंतांतरस्थितः॥ ज्ञात्वेतिधर्मपंथानंश्रयदुःखौघशांतये॥ धर्मएवप्लवः पुंसां संसारमकराकरे॥ श्रु
त्वेतिवणिजापृष्टः कथंमुक्तिरितिप्रभुः॥ प्राहलोकोत्तरंधर्मंवक्ष्यामीतिनरेश्वरः॥ ततस्तृतीयेह्निपुनर्भूमिपालस्तम
भ्यधात्॥ आदायोत्सवयात्रायांसंपूर्णंतैलभाजनं॥ प्रदक्षिणीकुरुपुरींबिंदुमात्रमपातयन्॥ पतेयदि ततोबिंदु
र्हन्यसेखड्गपाणिभिः॥ मत्पादिष्टैरितिश्रुत्वापात्रहस्तोययौवणिक्॥ समुद्यतासिभिर्भीमैः सोनुयातः प्रहारिभिः॥
तैलभाजनमादायबभ्रामनिखिलांपुरीं॥ भ्रांत्वानृपांतिकंप्रापभयाद्रक्षितभाजनः॥ पृष्टः प्रोवाचराजानंदेवादेशः कृ
तोमया॥ नदृष्टंनश्रुतंकिंचिदुत्सवेस्मिन्महाजने॥ ध्यानैकाग्र्येणपात्राग्रेन्यस्तंनेत्रद्वयंमया॥ निशम्येत्यवदद्राजामो
क्षवर्त्मनदेवयत्॥ सर्वतोविनिवृत्तस्यध्यानैकाग्र्यमनोगतिः॥ इत्याग्रहेणवणिजश्चकारानुग्रहंनृपः॥ ॥ रत्नद
त्ताख्यायिका॥ ॥ एवंससर्वजनतातारणोभूत्ततोद्यमः॥ तारादत्ताभिधानस्यबभूवनृपतेःप्रिया॥ क्षमेवोत्तमस
त्वस्यकरुणेवार्द्रचेतसः॥ अत्रांतरेसुरेंद्रेणयात्रायांविबुधांगना॥ शापात्सुरभिदत्ताख्याविद्याधररतादिवि॥ साश्रा ३९

क्ष्यापपतिताजन्मनेगर्भमाविशत्॥ राज्ञः कलिंगदत्तस्यजायायाः स्वप्नसूचिता॥ देहदापांडुरमुखीरजनीवेंदुमंडिता
॥ तारादत्ताभवत्त्रीस्तैनितरामथभूपतेः॥ ततः सारत्नदीपस्यशिखयेवांतराश्रिता॥ ददर्शराज्ञीनिखिलांप्राग्जन्मस्थितिः
मात्मनः॥ जातिस्मरानृपंप्राहपुरामेजननीविभो॥ ननुलक्ष्मीःप्रियंप्राहधर्मदत्तंमहीपतिं॥ अन्यस्मिन्नुजन्मनिविभोकुंभस्थ
लीवणिक्गृहे॥ अभवद्देवदासश्चभर्ताभून्ममगाधः॥ तदावांसर्वदुर्भिक्षेपरपिंडोपजीविनौ॥ याचितावर्थिनाभ्येत्यक्षु
त्क्षामेनद्विजन्मना॥ दत्वास्वमशनंतस्मैतच्छेषकृतभोजनौ॥ तदाममपतिः शोकान्निधनंसमवाप्तवान्॥ तस्यानुमरणाद
स्मिजाताजातिस्मराविभो॥ इतिकोशलभूपालः श्रुत्वाजायावचोरहः॥ देवदासोहमेवेतिजातिंसोप्यस्मरन्निजां॥ जातिं
स्मृत्वानयोर्दिव्यंधामधर्म्यंप्रपन्नयोः॥ पितृभ्यामथहीनाहंमातृष्वस्राविवर्द्धिता॥ कन्ययैवततः कश्चिन्मुनिरभ्यागतोम
या॥ आराधितःपुराकुत्सापार्थंजन्मभुवायथा॥ तद्वरात्त्वांवरांदेवलोकनाथशिरःस्थितं॥ अमिताभमवाप्याहंप्राप्तासीमंति
नीपदं॥ इत्याकर्ण्यनृपःप्राहदेवींसत्वव्रतांमतिः॥ अमोघामृतसूःकामधेनुरन्येषुजन्मसु॥ त्वसितास्फुगतिंप्राप्तःसत्वादेव
प्रियासखः॥ सत्वप्रकाशाहसतिः सत्वांहिदिविशाश्वती॥ गंगाकूलेपुराविप्रश्चांडालश्चजरान्वितौ॥ चक्रातेस्यकुमाला
नंविचिंत्यानशनव्रतं॥ नियमस्थौददृशातुस्तौनिषादगतंरहः॥ भ्रस्यग्रमुष्ममत्स्यौघभोजनव्यग्रमग्रतः॥ द्विजस्तान्वीक्ष्य
मत्स्यादान्लोल्याद्वन्नोदकाकुलः॥ तस्थावनशनक्षामोगिंनिरन्निवसस्पृहं॥ चंडालोपिविलोक्यैतान्कुत्सयन्मत्स्यका
दकान्॥ पुष्णंतिप्राणिभिःप्राणान्धिगेतानित्यचिंतयत्॥ चिंतयित्वेतितौयातौत्रिदिवंतीर्थसेवया॥ जन्मांतरेक्षेत्रफ
लाज्जातिस्मरपदंश्रितौ॥ पर्यंतभावसदृशंप्रापतुश्चकुलंपृथक्॥ द्विजोभूद्धीवरसुतः श्वंडाश्चेलद्विजात्मजः॥ शुध्यशुद्धी
हिचित्तस्यजंतूनांशुभदुःकृते॥ ॥ विप्रचंडालाख्यायिका॥ ॥ उपाध्यायोद्विजःकश्चित्कुंडिननगरेपुरा॥ ससप्तभिः
सहितःशिष्यैर्दुर्भिक्षेक्षुधितोभवत्॥ गत्वास्मत्श्वशुरात्पूर्णगामानयतपुत्रकाः॥ ततूक्षीरेणास्तुनोवृत्तिरितिशिष्या
नुवाचसः॥ शिष्यास्तदाज्ञयागत्वागुरुश्वशुरमंदिरं॥ गामादायपरावृत्ताः प्राप्यांध्वंविषमेध्वनि॥ निराहारानिपतिताः
श्वासशेषाव्यचिंतयन्॥ अस्मिन्मरुतटेप्राप्तोमृत्युरस्माभिरुत्कटे॥ अस्मद्विनाशेगोरेषाविनंक्ष्यतिगुरुस्तथा॥ तदालभ्य

विधानेन गामेतां याजिनो वयं॥ भुक्त्वा प्राणान वाप्स्यामस्तेषु धर्मः प्रतिष्ठितः॥ चिंतयित्वेति बहुशोपि शास्त्रविधिनैव गो॥ न
घाग शोषं भुक्त्वा तेशिष्या गुरुगृहं ययुः॥ यथा वृत्तं निवेद्यास्मै निःसंगाः सत्यवादिनः॥ जातिस्मरास्तदा स्ते शिष्याः प्रापुः परां
गतिं॥ ॥ इति शिष्याख्यायिका॥ ॥ इति सत्वविभुजनानां सतामायांति संपदः॥ सत्वहीनानां तु दाराअपि निरादराः॥ अ
स्ति गौरी वनगरी चंद्रचूडस्य वल्लभा॥ श्रीमत्युज्जयिनी नाम जननी जनसंपदां॥ तस्यां विक्रमसिंहोभूद्भूमिपालो महाबलः॥ निःशे
षविजिताराते र्यस्य युद्धं मनोरथः॥ दर्प्यकंडूलदोर्दंडं ते युद्धगतमानसं॥ उवाचामरगुप्ताख्यः कदाचिन्मंत्रिपुंगवः॥ देवबाणासु
रः पूर्वं सहस्रभुजदुर्भरः॥ ययाचे त्रिपुरारातिं युद्धं मे दीयतामिति॥ ततो निरुद्धसंबंधयुद्धसन्नद्धचेतसा॥ माधवेन निकृत्तास्य च
क्रेण भुजमंडलो॥ अभिमानो वमानाय दुष्टानामिव भूभुजां॥ युद्धप्रतिनिधिर्देव मृगयास्ति नृपोचिता॥ मुनीनां शांतिकृत्येन प्रमादा
द्रवाजिनां॥ राज्ञामति प्रसंगाच्च मृगया दुःखदायिनी॥ तस्मान्मृगरणे क्रीडां भज व्यसनवर्जितः॥ इति मंत्रिगिरा राजा सानुगः प्रय
यौ वनं॥ कुंजरक्रोडशारभद्वीपि केसरिसंकुलं॥ ततः कृतश्रमोभ्येत्य लीलाहृतवनेचरः॥ विनिवृत्तो ददर्शाग्रे कथासक्तौ मिथो नरौ
॥ एकांतेविरसंलापौ तौ दृष्ट्वा शंकितो नृपः॥ चौराविति तदाह्वाने प्रतीहारमचोदयत्॥ प्रतीहारसमाहूतौ सर्वास्थाने महीपतेः॥
ततस्तौ ब्राह्मणौ प्रातः प्रविष्टौ भयकंपितौ॥ दत्ताभयेन नृपतौ कथ्यतामिति वादिनी॥ तयोरेको वदत् राजन् श्रूयतां नौ विचेष्टितं॥
पितृभ्यां विप्रयुक्तो हं बालो विप्रः पुरा नृप॥ नियुद्धशास्त्रकुशलो द्यूतत्तदुर्मदोभवं॥ याति काले नवोढाहामपत्नयं पथि योषि
तं॥ युग्याधिरूढां प्रत्यग्रमंगलाबद्धकंकणां॥ अत्रांतरे महावेगः स्फोटितालानशृंखलः॥ तां विवाहमहावाद्यकुपितः कुंज
रोभ्ययात्॥ त्यक्त्वा तां द्विरदत्रासात्प्रयातेष्वनुयायिषु॥ गजो जिघृक्षुस्तां प्राप मुग्धां नलिनीमिव॥ दृष्ट्वाहमतिकारु
ण्यान्नादेनाहूय वारणं॥ वंचयित्वाश्रमाभ्यासाद्विह्वलां ताममोचयं॥ तस्मान्महाभयान्मुक्ता सा वदन्मां सुलोचना॥ व
ल्लभस्त्वं जनस्यास्य प्राणानामधुना विभुः॥ त्यक्त्वास्मि येन संत्रासाधिकुधिकृतां कातरं नरं॥ नाहं संद्रष्टुमिच्छामि तेन न च प्रेक्ष्या
मितं जडं॥ प्रच्छन्नानुगतस्त्वं मामचिरात्समवाप्स्यसि॥ इति मे संविदं कृत्वा संगता स्वजनेन सा॥ ययौ भर्तृगृहं तन्वी मय्येवा
र्पितमानसा॥ तामेवानुप्रयातो हं प्रेमपाशवशीकृतः॥ प्रच्छन्नवृत्तिर्बद्धाशाः शून्ये देवगृहे स्थितः॥ तत्रापश्यमहं विप्रमिमं ५०

प्रच्छन्नकामुकं॥ तस्या भर्तुः स्वसुर्गूढप्रौढरागैकभाजनं॥ अनेन जातसौहार्दस्तेन तस्यां कामिनीमहं॥ हृत्वा गूढमिह प्राप्तस्ताप
निर्वापणौषधिं॥ जामिं च तस्याः प्राप्यायं सुहृन्मे निर्वृतो भवत्॥ तदर्थे देव संलापः शून्ये भूच्चिरमावयोः॥ श्रुत्वेति नहृष्टो राजा तु
ष्टः सत्यनिवेदनात्॥ ताभ्यां वसुददौ कोहि सद्भाविनं तुष्यति॥ इत्येवं सत्वसारेण प्राप्ता कांता द्विजन्मना॥ क्लीबेन सत्वहीनेन कात
रेण तु हारिता॥ ॥ विक्रमसिंहाख्यायिका॥ ॥ राज्ञः कलिंगदत्तस्य श्रुत्वेति वचनं प्रिया॥ तारादत्ता परानंदसुधार्द्रवदनाबभौ॥
अथ कालेन संपूर्णदोहदा द्युतिशालिनी॥ असूत सा सुतं देवी द्यौः शशांककलामिव॥ जातां पुत्रीं नृपः श्रुत्वा बभूव विमना इव॥ चिं
तामूर्तिमती कन्या कस्य प्राणान्निमानसे॥ संचितास्तिमितो गला विहारं शंभुमंदिरे॥ शुश्राव धर्मश्रवणे तत्तन्मोहप्रशांतये॥ अ
हिंसा परमो धर्मः संन्यासः परमं पदं॥ कारुण्यः परमं कामो मोक्षश्च परमः क्षमा॥ क्षमैव सर्वसत्वानां पुण्यपीयूषवाहिनी॥ मैत्री
च सर्वभूतेषु संसारमरुवारिदः॥ पुरा तपोवनोपांते राजपुत्रः प्रियासखः॥ विलल्लासानिलालोलबालनूतनतावने॥ रतिश्रांतेम
धुमदात्तस्मिन्निद्रावशंगते॥ चपला राजपुत्र्यस्ता विचेरुः केलिकानने॥ तदुपांते मुनिं ध्यानमीलिताक्षं विलोक्य तां॥ तस्थु
र्मत्ता विलासिन्यः कुतूहलविनिश्चलाः॥ राजपुत्रः प्रबुद्धोपि प्रिया दृष्ट्वा मुनेः पुरः॥ तं नघाने र्ष्यया ग्रस्तः खड्गेन निरवग्रहः॥ ते
नाहतोपि बहुशः शस्त्रेण न चुकोप सः॥ सत्यं सुहृदि शत्रौ च शामिनां सदृशा दृशः॥ निर्दग्धुमुद्यतां पापं तं तपोवनदेवतां॥ अवा
रयत्कृपापूर्णः क्षमासागरो मुनिः॥ खड्गप्रहारनिर्मूलगात्रोपि मुनिसत्तमः॥ तथैव देव्यासंस्पृष्टो बभूव स्थे स्वविग्रहः॥
क्षमावदानं॥ ॥ कुमार्यः सप्त रूपिण्यो भूपालस्य कवेः सुताः॥ ययुः श्मशानं वैराग्यात्त्यक्तसंसारवासनाः॥ स्वजनेनार्थिताः
प्राकुस्ताः शरीरमिदं हिनः॥ अस्थिमांसशिराचर्मसंवीतमतिकुत्सितं॥ अस्मिन्काये श्मशाने च को विशेषः प्रदृश्यते॥ पच्यंते
सततं यत्र वन्हिनासप्तधातवः॥ विरक्तो राजपुत्रः प्राड्विवयतोभिक्षुकव्रतः॥ दृष्टः प्रविष्टो भिक्षायै रूपवान्पौरयोषिता॥ तं रूप
मिव रूपस्य यौवनस्येव यौवनं॥ विलोक्य कामवशगा भिक्षादानोद्यतावदत्॥ अहो सुभगरूपं ते मानसामृतदीधिते॥ वर्ष
तीवामृतं दृष्टिस्तव राजीवलोचन॥ इति लोचनसौंदर्यविचाराधिकसस्पृहं॥ तां वीक्ष्य निजमुत्पाट्य नयनाक्षमुवाच सः॥ चर्मा
वनद्धं पश्ये दं वारिस्तोकं न लोचनं॥ अस्मिन्मनोहरं मातः किं कुत्सित शरीरके॥ इति तस्या गिरा सापि विरक्ता जिनशासनं॥ प्रपेदे

बृ॰ था जन्मसंतानजरामरणवारणं॥ वैराग्यावदानं॥ ॥ कलिंददत्तः श्रुत्वेति बहुशो धर्मदेशनाः॥ अभृणोद्ब्राह्मणवचः कन्यका
जन्मदुःखितः॥ कुमारीजन्मना राजन्किं वृथा परितप्यसे॥ पुत्रैरशक्यं यत्कर्तुं तत्सुताभिरवाप्यते॥ सुषेणइति भूपालश्चित्र
७१ कूटतटेऽभवत्॥ कर्पूरकर्णपूरोभूद्यद्यशः सुरयोषितां॥ कांतावर्गे स नारेभे प्रियां तुल्यगुणां विना॥ न विना चंद्रिकालक्ष्मीं
चंद्रकांतः प्रसीदति॥ स निर्ममे नवोद्यानं विमानमिव गांगनं॥ शंकेन तत्सधकामस्य वसंतेन च कल्पितं॥ रममाणः सदा तस्मि
न्सनानाकुसुमोज्वले॥ ननंद नंदनगतः शतक्रतुरिवापरः॥ कदाचिन्नयनानंदनिस्पंदमधुवाहिनी॥ गीर्वाणनर्तकीरंभा तं
ददर्शाथ तो च सः॥ सातं विलोक्य सच्छायं शृंगाररसरूपादपं॥ सर्वातिशायिनिर्माणपुण्याह्वमिव वेधसः॥ स च तां वीक्ष्य पूर्णें
दुनवलावण्यचंद्रिकां॥ कौशिकीरसिकस्येव कामस्य रतिभूमिकां॥ बभूवतुः स्मरशरासारसंभिन्नमानसौ॥ तत्सक्ष
पवनेनैव सरोमोद्गमवेपथू॥ सामानुषतनुर्भुक्त्वा तमुपेत्य घनस्तनी॥ गंगेव शंतनुं भेजे सुसेनं नाककामिनी॥ कासीति
प्रच्छनीया हं नराजन्निति संविदं॥ तां प्राप्य भूमिपालोभूत्स्मरसाम्राज्यदीक्षितः॥ रममाणः सह तया रतिमानिव मन्म
थः॥ मधुमास इव श्रीमान्नवोद्यानमभूषयत्॥ ततः सा गर्भमासाद्य कालेन वसुधाधिपात्॥ असूत तनयां कांतिसंतानजि
तचंद्रिकां॥ सावदन्नृपतिं नाथ स्वस्ति गच्छाम्यहं दिवं॥ रंभामवेहि मां देव देवीं देवविलासिनीं॥ सुताप्रसवपर्यंतः संगमो मे
भुवि त्वया॥ पुनः पुण्याः प्रभावान्मे भविता संगमस्त्वया॥ इत्युक्त्वाप्रययौ व्योम्नि नाडिस्फुरितविभ्रमा॥ कृत्वा भुजंगी नृपतिं
वियोगविषमूर्छितं॥ ततः सुलोचनानाम सा कन्या विभ्रमावनिः॥ प्रियासमागमाशेव ववृधे नृपतेः शनैः॥ तां यौवनवतं सेनसं
गतां स्तबकस्तनीं॥ श्यामामपश्यद्द्युतिमान्काश्यपो मुनिसत्तमः॥ अभिलाषवतीं दृष्ट्वा स तां हरिणलोचनां॥ युवा ययाचे
नृपतिं स्मरस्मेरः सुलोचनां॥ याचितो वत्सं मुनिना प्रोवाच वसुधाधिपः॥ रंभावृत्तांतमावेद्य सर्वं विरहनिःसहः॥ प्रियास
मागमायेयं तनया मे भविष्यति॥ अनीश्वरोस्मि दानेस्यामुने तत्संगमावधि॥ श्रुत्वेति वचनं राज्ञो बभाषे मुनिपुत्रकः॥ अ
हं स्वतपसोर्द्धेन सन्नारी रस्य ते दिवि॥ रंभासमागमं कर्ता देहि राजन्सुलोचनं॥ पुरा प्रमद्वरां जायां भृगवंशभवो गुरुः॥ आ ७१
युषोर्द्धेन दुष्टाहिदष्टामिष्टामजीवयत्॥ इत्युक्त्वा संगमं राज्ञो विधाय सुरयोषिता॥ सुलोचनां मुनिः प्राप स्मरामृततरंगिणीं॥

इति कन्याप्रभावेन प्राप्नुवंतीप्सितं नराः॥ शापादिकारणैर्देव्यो मर्त्येष्ववतरंति च॥ ॥ सुलोचनाख्यायिका॥ ॥ इति विप्र
गिरा राजा चिंतां तत्याज निर्वृतः॥ कलिंगसेनां तनयां पश्यन्नयनचंद्रिकां॥ सा पितुर्मंदिरे बाला केलिलीलाविलासिनी॥ दृष्टा सो
धस्थिताम्नां व्योम्नि कदाचिद्दैत्यकन्यया॥ यमस्य तनया तन्वी साथ सोमप्रभाभिधा॥ कृत्वा मर्त्याचितं वेषं सख्यं चक्रे तया सह॥
तयो विस्रंभसद्भावा प्रेमप्रवणपल्लवा॥ संसिक्ता स्नेहपीयूषैर्ववृधे प्रीतिवल्लरी॥ तयोर्मयसुता प्राह तां विश्वासकथांतरे॥ रा
जपुत्रि सुगुप्तोयं संगमो मे प्रिय त्वया॥ नास्मि राज्ञगृहे स्थातुं शक्ता प्रकटितात्वया॥ आशीविषगुहाघोरं राजगेहं हि दुःसहं
॥ नगर्यां पुष्करावत्यां गूढसेनो नृपात्मजः॥ मित्रं वणिक्सुतं चक्रे प्रणयेनापि तत्पुरा॥ संगतो राजपुत्रेण स्नेहसन्मानकारिणा
॥ सततं तत्प्रियहिते व्रतः सोभूद्वणिक्सुतः॥ राजपुत्रोथ जन्यर्थयात्रायां मित्रसंयुतः॥ उदयाद्रिरिव प्रायात्सितछत्रेंदुमंडलः॥
स व्रजन्पथि विश्रांतः सैनिकैः सुहृदा सह॥ विवाहोत्कंठितो वीतनिद्रो धात्रीमभाषत॥ शृणु प्रदर्पजननीं कथामेतां यशालिनीं
॥ इत्युक्ते वासवक्त्रीं वोभजे निद्रां समाकुलः॥ धात्र्यामपि प्रसुप्तायामेक एव वणिक्सुतः॥ विनिद्रो निशि शुश्राव वाणीमाकाश
योषितं॥ अहो नु राजपुत्रेण कथिता नैव सा कथा॥ कौतुकाद्वयमायाताः सुतश्चैष मदाकुलः॥ आभाष्य कथयामीति मूर्खो यो
याति मूकतां॥ कौतुकान्नश्रोतुमायाता स्तं शयं त्येव देवताः॥ हारं वर्त्मनि संप्राप्य यदा कंठे करिष्यति॥ तदा तेनैव पापेन कृतो
तमयं मेष्यति॥ भक्षयित्वाम्रवृक्षस्य फलान्येष विनंक्ष्यति॥ अथ वास्योपरि गृहं क्षिप्रमेव पतिष्यति॥ क्षुतशब्दं शतैर्वास्य जीवश
ब्दशतं न चेत्॥ कश्चिद्दद्यति तेनैव प्रयास्यत्येष पंचतां॥ अस्य शापप्रतीकारं यः कुर्यात्स शुचेन सः॥ सोपिच्यसनमासाद्य सं
शयेन पतिष्यति॥ श्रुत्वेति शापान्देवीभिर्वितीर्णान्सुहृदो मिथः॥ तत्प्रतीकारसंनद्धः स बभूव वणिक्सुतः॥ प्रभाते कृतपात्रो
थ राजपुत्रः सहानुगः॥ यथोक्तमेव देवीभिर्हारं प्राप फलानि च॥ वणिक्पुत्रेण सहसा निषिद्धो नाग्रहीत्स तं॥ महागृहनिपा
ताच्च तेनैवाभ्येत्य रक्षितः॥ ततः स विहितोद्वाहो नवकांतासमागमः॥ उवास राजतनयः श्वसुरावसथे सुखं॥ वणिक्पुत्रो
पि रक्षायां तस्यासीच्छन्नविग्रहः॥ अंतःपुरे स शुश्राव क्षुतशब्दशतं निशि॥ जीव जीवेति शब्दानां सस्वरं शतमभ्यधात्॥ इत्य
स्य शापनिर्वाणविधिः सुसः सुहृद्वरः॥ ततः प्रभाते प्रच्छन्नं निर्गतोंतःपुराद्वणिक्॥ दृष्टो राजसुतेनाशु क्रोधव्याकुलचेतसा॥

अयमंतःपुरेपापः छन्नोनिशिकरोतिकिं ॥ इत्युक्ताभ्र कुटिभ्रांत्यादिदेशास्यवधंक्रुधा ॥ स राजपुत्रवचसागादबद्धपु
रःसरैः ॥ अचिंतयदहोकष्टानृणांराजकुलस्थितिः ॥ व्यालाः सुखेन सेव्यंते वातोद्भूताश्च वन्हयः ॥ नतुनित्यमदाध्माता
राजानःकुटिलाशयाः ॥ ध्यात्वेति दुःखसंतप्तोराजपुत्रमुपेत्यसः ॥ हितंयथाकृतंसर्वं तत्तमस्मैन्यवेदयत् ॥ ततस्तत्वावि
चारेण राजपुत्रोवणिक्कृतं ॥ हितैषिणंप्रियंमित्रंप्रसाद्यमुदितोभवत् ॥ इत्येवंराजभिःसख्यं सखिदुःखेन रक्ष्यते ॥ को
हिकृष्णेनसिंहेनकृतकंठग्रहःस्वपेत् ॥ २९ ॥ ॥ राजपुत्राख्यायिका ॥ ॥ कलिंगदत्ततनयानिशम्येतिसखीवचः ॥ उवा
च सत्यमेवैतत्कृतघ्नाः सखिभूमिपाः ॥ श्रन्याश्रयप्रियाघोरा दुःखसाध्याविकारिणः ॥ मित्रविद्वेषणोज्ञेयाः पिशाचा
इवभीषणाः ॥ कथांशृणुपिशाचानांराजवृत्तानुकारिणां ॥ पुरायज्ञस्थलग्रामे ब्राह्मणोत्यधनोभवत् ॥ कदाचित्सकु
ठारेणाभिदन्काष्ठाग्रमक्षमः ॥ अपाटयन्निजांजंघां तेनाभूच्चिरमातुरः ॥ सर्वोपायपरिक्षीणैः कृशास्यस्तैःचिकित्सकैः ॥
नाडीव्रणार्तःसुहृदः सवाक्याद्युक्तिमाप्तवान् ॥ पिशाचंसाधयेत्येवंमित्रवाक्यात्सतत्परः ॥ अतोषयन्निशिमहापितृवाने
बलिपुष्पदः ॥ गतोवरात्पिशाचस्यतदत्तैरौषधिव्रजैः ॥ स्वस्थः स्वच्छंदसंचारोविजहारसुखंद्विजः ॥ रूढनाडीव्रणंकाले
तमुवाचपिशाचकः ॥ रोहत्येवमयादृष्टंद्वितीयंदर्शयव्रणं ॥ अपरंचेद्व्रणंविप्रनमेदर्शयसिस्फुटं ॥ मयाक्रोधानलाज्य
त्वंनीतोनैवभविष्यसि ॥ पिशाचवाचंश्रुत्वेतिपुनश्चिंताग्नितापितः ॥ प्रदध्यौस्वगृहंगत्वानिश्वासग्लपिताधरः ॥ ग्रस्त
एवास्मिपापेनकुतोनाडीव्रणीजनः ॥ इतिध्यायन्स्वसुतयादृष्टोनष्टधृतिस्मृतिः ॥ पृष्ट्वाविज्ञायवृत्तांतंसारंडानिखि
लंपितुः ॥ नाडीव्रणंपिशाचायदर्शयामीत्यभाषत ॥ सपिशाचःसमाहूतोहृष्टेनाथद्विजन्मना ॥ विदग्धांविजनेप्राय
तस्कृतांदुर्ग्रहाकुलः ॥ वरांगंविवृतंकृत्वासापिशाचमभाषत ॥ सखेनाडीव्रणस्यास्यसन्नद्धोभवरोपणे ॥ इतिमुग्धा
पिशाचोसौश्रुत्वातद्वचनंमृदु ॥ यत्राहतौषधव्रातैस्तत्सरःकृशतांययौ ॥ प्रभवंतियतोलोकाः प्रलयंयांतियेन च ॥ संसा
रवत्मवितंकःपिधातुंतदीश्वरः ॥ ततःपिशाचः संविग्नश्चिरात्कुंठक्रियाक्रमः ॥ भयात्पलाय्यप्रययौगर्हयन्निज
दुर्ग्रहं ॥ इत्येवंदुर्ग्रहाध्माताःपिशाचाजडबुद्धयः ॥ शठाःकलुषचित्ताश्चराजपुत्रास्ततोधिकाः ॥ मुहूर्तबद्धसौहार्दानि ५२

लज्जाबहुसेविताः ॥ लुब्धानृपाश्चवेश्याश्चदूरस्थाएवशोभनाः ॥ ॥ पिशाचाख्यायिका ॥ ॥ वचःकलिंगसेनायाःश्रुत्वेत्य
सुरकन्यका ॥ उवाचचंद्रवदनावीक्ष्यसंध्यारुणंनभः ॥ अयंकमलिनीकांतः प्राप्तोस्ताचलमौलितां ॥ गच्छामिपुनरेष्यामि
पंथामेषष्टियोजनः ॥ इत्युक्त्वाकाशमाविश्यतूर्णंसोमप्रभाययौ ॥ विधायवदनध्यानैर्बहुसोमप्रभंनभः ॥ ततःसख्यांप्रया
तायांराजपुत्रीव्यचिंतयत् ॥ केयंविद्याधरीदेवीभुजंगीवासखीमम ॥ श्रूयतेमानुषैःसख्यंभजंतिकिलदेवता ॥ पृथ्वीपतेः
पृथोःपूर्वंपुत्र्यासख्यमरुंधती ॥ भेजेनयनमार्गेणप्रीतिर्हिविशतेस्वयं ॥ वासिष्ठधेनुंतद्वाक्यात्पृथुरानीयभूतलं ॥ अमृतं
तत्पयोदिव्यंददौतस्यैसुदुर्लभं ॥ गावोवतीर्णालोकेस्मिंस्ततःप्रभृतिपावनाः ॥ तदेषाकापिमेदेवीसखीपुण्यैःसमागता ॥ क
लिंगसेनाध्यात्वेतिनिनायरजनींशनैः ॥ अथापरेद्युरादायविचित्रायंत्रपुत्रिकाः ॥ सखीसमभ्ययात्तूर्णंसोत्कंठामयपुत्रिका
॥ साबभाषेतयापृष्टाकृताहमसुरप्रभोः ॥ मयस्यमायावैचित्र्यधाम्नःसोमप्रभाभिधा ॥ स्वयंप्रभामेभगिनी सास्तिपाताल
मंदिरे ॥ हनुमत्प्रमुखैर्दृष्टाजानकीमार्गणैःपुरा ॥ कुबेरतनयःश्रीमान्भर्तामेनलकूबरः ॥ यच्छापाच्चैत्रास्योपिनाभूत्सख
धूविभुः ॥ इत्युक्त्वायंत्रवैचित्र्यात्सजीवाइवपुत्रिकाः ॥ करंडिकांसमुद्घाट्यददौसख्यैप्रियायसः ॥ ततोगूढसखीसक्तांत्यक्ता ८
हारांस्कृतांनृपः ॥ अस्वस्थांमन्यमानस्तांवैद्यंपप्रच्छदुःखितः ॥ वैद्योवदन्नाजपुत्र्याराजन्व्याधिर्नलक्ष्यते ॥ प्रेमप्रहर्षसंपूर्णा
नाभिनंदतिभोजनं ॥ ततोविज्ञायवृत्तांतंदुहितुस्तांचतत्सखीं ॥ कलिंगदेवोदेवीचपरांमुदमवापतुः ॥ राज्ञाविदितवृत्तेनदत्ता
नुज्ञाचसातदा ॥ सोमप्रभांसविश्रंभामियेषप्रकटांसखीं ॥ सातत्रराजभवनेपूजितातेनभूभुजा ॥ विजहारसमंसख्याविहा
रतत्रहारिणी ॥ सायंत्रपुत्रिकानीतदिव्यकोकनदपंकजैः ॥ विहारपूजनंचक्रेतेनाभूद्विस्मितोनृपः ॥ अनुज्ञानाततःपित्रासहां
तःपुररक्षिभिः ॥ मायायंत्रविमानेनतांनिनायमयात्मजा ॥ नीतास्वयंप्रभांद्रष्टुंज्येष्ठांस्वभगिनींतथा ॥ पुरंददर्शवैचित्र्य
चित्रकर्मेववेधसः ॥ तत्रापश्यज्जटापुंजविभ्राजिवदनांवधूं ॥ नलिनीमिवशैवालजटालोत्फुल्लपंकजां ॥ स्फाटिकेनाक्षसूत्रे
णविराजितकरांबुजां ॥ ननुप्रसूतलावण्यबिंदुमालांकितामिव ॥ उद्वृत्तकुचपर्यंतपर्यस्तधवलांशुकां ॥ चक्रवाकयुगन्य
स्तफेनवेगामिवापगां ॥ विलोक्यतांराजपुत्रीप्रणनामनताननाः ॥ भ्रश्यत्कर्णोत्पलरजोरेखासंवलितस्तनीं ॥ स्वयंप्रभाराजपु

त्रीं तां विलोक्य स कलोचनो॥ तामभिजनमाकर्ण्य फलान्यस्यै स्वयं ददौ॥ जरानिवारणान्याशु भुक्त्वा तानि फलानि सा॥ बभूव
बालार्कायूषक्शालिनेवाधिकद्युतिः॥ ततो विचित्रमुद्यानं दिव्याभिप्रायनिर्मितं॥ वापीं चक्रोचनोभोजां दृष्ट्वा प्रीतिमवाप सा॥ स्व
यंप्रभामथामंत्र्य सो सोमप्रभया सह॥ ययौ यंत्रविमानेन पितुस्तक्षशिलां पुरीं॥ अंतःपुरगता तत्र कदाचिद्दृश्णोद्भिरे॥
सोमप्रभा या किं अंभ कथास्तु मृगलोचना॥ सखि मन्ये यदा कश्चिद्दूरस्त्वां परिणेष्यति॥ तदा नोसह वासो यं ध्रुवं दूरी भविष्यति
॥ प्रवेक्ष्यामि कथं स्वैरं सखि भर्तृगृहं तव॥ जामिश्वश्रूजनायत्तं विषमं भर्तृमंदिरं॥ ॥स्वयंप्रभासमागमः॥ ॥शृणुश्वश्रूकृ
ते दुःखे यथा सा कीर्तिसेनया॥ विपद्यबुध्याच यथा निस्तीर्णो व्यसनोदधिः॥ धनपालित इत्यासीद्वणिक् पाटलिपुत्रिके
॥ कीर्तिसेनाभवत्तस्य कन्या लावण्यवाहिनी॥ तां यौवनवतीं काले स सारं विलोचनां॥ देवसेनाय वणिजे मगधावासिने द
दौ॥ सा भर्त्रा लालितास्वैरं श्वश्रूकलहपीडिता॥ उवास गेहे श्रीखंडवने सर्पाकुले यथा॥ ततः कदाचिज्जलधिं प्रस्थितो द्र
विणार्जने॥ देवसेनः प्रियावेश्म विवेशामंत्रणोद्यतः॥ तमब्रवीत्कीर्तिसेना त्वयि याते ध्रुवं विभो॥ भक्षयिष्यति मां श्वश्रूः
कलहेण निरंतरं॥ इति प्रियावचः श्रुत्वा संस्तभ्य विरहव्यथां॥ ययौ मातरमाभाष्य वर्तयेथाः स्नुषामिति॥ तस्मिन्गते तज्ज
ननी सततं क्रोधमूर्छिता॥ वियोगक्लेशितां प्राह कीर्तिसेनां नताननां॥ सूक्ष्म ते निस्यरुदिते दुर्भगे मंगलोज्झिते॥ बाष्पं ते
पितुरेवास्तु पुत्रो जीवतु मे चिरं॥ उत्केतिनस्सरिजनं निरस्य सहसा गृहात्॥ भयाप्रसन्नवदनां पुनराह परेहनि॥ हा मत्शीले
तव पतिर्भयाद्देशांतरं गतः॥ त्वं तु वेश्येव निःस्नेहा विलासेनेच्छसे जनं॥ इति नानाविधोद्वेग सावेगक्रोधदुःसहैः॥ वाक्सा
यकैस्ता मसकृज्जघान विरहे पि सा॥ संमंत्र्य तद्वधोपायं तामथांध गृहोदरे॥ रक्षे ह भर्तृ द्रविणं स्वमित्युक्त्वान्यवेशायत्
॥ श्वश्वास्तु पिहिते तत्र न्यस्ता सा निबिडार्गले॥ स दाशन चतुर्भागं लेभे भग्नशरावके॥ शरावखर्परेणाथ निचखान गृहं श
नैः॥ दैवात्प्राप्तेन च पुनः खनित्रेण महाबिलं॥ तेनैव निश्चि निर्गत्य गृहीत कनकांबरा॥ विधाय पौरुषं वेषं वल्लभी संमुखं य
यौ॥ पथि सार्थपतिं प्राप्य कृतिराजसुताकृतिः॥ प्रययौ पुरुषस्यैव शौयपरिहारपरेव सा॥ ततस्तस्मिन्महासार्थे पपातानाश ७३
निवन्निशि॥ चौरसेनाविधौवांमत्रुत्थेस्तालंबनान्यपि॥ सा चौरभयवित्रस्ता सार्थे निःशेषतां गमे॥ उवास गूढा रजनीं तृण

भूकुहरांतरे॥ प्रातस्ततो विनिर्गत्य प्रविष्टा विकटाटवीं॥ सिंहव्यालैर्ननिहता सतीतेजो हि दुःसहं॥ राजपुत्राकृतिं कोपि
दृष्ट्वा तामध्वतापितां॥ कारुण्यात्सलिलैः शीतैर्वितृष्णामकरोन्मुनिः॥ तिरोहिते मुनिस्ते तेनिशीथे प्रत्युपस्थिते॥ सा तस्थौ द्र
स्युचकिता स्थविरद्रुमकोटरे॥ ततोर्धरात्रे संप्राप्ते राक्षसीं स हपुत्रकैः॥ छायामिवकृतांतस्य ददर्शालक्षिता पुरः॥ भोजनं या
च्यमाना सो स्तनयैस्तानभाषत॥ महाकालेन निर्दिष्टं भोजनं नो भविष्यति॥ वसु दत्ताभिधो राजा वसुदत्तपुराधिपः॥ शतप
द्यास्य मा क्रो नःकर्णरंध्रप्रविष्टया॥ तत्सूतैः शतपदी शाते व्यापशिरान्तः॥ अविज्ञाता मयो वैद्यैर्भविता पूर्णभोजनं॥ श्रुत्वे
ति कौतुकाविष्टैः पृष्टा सा राक्षसी सुतैः॥ नृपस्य जीवनोपायं वीतशोकमभाषत॥ धृतात्यक्तः समध्यान्हतापसंतप्तयायसेः॥ उ
पलिप्तशिरा कृत्वाश्रवणे वेणुनालिकां॥ स्थापयेन्नलिकाप्रांते कुंभं यदि सुशीतलं॥ ततोस्य निःसरंत्येव शतपद्योन संशयः॥ कि
मनेनाथवास्माकं यातु राजा स पंचतां॥ अस्मत्सं वृत्तये तूर्णमित्युक्त्वा सस्कृताययौ॥ कीर्तिसेनानि शम्यैतत्प्रातस्त्वं प्रययौ
नृपं॥ अदूरवासिनं क्षिप्रं वैद्यवेषोपलक्षिता॥ पूर्णेंदुसुंदरमुखः श्रीमानेक इवाश्विनोः॥ सुकुमारोरविंदाक्षो वैद्यो देशांतरागं
तः॥ नृपं स्वस्थं विधास्यामि प्रतिज्ञामिति निर्दिशन्॥ प्रविष्ट इति राजानं प्रतीहारो व्यजिज्ञपन्॥ ततः क्षिप्रं समाहूता राज्ञा दे
व्या च पूजिता॥ वैद्यवेषा विवेशाक्षिप्रं कीर्तिसेना नृपालयं॥ ददर्श तत्र नृपतिं क्षयक्षीणमिवोडुपं॥ शोषितं पुण्यसंघेन छायावृ
क्षमिवोन्नतं॥ देवीकरतलन्यस्तकपालो वीक्ष्य तं नृपः॥ निर्वृतो भूत्शुभ प्राप्तो मनः पूर्वं प्रसीदति॥ ततो यथोक्तं राक्षस्या सा विधा
य महीपतेः॥ चकर्ष शिरसो व्याधिं येन स्वस्थो भवत्क्षणात्॥ व्याधिमुक्तोथ नृपतिर्वैद्यवेषामुवाच तां॥ राज्यार्धं मम रत्ना द्युं गृ
हाणेति प्रहृष्टधीः॥ साब्रवीन्न्यासभूतं मे संप्रति त्वयि तिष्ठतु॥ याचितो दास्यसीत्युक्त्वा गूढा न स्थौ तदालये॥ ततः कालेन
स वणिग्देवसेनः समाययौ॥ महाभांडधनाभोगपूरिताशेषपत्तनः॥ राज्ञा निवारितं गं तुं शुल्कायतनमुपेत्य सा॥ चिरसंग
मर्षायूषपूर्व्यमाना भवन्मुहुः॥ देवसेनः परिज्ञाय कीर्तिसेनां सकौतुकः॥ पृष्ट्वा निशम्य वृत्तांत बभूव प्रमदाकुलः॥ भूपालो
पि तदाश्चर्यं विदित्वा निखिलं ततः॥ उवाच धर्मभगिनी मम मेयं त्वं स्वसः पतिः॥ वैद्यवेषं विधायैषा संप्राप्ताजीविता यमे॥ इत्युक्त्वा
वणिजे राजा राज्यार्धं मुदितो ददौ॥ इति श्वश्रास्तु विपुलेया तितांशोकसागरे॥ कीर्तिसेना स्वधर्मेण तारिता प्राप वल्लभं॥ ॥

बृ॰ क॰ कीर्तिसेनाख्यायिका॥ ॥कलिंगदत्ततनयानिशम्येतिसखीवचः॥ सतीचरितमाश्चर्यंप्रदध्यौमनसासती॥ ततोद्विग्नतनु
तांयातेवयस्यांगुंतुमुद्यतां॥ कलिंगसेनाप्रोवाचसखिदृष्टायमेनिजं॥ पतिंधनाधिनाथस्यतनयेनलकूबरं॥ इतिसोमप्रभाश्रु
४४ त्वाराजपुत्रीमभाषत॥ त्वंयौवनवतीकांतासमुचाचविश्रृंखलः॥ परस्परविरुद्धंहिदर्शनंतवतस्यच॥ ईर्ष्याकोपननीतत्रसो
हार्दंनंक्ष्यतिध्रुवं॥ नदीकूलद्रुमस्येवस्नेहस्येर्ष्याविपत्तये॥ उक्त्वेतिप्रययौदिक्षुतन्वानाकांतिकौमुदीं॥ दृष्ट्वैकलिंगसेना
चतस्थौव्योमावलोकिनी॥ ततोयदृच्छयायातोविद्याधरधराधिपः॥ युवामदनवेगाख्यस्तांददर्शनभोगतः॥ तांवीक्ष्यस्म
रसौंदर्यविभ्रमाणांसमागतं॥ अमृताहरणेशौरेःशिक्षांकांताकृतामिव॥ सोभवन्मन्मथशरासारजर्जरिताकृतिः॥ तयादृ
ष्टिविषेणेवभुजंग्यामुहुरर्दितः॥ सधैर्यंक्षिप्रमास्थायकथंविद्याधरस्यमे॥ मानुषीमाहयोग्येत्यमितिध्यानपरोभवत्॥ ततो
विवेदविज्ञप्तिविद्ययागुलिकाधरः॥ सतामप्सरसःशापादवतीर्णांत्रातक्रतोः॥ ज्ञात्वेतितद्गतमनाःकालकूटगिरौनिजां॥
राजधानींसमभ्येत्यतस्थौस्त्रस्वपराङ्मुखः॥ सहेमकदलीकुंजेकिंनरीगीतनादिते॥ तंराजतनयांध्यायन्नलेभेतत्रनिर्वृ
तिं॥ चिंतयंस्तन्मुखांभोजंभेजेनांतःपुरेरतिं॥ मंदारमालामालोक्यमालत्यांकोहिसादरः॥ रावणस्येवतस्याभूच्छापस्त्री
सेवनेबलात्॥ यंत्रितस्तेनसहसाहर्तुंतांनाकरोन्मतिं॥ सोभवद्विरहायासपांडुरःखंडितान्वयः॥ पौर्णमासीविरहितःश
शीवक्षामविग्रहः॥ किंविद्याधरराज्येनकांतारसदर्शनेमे॥ यत्रनेत्रामृतंकांतानसानेत्रावलंबिनी॥ तपसावरदंदेवमा
राध्यगिरिजाधवं॥ ध्रुवंकांतामवाप्स्यामितामायतविलोचनां॥ अनुकूलःस्फुटद्दानमानिताश्रीःसितंयशः॥ मनःशु
द्धाचदयितानातुष्टपार्वतीपतौ॥ इतिध्यात्वास्मरंदेवंत्र्यंबकंतपसेययौ॥ संकल्प्यकल्पविटपीतस्यनामनशंकरः॥ ऋष
भस्यगिरेःशृंगेतपसातस्यधूर्जटिः॥ तुष्टःप्रोवाचतांकन्यांतामवाप्स्यसियुक्तितः॥ कलिंगदत्ततनयांवत्सराजःस्वयं
वरे॥ यावन्नेतिपुरोगत्वातद्रूपेणत्वमाप्नुहि॥ इत्यवाप्यवरंशंभोर्विद्याधरपतिर्ययौ॥ तत्संगमाशयाक्षिप्रंस्मृधासार
परिप्लुतः॥ अत्रांतरेनृपतयस्तनयांरूपशालिनीं॥ कलिंगदत्तनृपतिंदूतैःसर्वैर्ययाचिरे॥ ततोविचार्यनृपतिःकुला ४६
चारगुणैर्नृपान्॥ अमन्यतवरंयोग्यंपुत्र्याःसेनाजितंनृपं॥ रहःकलिंगसेनाथप्राहसोमप्रभांसखीं॥ सेनाजिन्नामभूपालः

पितुर्मेभिमतःपतिः॥ मयपुत्रीनिशेतिप्राहसाश्रुविलोचना॥ अहोनुदग्धविधिनानयोग्यःसंगमःकृतः॥ त्रैलोक्यसुंदरीं
स्त्रभ्रूंप्रवयास्त्वांसपार्थिवः॥ मधुपोर्हतिनस्प्रष्टुंबालांकल्पलतामिव॥ वत्सेशोदयनोनामकौशांब्यामस्तिभूपतिः॥ सनेससमु
चितःकांतेवरोगौर्याइवेश्वरः॥ तस्यवासवदत्तास्तिदयितानूपशालिनी॥ सात्त्वेभेतनयंतस्माद्भाविविद्याधरेश्वरं॥ इत्युक्त्वावत्स
राजस्यवंशाद्दत्तोतविक्रमान्॥ निवेद्यनिखिलंसख्येपुनराहनृपात्मजां॥ तांवीक्ष्यवत्सराजोसौध्रुवंतांत्यक्ष्यतिप्रियां॥ कमला
कमलंदृष्ट्वानान्यत्सद्मस्पृहात्यलं॥ उखायाश्चित्रलेखासौबाणपुत्र्यायथापुरा॥ प्राद्युम्निसंगमंचक्रेकरिष्यामितथास्मिते॥
इत्याकर्ण्यसखीवाक्यंराजपुत्रीजगादतां॥ अन्याभिःसखिभूपालःकांताभिःसनिषेव्यते॥ महासेनस्रुतासक्तोदुर्लभोस्य
जनस्यसः॥ अकामकामाःकामिन्यःसखियांत्येवहास्यतां॥ राजपुत्र्यानिशम्येतिप्राहसोमप्रभापुनः॥ यत्नमत्रविधास्या
मिदैवायत्तास्तुसिद्धयः॥ स्वयंसेनजितंपूर्वंवास्यगौडमहीपतिं॥ मत्प्रभावोदितगतिःप्रेक्ष्यस्वोदयनंततः॥ लावण्यस्या
स्यनेस्त्रभ्रुसौभाग्यस्यकुलस्यच॥ ध्रुवंसमुचितंपूर्वेचंद्रचूडःकरिष्यति॥ राज्ञोविक्रमसेनस्यकन्यातेजोवतीपुरा॥ कंचि
द्युवानमालोक्यबभूवस्मरतापिता॥ सख्यादेवगृहेतेनकृत्वासंगमसंविदं॥ निर्ययौराजपुत्रीसास्तोकमूकाविभूषणा॥
अत्रांतरेराजपुत्रःसगोत्रबलविद्रुतः॥ राजसंश्रयकामस्तद्देवायतनमभ्ययात्॥ अवापतत्रतांदेवात्सराजतनयांयुवा॥
अधन्यैराहृतंनामकल्याणिभिरवाप्यते॥ सातमासाद्यदयितंतोषमभ्यधिकंययौ॥ भृंगीचंपककामेवपारिजातसमा
गता॥ तत्संभोगसुधासिक्तःसराजानमवाप्यतं॥ प्रातःसमुचितांपूजांप्रपदेगूढकामुकः॥ राज्ञोपिस्वसुतांदातुंतस्मैम
तिरभूद्दृढा॥ कन्यावृत्तंचतत्सर्वंविवेदनृपतिःशनैः॥ तद्विज्ञायक्षितिपतिर्निजामात्यानभाषत॥ सोमदत्तायकन्येयंम
नसाकल्पितामया॥ स्वयंगांधर्वविधिनापूर्वमेववृतानया॥ विधिरेवसमाधानंज्ञातंसदृशासिद्धये॥ राज्ञःश्रुत्वेतिवचनं
प्रत्यभाषंतमंत्रिणः॥ दिष्ट्यासदृशायोगेनतशान्वेयंतवात्मजा॥ स्वयंवृतानयाश्रीमान्राजपुत्रःकुलोचितः॥ दैवदैवेन
लिखितंप्रमार्ष्टुंकस्यकःक्षमः॥ हरिशर्मापुराविप्रोदारिद्र्याद्दासतांगतः॥ कुटुंबिनोधनवतःसभार्यःसहपुत्रकः॥
गृहेकुटुंबिनस्तस्यचैवाहिकमहोत्सवे॥ भक्ष्यभोज्येप्रवितते सततंदस्पृहाकुलः॥ दिनांतेभोजनव्यग्रेसंबंधिज

बृ॰ क॰ नमंडले ॥ विस्मृतः स्फुलरिक्षामः प्रदध्यौ दुःखितः क्षणं ॥ अवमानावधूतस्य दारिद्र्योपहतत्विषः ॥ कथमादरमाधत्ते प्र
सिद्धश्शरणो जनः ॥ अहो विद्याविहीनोहं निर्द्धनः श्रोन्यतां गतः ॥ दीपपात्रमिवादीपं लोके दग्धदशाश्रयात् ॥ क्षणं सचिं
४५ तयत्वेति निजां जायामभाषत ॥ विस्मृतं पत्रयमांदीनमस्मिन्नुत्सवभोजने ॥ इतो दूरतरं नीत्वा जनस्यैकस्य घोटकं ॥ छन्नं
स्थापय विज्ञानी भविष्यामि तदाश्रये ॥ कूटज्ञानी हयप्राप्त्या प्रसिद्धिं परमां गतः ॥ नावमानमवाप्स्यामि कृत्यवद्वीहि
धूर्त्तता ॥ इति पत्युर्वचः श्रुत्वा नीत्वा सानुरगं निशि ॥ ववंध विजने धीरा जने मधुविमोहिते ॥ हारितोश्व इति प्रातर्जनेको
लाहलाकुले ॥ ब्राह्मणी प्राह भर्त्ता मे हरिश्शर्मा प्रनष्टवित् ॥ ततः कुटुंबिनाभ्येत्य प्रार्थितः प्राह स द्विजः ॥ कृतकग्रहवि
ज्ञानः स्वांगुलीगणनापरः ॥ नातिदूरे स्थितः सोश्वश्चौरैर्विरहितो वने ॥ इति तद्वचसा लब्धे हये ख्यातो बभूव सः ॥ त
तः कदाचिद्द्रविणे हारिते राजवेश्मनि ॥ प्रसिद्धः स समाहूतो मूर्खोस्मीति भयाकुलः ॥ प्रातर्वक्ष्यामि संचित्य समाभा
ष्येति भूपतिं ॥ निर्जने मंदिरे तस्थौ स चिंताध्याननिश्चलः ॥ अत्रांतरे नरपतेर्जिह्वाख्या गृहचेटिका ॥ तच्चौरी शंकिता ग
त्वा तमपश्यदलक्षिता ॥ सोपि दुःखाकुलः प्राह राजभीत्या वृथामतिः ॥ धिग्जिह्वे त्वां ययाहंतसंश्रयः स्वयमाहृतः ॥
निजजिह्वामिति मुहुस्तस्य भर्त्सयतो वचः ॥ श्रुत्वा सा चेटिका तूर्णं पादयोरपतद्भयात् ॥ विज्ञाता भवता पापा साहं जिह्वेव
तस्करी ॥ इत्युक्तवाक्यां तां ज्ञात्वा स दंभमधिकं व्यधात् ॥ ततो राजानमभ्येत्य कृतकज्ञानगर्वितः ॥ मुहुरुल्लालिते कम्बू
र्युष्टांगुलितलो मुहुः ॥ चकार प्रकटं सर्वं धनं राज्ञा स पूजितः ॥ ख्यातिपूजासमुन्नद्धे तस्मिन्नभ्येत्य मंत्रिणः ॥ धूर्तो
यं चोरसंकेती मूर्ख इत्यूचिरे नृपं ॥ राजापि तत्परीक्षायै मंडूकं पिहिते घटे ॥ निधायास्मिन्नु किमस्तीति प्राह तं मंत्रिसं
सदि ॥ पुनः स दुःखितश्चिंताध्यानस्तिमितलोचनः ॥ हा मंडूक हतोसीति जगादोच्चैर्भयाहतः ॥ मंडूकेत्यभिधा तस्य
बाल्ये मात्रा कृताभवत् ॥ ज्ञातं ज्ञातमिति प्राहुः सभ्यास्ते विस्मयाकुलाः ॥ ततो नरपतिस्तस्मै यथेच्छं विभवं ददौ ॥ इत्येवं
दैवविहितं स्वयं भवति सिद्धये ॥ ॥ हरिशर्माख्यायिका ॥ ॥ श्रुत्वेति मंत्रिणो वाक्यं राजा तेजोवतीं ददौ ॥ राजपुत्रा ४५
य गांधर्वविधिना पूर्वसंगतां ॥ इत्येवं कुलसौभाग्यरूपाचारगुणोचितं ॥ तेजोवतीपतिं प्राप्त्वमप्येवमवाप्स्यसि ॥ ॥

तेजोवत्याख्यायिका ॥ ॥ अथार्चयित्वा श्रीकंठं विधिना पार्वतीपतिं ॥ नभसा जग्मतुः सख्यौ ते विमानेन भास्वता ॥ वृद्धवर्षध
रोपेता राजपुत्री मनोजवं ॥ यंत्रचक्रविमानं तद्भेजे दोलाविलासवत् ॥ नृपं सेनजितं द्रष्टुं वत्सराजं च सुंदरी ॥ प्रस्थिता गमनं च
क्रे राजपुत्री स्फुधामये ॥ रावंति नगरं प्राप्य विमानादवरुह्य सा ॥ सख्या सेनजितं दूराद्दर्शितं नाभ्यमन्यत ॥ श्रीमानपि स राजेंद्र
स्तस्या नाभिमतोभवत् ॥ पद्माकरेंदुवोत्फुल्लः शारत्पूर्णशशित्विषः ॥ अलक्षितां तमालोक्य प्राह सोमप्रभां नतः ॥ सखि वत्से
श्वरं द्रष्टुं त्वरते मम मानसं ॥ इत्युक्त्वा यंत्ररचितं विमानमधिरुह्य सा ॥ क्षणादवाप कौशांबीं विलाससदनं श्रियः ॥ अवती
र्य वरोद्याने ततः सख्या सहोचिते ॥ तस्थावलिकुलालोललताजालतिरोहिता ॥ अत्रांतरे वरोद्याने विहाररसतत्परः ॥ व
त्सेश्वरः समभ्यायात्तं देशमतुलद्युतिः ॥ तमालुलोके सानंदं कंपमानघनस्तनी ॥ कलिंगसेना स्वेदांबुक्षाल्यमानविशे
षका ॥ स तस्या मानसोल्लासपूर्णचंद्रोदयो नृपः ॥ चकारोत्कलिकालोललहरीकेलितांडवं ॥ सहसानतमतिर्बभूव
लिखितेव सा ॥ पुरुषोत्तममालोक्य लोकमलेव नवोदिता ॥ गंभीरधीरललितं तं विलोक्य जहर्ष सा ॥ धृतक्षत्रोचिताकारं
हरवैरादिव स्मरं ॥ सोमप्रभा सखीं दृष्ट्वा नरेंद्रगतमानसां ॥ उवाच सखि तिष्ठेह पुनर्मे संगमावधि ॥ स्यंदमानमिदं चक्षुर्ने
ष्टमात्रां सतीव मे ॥ व्यपोह्यैतत्समेष्यामि कर्तव्याना धृतिस्त्वया ॥ यौगंधरायणगिरं विना नायं नरेश्वरः ॥ कृतयानुगतो नि
त्यमभीष्टेपि प्रवर्त्तते ॥ तस्माद्यत्नाद्विधास्यामि तव वत्सेशसंगमं ॥ गच्छामि त्वमविज्ञाता विलंबस्वेह सुंदरि ॥ इत्युक्त्वा देश
तनयाप्रययौ व्योमगामिनी ॥ तस्थौ कलिंगसेना तु वत्सराजाभिलाषिणी ॥ ताम्यती मन्मथाक्रांता ततः कंचुकिनं निजं ॥
प्राहिणोद्वत्सराजाय दूतं संवांछितास्पदे ॥ राजन्विराजमानं त्वां वरयित्री महीपते ॥ कृता कलिंगदत्तस्य प्राप्तेसा हसभूप
तिं ॥ श्रुत्वा विश्रुतलावण्यां स्वयं प्राप्तां नृपात्मजां ॥ हर्षादमन्यतात्मानं धन्योस्मीति नरेश्वरः ॥ ततो रहः समाहूय हृष्टो
यौगंधरायणं ॥ राजेंद्रचंद्रः प्रोवाच विकिरन्दंतचंद्रिकां ॥ राज्ञः कलिंगदत्तस्य तनया रूपविश्रुता ॥ वरयित्री स्वयं प्राप्ता
मामद्य मदनावनिः ॥ विधाय तां समारंभस्तद्विवाहमहोत्सवे ॥ तूर्णं दुर्लभलाभेषु बहुविघ्नाहि सिद्धयः ॥ श्रुत्वेति भूपतिव
चः प्रदध्यौ मंत्रिपुंगवः ॥ अभेषजेस्मिन्व्यसने क्ष्मापतिर्मा पतत्स्विति ॥ कोह्यसामान्यलावण्याविलासतरलभ्रुवां ॥ मुच्यते

व समासाद्य स्वभावरसिको जनः ॥ अमात्यश्चिंतयित्वेति निश्चोगणकैर्व्यधात् ॥ विवाहलग्नव्याजेन कालहारं महीपतेः ॥
नृपोथ रत्नरुचिरं वरोद्यानमुदारधीः ॥ ददौ कलिंगसेनायै गृहं परिणयोत्सुकः ॥ यौगंधरायणोप्यस्य सार्द्धं वासवदत्तया ॥ प
द्मावत्या च संमंत्र्य कालहारमचिंतयत् ॥ सोब्रवीद्देवि संस्तभ्य कोपमीर्ष्यासमुत्थितं ॥ कुर्वीथां भूपतिपुरः कृतकस्वच्छमान
सं ॥ नवोढा हि नरपतेर्वर्तते भूयसादरः ॥ स धर्तुं प्रातिकूल्येन शक्यः केनापि लोपमः ॥ जडा विपर्यया येव विषयेषु तरंगिणः ॥
सन्निरुद्धा विवर्तंते नदीवेगा इवेश्वराः ॥ अनुकूल्येन युक्त्यैव सेवितायां तिमार्दवं ॥ वेगोत्सृष्टा हि शाम्यंति ज्वराः काल इवेश्वराः ॥
कालहारेण न हृषो वंचितः प्रार्थनापरः ॥ शाच्या चारित्ररक्षायै शक्रेणेव प्रोषिते पुरा ॥ इति संविदमाधाय मंत्री वासवदत्तया
॥ मित्रं सस्मार कार्यार्थं योगेशं ब्रह्मराक्षसं ॥ तं ध्यानमात्रआयातं वृत्तं ज्ञातुं न्यवेशयत् ॥ गूढं कलिंगसेनाया मंदिरे युक्तिको
विदः ॥ अत्रांतरे मयस्तत्तासमभ्येत्य विहायसा ॥ कलिंगसेनां सोत्कंठं कंठे जग्राह सादरं ॥ चिरायाता सखी वृत्तं विज्ञाय ज्ञा
नचक्षुषा ॥ प्राह सोमप्रभा सोमप्रभा विजयशालिनीं ॥ स्वयं मयि प्रयातायां किमात्मा वत्सभूभुजे ॥ त्वया प्रकाशितः स
त्यमधीरं ललनामनः ॥ मन्मतं समतिक्रम्य रभसादतिसाहसं ॥ कृतं सुभ्रु त्वया यद्वा मूर्खाः साधुमतद्विषः ॥ अंतर्वेद्यां द्वि
जग्रामे वसुदत्तसुतो द्विजः ॥ विष्णुदत्तोभवद्विद्यावधूविभ्रमदर्पणः ॥ सामित्रैः सप्तभिर्मूर्खैः सह गंतुं भृशार्थितः ॥
वलभीं त्वरयाविष्टे रनक्षत्रेपि निर्ययौ ॥ दुर्निमित्तं समालोक्य तेन ते स्थातुमर्थिताः ॥ अज्ञानदुर्ग्रहग्रस्ता न व्यलंबंत सत्व
राः ॥ अप्रियत्वेन शक्यं ते धर्तुं प्रलयमारुताः ॥ विरुद्धाश्च नदीवेगा न तु मूर्खा हितद्विषः ॥ स गत्वा सह तैर्दूरं बद्धः शापथसं
विदा ॥ निद्राप्रतिश्रयाकांक्षी विवेश पुरमंदिरं ॥ भुक्त्वा श्रमार्तास्तेत्र मूर्खास्तस्यानुयायिनः ॥ भृशं संमाय युर्निद्रां स
त्वजागर्विचारधीः ॥ महानिद्रा महाकोपा महामोहा महाशनाः ॥ मूर्खाः पशूनां शिष्या वा मूर्खाणां पशवोपि वा ॥ स विनिद्र
स्ततोपश्यन्निशि तद्गृहयोषितां ॥ निम्नगामिव तारुण्यमहावेगतरंगितां ॥ प्रच्छन्नकामिनां पूर्वाकेनापि रतिशं गतां ॥
साकंपाकुलनिश्वासा विदधे तस्य कौतुकं ॥ रतिनिद्रापरीतायां तस्यां स्वगृहमाविशत् ॥ गृहस्वामी समायातानु विसृ ४६
ज्य निजसेवकान् ॥ स राजवंश्यः स्ववधूं दृष्ट्वा केनापि संगतां ॥ शिरश्चिछेद सहसा तस्य प्रियाचारित्रहारिणः ॥ खड्गेन द्रुतसं

सिक्तं द्वीसं विभ्रस्तपाणिना ॥ तान्प्राह पांथान्निर्गत्य जलमानीयतामिति ॥ विष्णुदत्तो विनिद्रोथ समुत्थाय ससंभ्रमः ॥ जलं त
स्मै ददौ पाणिखड्गरक्तनिवारणे ॥ पाणी प्रक्षाल्य राजन्ये मोहनिद्रामुपागते ॥ प्रबुद्धाछिन्नशिरसं सापश्यन्नरमंगना ॥ मनः
प्रियं न मादाय निहतं लघुचारिणी ॥ भस्मकूटे स पिहितं रथ्योपांते न्यवेशयत् ॥ तं निधाय प्रविश्याशु पत्युः स हसस्य मस्त
कं ॥ चिछेद रुष्य निस्त्रिंशं घोरं हिस्त्री विचेष्टितं ॥ ततश्चुक्रोश सा तारं मम यातैः पतिर्मम ॥ ५७ ॥ दस्युभिर्निहतो रात्रौ
तच्छ्रुत्वा विविश्युर्जनाः ॥ तैर्गृहीतागताशंकं पांथास्ते भृशविह्वलाः ॥ चोरा इति वधूवाक्यान्मूर्खा नो किंचिदूचिरे ॥ यथावृ
त्तं यथा दृष्टं विष्णुदत्तस्तथावदत् ॥ भस्मकूटांतरस्थं तं तसं दर्शयकलेवरं ॥ प्रत्ययान्नेस्तथा युक्तो दुर्निमित्तविनिर्गतान् ॥
निंदन्वयस्यान्प्रययौ विष्णुदत्तः स्वमंदिरं ॥ इत्येवमनिमित्तानि मूर्खैरगणितान्यपि ॥ फलंति भेषजं तेषां किं नु विद्व
त्समागमः ॥ ॥ मूर्खाख्यायिका ॥ ॥ सखि तूर्यं त्वया मोहात्किमात्मा प्रकटीकृतः ॥ सपत्नीनां भयत्वो हि बहुवाहनि
वर्तते ॥ रक्षणीयासि मे यत्नात्सपत्नीगोचरं गता ॥ मायावतीनां वैरेण योषितां कोद्विमुच्यते ॥ दृढकर्माभिधो राजा मृगयानि
र्गतः पुरा ॥ इक्षुमत्याः परिसरे हृतोश्वेना विशाद्वनं ॥ सोपश्यदनिलालोलतरुरम्ये तपोवने ॥ तत्र कन्यामसामान्यलावण्य
ललिताकृतिं ॥ तां विलोक्य मनःसिंधुचंद्रिकां क्षुभितो नृपः ॥ प्रणम्य तस्याजनकं मुनिं पप्रच्छ मंकृणं ॥ भगवन्कस्य कन्ये
वमस्मिन्नपि तपोवने ॥ यत्कटाक्षकृतालंबो मुह्यातिमदनो जनं ॥ श्रुत्वेति भूपतेः कन्यालाभलोलुपचेतसः ॥ मुनिः प्रो
वाच तामस्मै दातुमभ्युद्यतः स्वयं ॥ ममैवाप्सरसो वीक्ष्य मेनकां धैर्यविप्लवात् ॥ सुतेयं कदलीगर्भा कदलीगर्भसंभवा ॥
गृहाणेमां शशिमुखीं पात्रमेवासि भूपते ॥ दुःखं न इव काण्वेन पुरा दत्तां शकुंतलां ॥ उक्त्वेति प्रददौ तस्मै स कन्यामा
यतेक्षणां ॥ अप्सरःकल्पितोद्वाहयोग्यकौतुकमंगलां ॥ भूभुजा सह तां गंतुं प्रस्तुतां शासनात्पितुः ॥ ऊचुरप्सरसः स्नेहा
द्दत्वास्यै मिश्रसर्षपान् ॥ पुत्रि भूयाः सपत्नीषु सावधाना त्मरक्षणे ॥ न सहंते हि मानिन्यः पत्युरन्यासमागमं ॥ स्वि
न्नाभर्तृगृहे सुभ्रु यदापि तरमेष्यति ॥ तदा मार्गोपदेशाय न वेयं सर्षपावली ॥ इत्युक्त्वा तानिरगमत्साप त्युरनुपा
यिनी ॥ उदयाद्युतस्येव रक्ताभानुमतः प्रभाः ॥ सा राजधानीमासाद्य रुचिरोद्यानभूमिषु ॥ रममाणा चिरं तस्थौ प्रिय

बृ॰ लं॰
४७

प्रणयलालितां॥ तस्यामासक्तमालक्ष्य नृपं त्यक्ताखिलक्रियं॥ ज्येष्ठा नरेंद्रमहिषी बभूवभृशदुःखिता॥ उवाच सा स्वमे
क्रांते सा समाहूय भूपतेः॥ सचिवानेकसक्तोयं क्ष्मापतिर्वीर्यनामिति॥ तदाकर्ण्या ब्रुवन्देवीं स्वैरमालोच्य मंत्रिणः॥ व
यं प्रणयिनी प्रेमच्छेदेन स्वामिनः क्षमाः॥ स्त्रियोऽत्र विनियुज्यंते भिक्षुकी वाथ तापसी॥ मायाकुहककौटिल्यकल्यको
शाहि योषितः॥ श्रुत्वेति लज्जिते वासो कृत्वा तद्वचनं हृदि॥ दंभाचायुक्तमित्युक्त्वा तान्विसृज्य तथाकरोत्॥ गर्भं दासीं वि
सृज्याथ सा समाहूय पूजितां॥ सपत्नीपरिहाराय योजयामास तापसीं॥ गर्भपातनसंस्थानवश्याकर्षणमारणेः॥ ल
ब्धप्रतिष्ठा तत्कार्यं सा तथेत्याह पूजिता॥ तत्प्रतिज्ञाय सा पश्चात्तापं भेजे निजाश्रमे॥ कुहकाः प्रभवंत्येते कथं नृपगृहे ब्रिति॥
रत्नमंत्रौषधियुते सदैवज्ञपुरोहिते॥ महाराजपुरे युक्तानश्यंतिकृद्रसिद्धयः॥ ध्यात्वेति दुःखिता प्रायात्कृहृदं साथ ना
पितं॥ यो मायाडंबरचर्येर्द्धौत्यराशिरिवोत्थितः॥ तस्मै निवेद्य सा सर्वं राजपत्न्या विचेष्टितं॥ कार्येस्मिंस्त्वं सहायो मे तमु
वाचेति तापसी॥ स तन्निशाम्य मनसा प्रदध्यौ हर्षसंप्लुतः॥ अचिंतितविधानेन दिष्ट्याहं स्वयमर्थितः॥ दिष्ट्यापि वामः खा
दामा वर्णयित्वासमंजसां॥ पुण्यैरुपनमंत्येव धूर्तानां डंबुद्धयः॥ चिंतयित्वेति विस्रब्धं सतां सादरमभ्यधात्॥ स्थितोहमत्र
निःशेषमायाकल्लोलसागरः॥ राजपत्न्याः करिष्यामि सपत्नीविनिवारणं॥ युक्तिज्ञः साधयिष्यामि सर्वं तव मनोगतं॥ की
र्णकौतुकमव्यग्रा मद्बुद्धिविभवं शृणु॥ दुःशीलो नाम भूपालः पुरा मे वल्लभो रहः॥ स दासिषं वेतदुःखाद्भवं शुष्कविग्रहः॥ व
मनशाल नक्षीण्यं विधायाहं ततो वपुः॥ अवदं भूमिपालेन पृष्टो दौर्बल्यकारणं॥ भार्या मे शाकिनी रात्रावाकृष्यांत्राणि भक्षते
॥ गुहद्वारेण तेनाहं विवर्णो निःप्रभः कृशः॥ साशंकमिति राजानं संविधाय स्वमंदिरे॥ अवोचं साश्रुनयनो निजजायामधोमु
खः॥ गुदे राज्ञः समुत्पन्नं दंष्ट्रायुगलमुत्कटं॥ छुरिकच्छिन्नसितं तेन मे कर्मकारिणः॥ वृत्तिच्छेदाद्धि नष्टोहं शास्त्रभोक्षये स
दा॥ इति तद्वचसा साभूद्भूरिविस्मयकौतुका॥ ततो रहः समेतस्य गत्वा सा भूपतेर्निशि॥ गुदं पश्यंती हस्तेन सान्वीक्षस्य कु
तूहलात्॥ त्रस्तस्तां शाकिनीं मत्वा सपत्नाप्ययवयोजवान्॥ इति युक्त्यैव दयितामया धूर्तेन मोचिता॥ बाढं देव्याः करिष्यामि
निःसपत्नीभयं मनः॥ उक्तेति तापसी हृष्टः प्रदध्यौ नापितः क्षणं॥ राजद्रोहेन शक्तोहं किं तु जीवामि वर्णिनेः॥ विचिंत्येत्यवद

द्युक्तिं नृपस्यांतःपुरांतिके॥ हस्तपादशिरःखंडान्कश्चिन्निक्षिपतु पौरुषान्॥ विलोक्य जानशंकस्तां स्तां पत्ना दां मुनेः सुतां॥
दृढकर्मा नृपः कोपाध्रुवं त्यक्ष्यति वल्लभां॥ इति तद्वाक्यमाकर्ण्य तापसी राजमंदिरे॥ देवीहिताय तत्सर्वं चकार लक्ष्यचारिभिः॥ त
द्विलोक्य नृपो घोरां मत्वा तां शाकिनीं वधूं॥ सपत्नीरचितासत्यदोषां तत्याज मूर्खवत्॥ पितुराश्रममासाद्य सर्पयादिष्टकर्म
ना॥ न्यवेदयत्सा वृत्तांतमात्मनः क्षितिपस्य च॥ विज्ञाय दुहितुर्वृत्तं दिव्यधीमेकण्वो मुनिः॥ चकाराभ्येत्य यत्नेन संजातप्रत्य
यं नृपं॥ इति मायाः सपत्नीनां दुर्लंघ्या मृदुमानसे॥ गच्छाम्यहं त्वया स्कभुस्थातव्यं सावधानया॥ वर्तमानां परगृहे त्वामहं स
मुपस्थिता॥ वारिता वल्लभेनाद्य प्रसादयिष्यामि तं पुनः॥ ॥ सपत्न्याख्यायिका॥ इत्यामंत्र्य सखीं स्वैरं प्रयातायां विहायसा॥
सोमप्रभायां तत्सर्वमाकर्ण्य ब्रह्मराक्षसः॥ योगेश्वरः समभ्येत्य मंत्रिणो दिव्यलोचनः॥ सख्योः परस्परालापं निवेद्य पुन
राविशत्॥ वत्सेश्वरोपि तत्संगदिनध्यानपरायणः॥ निर्निंदमनसा नित्यं गणकानुगणनापरः॥ दृष्ट्वा वासवदत्तां स निर्विका
रमुपस्थितां॥ यौगंधरायणकृतां कांचिन्नीतिमशंकत॥ तत्कारं रहो राज्ञा पृष्टो यौगंधरायणः॥ प्राह देव मनस्विन्या देव्याः
कोपो न लक्ष्यते॥ यत्सहासं मुखं कोपे स्त्रीणां मानविनिश्चयात्॥ मरणाध्यवसायस्य सकोप्यस्खलितक्रमः॥ इत्यादियु
क्तिवचनैर्विधाया द्रें प्रभोर्मनः॥ स विवाहमहोत्साहेष्वथारंभमिवाकरोत्॥ वत्सराजस्ततो ज्ञात्वा विमनाः प्राह मंत्रिणां॥ सं
देहाकुलितो वात्याविलोल इव षट्पदः॥ भजमानां प्रणयिनीं योमोहाद्वमन्यते॥ नमोस्तु चंडपत्राय तस्मै कठिनचेतसे॥ अ
स्मत्पुराणपुरुषः सोपि धीमान्धनंजयः॥ स्वर्गे रंभामनादृत्य तच्छापात्क्लीबतामासवान्॥ चिंताज्वरो दुःसहोयं त्यज्यते यन्नृपा
त्मना॥ स्यक्ता लक्ष्मीः स्वयं प्राप्ता मनुतापं भजे त्रकः॥ इति वत्सेश्वरवचः श्रुत्वा मंत्रिवरोवदत्॥ कंदर्परूपो नृपतिः श्रुतसेना
भिधोभवत्॥ कदाचित्तीर्थपूतात्मा दृष्ट्वा सोमेश्वरं प्रभुं॥ अग्निशर्माभिधो विप्रस्तं यदृच्छागतोब्रवीत्॥ पंचतीर्थे नृपस्ना
त्वा यत्नतः सव्यसाचिना॥ पूर्वमप्सरसो मुक्ता द्रष्टुं सर्वमहं गतः॥ दृष्ट्वा सोमेश्वरं देवं स्फुराष्ट्रामृतवारिदं॥ श्रोतस्ताली वनालो
लच्चयामले जलधेस्तटे॥ ततः कदाचिल्लुलितामपश्यं राजकन्यकां॥ राज्ञो वसंतसेनस्य भुंजानः सत्रमंदिरे॥ भल्लीं कुसुमचाप
स्य बल्लीं यौवनशाखिनः॥ प ल्लीं मदपुलिंदस्य वीक्ष्य तां विस्मितोभवं॥ परां रतिमिवालोक्य तां तां स्मृत्वा स्मरोपमं॥ नृपतिः

जं
४७

बृ· क·
५८

श्रुतसेनोस्यायोग्य इत्यभ्यधात्स्फुटं ॥ स भवानेव तत्कन्यारत्नमर्हसि नापरः ॥ इत्युक्त्वा तन्निरागत्य तामयाचत नन्दके ॥ द्विजद्दू
त्यवितीर्णां तां पित्रा प्राप्य नृपः प्रियं ॥ विद्युद्योतां स्मरोद्यानविलासरसिकोभवत् ॥ याति काले तयोः प्रौढं प्ररूढप्रेमपादपे ॥
अपराविश्रुतगुणं वरयित्री समाययौ ॥ नवा नरेन्द्रतनया प्राप्तोपयुः स्वयंवरे ॥ साज्ञात्वा प्रेमसंभोगभंगभीताभवद्यसकः ॥ त
द्वियोगानलालीढो नृपोपि प्रापपंचतां ॥ वरयित्री च मानिन्यः संश्रयायेत्यमानिताः ॥ ॥ श्रुतसेनाख्यायिका ॥ ॥ यौगंधरा
यणस्येति निशम्य जगतीपतिः ॥ ध्यात्वा देव्यौ च कन्यो च तस्थौ दोलाविलोलधीः ॥ वीक्ष्य वासवदत्तां च संवृतेर्ष्यारुषं नृपः ॥
प्रसन्नवदना राममभूल्लुब्धमनोरथः ॥ ततो यौगंधरोभ्येत्य मंत्रिणे रजनीचरः ॥ चारमावेदयामास समेत्यालक्षितो ॥ गोपाल
केन निहतो चारोस्व स्करवेक्षणे ॥ राज्ञा कलिंगदत्तेन पुत्री चिंतावनाहिताः ॥ गूढव्यंजनसंचाराश्चाराद्दष्टास्तथा मया ॥ इ
ति रक्षो वचः श्रुत्वा प्राह यौगंधरायणः ॥ कलिंगसेनावृत्तांतं यत्नेन ज्ञातुमर्हसि ॥ त्वद्बुद्धिविभवेनाहं प्रभो व्यसनमागतं ॥
छेत्तुमिच्छामि राज्ञो हि दुश्चिकित्स्यः स्मरानलः ॥ त्राणे नैसर्गिकी बुद्धिर्नृणामिति किमद्भुतं ॥ तिरश्चामपि निष्णाता व्यस
नोच्छित्तये मतिः ॥ न्यग्रोधमूलनिलयः पालितो नाम मूषकः ॥ जाले लोमशनामानं मार्जारं ददर्श पतितं पुरा ॥ बद्धे तस्मिन्नुगतातं
कः स जिघ्रंश्च पलाननः ॥ भक्ष्यं बहिश्चचाराशु विलिखन्नखरैर्महीं ॥ ददर्श नकुलं तत्र चूकं च विकृताननं ॥ तौ दृष्ट्वा प्राणसंदे
हं मूषकः समचिंतयत् ॥ नकुलोलूकभीतोहं मार्जारं बलिनां वरं ॥ श्रयामि विषमस्थानो संधिस्त्रायां हि शत्रुणा ॥ चिंतयन्नि
ति तत्पाशच्छेदायोद्यतमानसः ॥ मार्जारमवदन्नीलं काचकांचनलोचनं ॥ अमित्रो मित्रतां याति मित्रं वायात्यमित्रतां ॥ का
लेन तस्माच्छेत्स्यामि पाशांस्ते बद्धसौहृदः ॥ इति श्रुत्वा मधुनिभं मार्जारः सौहृदं व्यधात् ॥ गाढमंके परिष्वज्य मूषकं विपदि स्थि
तः ॥ तद्दृष्ट्वा नकुलोलूकौ निराशावाखुभक्षणे ॥ बभूवतुर्भग्नमुखौ तदुपाश्रयशंकितौ ॥ ततः शनैः शनैराखुश्चिच्छेद स्ना
युबंधनं ॥ तं तूर्णं तूर्णमित्याह मार्जारश्चिरकारिणं ॥ स्वार्थमुद्दिश्य लंबंते सेवातं तु भिरीश्वरे ॥ धूर्तास्तत्कार्यशेषेण याप
येत्कार्ययाचकान् ॥ इति ध्यात्वा धियैवाखुर्लुब्धकागमनावधि ॥ एकपाशावशेषं तं चकार नयकोविदः ॥ कालाकारक
रालेथ संप्राप्ते पाशजीविनि ॥ चकर्त पाशशेषं स छित्वैव बिलमाविशत् ॥ भयान्मुक्तोथ मार्जारः कालेनोपेत्य मूषकं ॥ बिल ५८

द्वारस्थितः प्राह सखे निर्गम्यतामिति ॥ तीक्ष्णशुक्लोग्रदशनं श्मश्रुशूचीचिताननं ॥ कक्षसंवृतलांगूलं जिघ्रंतं बिलसौरभं ॥ उच्चै
कपादनिभृतं मीलितार्धविलोचनं ॥ पार्श्वावलोकिनं दृष्ट्वा मार्जारं मूषकोवदत् ॥ सौहार्देनोपयुक्तः प्राकृतवचाहं भवांश्च मे ॥ ग
म्यतां सगतः कालो न भूमिर्वंचनास्पदं ॥ यद्भवान्मधुरं वक्ति मह्यं तन्नाद्यरोचते ॥ यानस्तिकार्यकालोसावधुना नास्मि संगते ॥
निजप्रयोजनापेक्षापेशलप्रियभाषिणं ॥ दुर्बलः क्रूरमनसां धीमान्कोनाम विश्वसेत् ॥ कृतज्ञ भव मे मित्रं दूरादेवार्यचेतसा ॥
न संगोस्ति विरुद्धो हि भोक्तृभोग्यसमागमः ॥ निरस्य बहुभिर्वाक्यैर्मार्जारमिति मूषकः ॥ बिलं नत्याज काले न निजं धूर्तविलो
कितं ॥ ॥ मार्जाराख्यायिका ॥ ॥ इति बुद्धिमतां नीतिर्निगूढा कार्यसिद्धये ॥ चित्रं हि नयनं प्रज्ञा यया पश्यति सत्संवृतं ॥
पुरा प्रसेनजिन्नाम श्रावस्त्यां वसुधाधिपः ॥ सभायां ब्राह्मणेनेत्य विज्ञप्तः साश्रुचक्षुषा ॥ दुःखार्जितं धनं देव हारितं त्वयि
शास्तरि ॥ वने नागबलावल्लीमूले विनिहितं मया ॥ श्रुत्वेति राजा संचिंत्य वैद्यानाहूय सर्वतः ॥ अपृच्छदातुरेभ्यद्य प्रयुक्तं
किं किमौषधं ॥ इति पृष्टेषु वैद्येषु प्राहैको वणिजो मया ॥ दत्तो नागबलाक्वाथः प्रमाणामधुना नृपः ॥ इत्याकर्ण्य तमन्विष्य
खानितायेन सा लता ॥ भेषजार्थाब्रवीद्राजा ब्राह्मणस्वं हृतं त्वया ॥ इति वैद्यधराहूतः श्रुत्वाकंपाकुलो नरः ॥ राजभीतस्तथे
त्युक्त्वा सप्रियाय ददौ धनं ॥ इति राज्ञा स्वबुध्यैव विप्रस्वं नष्टमाहृतं ॥ को हि नाम नसंकल्पो धीमतां यो न सिध्यति ॥ ॥
सेनजिदाख्यायिका ॥ ॥ इति मंत्रिवचः श्रुत्वा प्रच्छन्नो ब्रह्मराक्षसः ॥ कलिंगसेनाभवनं तत्प्रयुक्तः पुनर्ययौ ॥ अत्रांतरे
समाकृष्टश्चिराभ्यस्तमनोरथः ॥ श्रीमान्मदनवेगाख्यो विद्याधरपतिः स्वयं ॥ वत्सेशवेषमाधाय निर्विशेषमवारितः ॥ क
लिंगसेनाभवनं विवेश विशदद्युतिः ॥ कलिंगसेना तं वीक्ष्य व्याजवत्सनरेश्वरं ॥ ससंभ्रमं समुत्तस्थौ रणन्नूपुरमेखला ॥ ल
ज्जानतमुखांभोजा कंपमानघनस्तनी ॥ गांधर्वोद्वाहविधिना हृष्टस्तामालिलिंगसः ॥ तं दृष्ट्वा तूर्णमभ्येत्य प्राह यौगंधराय
णं ॥ राक्षसो वत्सराजेन राजपुत्री वृतेति सः ॥ असंभाव्यमिदं मन्ये नायं राजा विशृंखलः ॥ ध्रुवं कश्चित्स तद्वेषो मंत्री प्राह
स्यविस्मितः ॥ नृपं वासवदत्ताया मंदिरे वीक्ष्य मंत्रिणा ॥ विसृष्टो राक्षसः प्रायाद्द्रष्टुं कपटकामुकं ॥ कलिंगसेनाभवने सोपश्य
न्नृपरूपिणं ॥ विद्याधरेंद्रं स्मरतश्रमनिद्राविमोहितं ॥ निर्दूलिचरणं ज्ञात्वा प्राह यौगंधरायणं ॥ ॥ कलिंगसेना मदनवेगस

मागमकथा॥ ॥ ततोविज्ञायनिपुणंराजकन्याविचेष्टितं॥ चक्रेविदितवृत्तांतंनृपंयौगंधरायणः॥ कलिंगसेनाकेनापि
वृत्ताविद्याधरेणसा॥ इतिवासवदत्तांचमंत्री गूढमहर्षयत्॥ क्रोधशोकस्मराक्रांतोगत्वावत्सेश्वरः स्वयं॥ कलिंगसेनांनिः
शंकंददर्शाज्ञातसत्कथां॥ सावत्सराजमालोक्यसंभ्रमालिंगितांशुका॥ स्तनद्वयंपिदधतीनखोल्लिखितमाबभौ॥ दृष्ट्वा
भिनवसंभोगसंभावितमनोभवां॥ सौभाग्यविभ्रमोद्भिन्नांतांलतामिवपुष्पितां॥ वत्सराजोनियम्यांतः कोपमन्मथवि
क्रियां॥ प्राहकेनापिपापेनवंचितोस्मीतिनिश्वसन्॥ कलिंगसेनातच्छ्रुत्वासद्यः क्षीणमनोरथा॥ नेदानींत्वंसपत्नीमेस्माभिती
वव्यलोकयत्॥ ततोवत्सेश्वरेयाते साक्षाद्विद्याधरेश्वरं॥ वरंमदनवेगंसाददर्शस्मरविभ्रमं॥ नामाभिजनमावेद्यसांत्विता
तेनमानिनी॥ नोवाचकिंचिन्मनसाबबंधचसतीधृतिं॥ अथवत्सेश्वरः स्वैरंस्मरानुशयतापितः॥ विद्याधरेंद्ररहितांराजपुत्रीं
समाययौ॥ सतामेत्यावदल्लज्जानतलोचनकांतिभिः॥ आगुल्फमिवविभ्राणांनीलोत्पलदलस्रजं॥ प्रासामदर्थमेवासिभ
जमांसकृन्नास्तिते॥ दोषोविशुद्धभावायाःप्रमाणंचात्रमेमनः॥ इतिराजवचःश्रुत्वासाब्रवीत्साश्रुलोचना॥ दुर्निमित्तविलोकैरे
वसख्याहंवारितापुरा॥ सोमप्रभावचःपथ्यमकृत्वासंशयंगता॥ प्रजापालतवेदानीमगम्याहंपरांगना॥ इंद्रदत्ताभिधो
राजाचेदीनामभवत्पुरा॥ पापसूदनतीर्थेयश्चक्रेदिव्यंस्फुरालयं॥ सकदाचिद्दक्षिणिग्जायांतीर्थेस्नातुंसमागतां॥ ददर्शकां
तिकल्लोलैःप्लाव्यमानामिवाभितः॥ तामन्विष्यस्वयंराजासमेत्यविजनेनिशि॥ भजस्वेत्यवदत्कोहिकामेनरखलीकृतः
स्पृष्ट्वावन्हिंविशामीतिसासमाभाष्यभूपतिं॥ तत्याजदयिताप्राणान्विषमंहिसतीव्रतं॥ भूपतेरपितत्तीव्रपापसंकुचि
तायुषः॥ मन्येतस्यकथांस्पृष्ट्वाजिव्हेयंलज्जतीवमे॥ पतिव्रताख्यायिका॥ कृरांगनाशाक्रशापादहंप्राप्तादशामिमां
॥ निंद्यास्मिचपलायद्वामंमेषाभवितव्यता॥ मनोरथशताभ्यस्तमप्राप्यान्यदवाप्यते॥ विधातृविहितंकोहिकदालंघ
यितुंक्षमः॥ दृष्टंविद्याधरेंद्रेणवितीर्णंमणिकांचनं॥ मद्यंयुष्मत्सुरेराजन्निवसाम्यनपायिनी॥ श्रुत्वेतिमदनार्तोपिविरसा
मनरेश्वरः॥ सतांकलुषितंचेतःसहसैवप्रसीदति॥ अथकालेनसंभुक्ताविद्याधरधराभुजा॥ कलिंगसेनासंतोषंगर्भं
चाधत्तसुप्रभा॥ ततोविद्याधरपतिस्तामामंत्र्ययथोप्रियः॥ गर्भाधानविधिस्त्रीणांखेचरैर्हिसमागमः॥ स्मृतमात्रःसमेष्या

मियात्तेकृत्वेतिसंविदं॥ विद्याधरेंद्रेसातस्थौदोहदपांडुरद्युतिः॥ ततोसूतसुतंकालेसापूर्णोपूर्णलक्षणं॥ चित्रांगदोथगंधर्व
स्तमदृश्यंजहारच॥ अत्रांतरेवराच्छंभोःसांगानंगार्थिनीरतिः॥ प्रच्छन्नामाययातत्रान्यस्तातत्सूतिकागृहे॥ नरवाहनदत्तस्य
कामस्यापररूपिणः॥ भाविनीवल्लभागर्भव्यत्ययात्तत्सुताभवत्॥ लावण्यकलिकाकारतद्वपुःकांतिसंचयैः॥ प्रापुर्विवर्ण
तांदीपाद्यूतकाराजिताइव॥ सुतांकलिंगसेनायांजातांश्रुत्वामहीपतिः॥ पुत्रोद्वाहमतिंचक्रेभाविज्ञोद्विमनोरथः॥ ॥मद
नमंचुकाजन्मकथा॥ ॥ ज्ञात्वावत्सेशासंकल्पंप्राहयौगंधरायणः॥ राजन्नयोनिजेवेयमुत्पन्नाकन्यकारतिः॥ भर्गयोर्व्यंत
योवृत्तःश्रुतमस्माभिरित्यपि॥ तत्पुत्रायावतीर्णैषासाक्षान्मन्मथरूपिणे॥ विरूपाक्षाभिधोयक्षोधनदानुचरःपुरा॥ वि
ज्ञप्तोनिधिपालेनभूतलन्यस्तजानुना॥ देवपाशुपताचार्यःसहितोब्राह्मणैस्त्रिभिः॥ निधानोत्साटनेलग्नोमथुरायामपेतभीः
॥ इतिश्रुत्वाविरूपाक्षोहन्यतामित्यभाषत॥ तद्गिरातंजघानासौधनदस्तद्दिवेदच॥ कुबेरोब्राह्मणवधाद्विरूपाक्षमथाशपत्
॥ तच्छापाद्भुविविप्रस्यपुत्रोभूत्सोग्रहारिणः॥ धनेशमर्थयित्वाथतद्भार्यावततारच॥ अयोनिजामसुतेतिदास्यास्नेहेनव
र्धिता॥ तांपूर्वभार्यामालोक्यसोपिद्विजकुमारकः॥ कंठेजग्राहनव्यंतिनहिप्राग्जन्मवासनाः॥ ततस्तयोर्विवाहोभूत्सित्रासंचिंत्य
कल्पितः॥ इत्येवंपूर्वसंबंधात्संगमोदेहिनामिह॥ ॥यक्षाख्यायिका॥ ॥ इतिमंत्रिवचःश्रुत्वाहृष्टोवत्सनरेश्वरः॥ देव्याचप
द्मवत्याचविजहारस्मरार्द्रधीः॥ नरवाहनदत्तोपिमात्रोरमृतनिर्जरः॥ पितुर्मनोरथैःसार्द्धंपूर्यमाणतनुर्बभौ॥ ततोवासव
दत्तायाःशासनात्तनयांप्रियां॥ कलिंगसेनासानंदंविससर्जनृपांतिकं॥ नरवाहनदत्तरूपांदृष्ट्वामदनमंचुकां॥ स्फारंजहर्ष
बालोपिसिच्यमानइवामृतैः॥ उत्संगलालिताधात्र्यातंराजवनयंविना॥ मुहूर्तमपिनोतस्थौसाकांताकामकंदली॥ ततो
राप्रन्नास्तेन्द्विभुभंसंपूर्णविग्रहं॥ यौवराज्येभिषिच्याहमंत्रिपुत्राननुक्रमागतान्॥ नरवाहनदत्तस्ययूयंमौलायथोचिताः॥
भसामयादिष्टाःपितृपैतामहेपदे॥ इत्युक्त्वातनयायैताप्रददौमंत्रिपुत्रकान्॥ यौगंधरायणसुतंमरुभूतिंमहामतिं॥
वसंतकंचपुत्रंस्यनर्मशीलंतपंतकं॥ गोमुखाद्यांश्चसुहृदोवीरंहरिशिखंतथा॥ अत्रांतरेमयसुताभर्त्तारंनलकूबरं॥ स
मामंत्र्यांतिकंसख्यास्मृतमात्रासमाययौ॥ साचक्रेव्योमगंयोगाद्विमानंभर्तृशासनात्॥ योग्यंकलिंगसेनायाःपुत्रीप

बृ. क.

रिणायोत्सवे॥वत्सराजःसहामात्यस्तदालोक्यातिकौतुकं॥कलिंगसेनांसानंदंमेनेसंबंधिनींपरं॥ततोरहस्थितोराजारजनी
तिलकाननाः॥दृष्ट्वावरांगनाःप्रह्वाःपप्रच्छागमकारणं॥ताःप्राहुर्भूपतेःसर्वावयंविद्याकलास्तथा॥शरीरंप्रविशामोद्यन
५० वपुत्रस्यधीमतः॥तच्छ्रुत्वावत्सराजस्ताःसंपूज्यप्रयतःशुचिः॥महान्प्रसादइत्युक्त्वाबभूवानंदनिर्भरः॥ततश्चाविविशुर्वि
द्याराजपुत्रंकलाश्चताः॥तदाविष्टश्चसबभौस्फुधासिक्तइवोडुपः॥ ॥यौवराज्याभिषेकोविद्याकलासंक्रांतिश्च॥ ॥
नानाविद्याकलाकेलिकाननंसनृपात्मजः॥सर्वज्ञःपितुरप्यासीद्वीणायांलक्षणेगुरुः॥नृपाज्ञयापुष्कराक्षोनृत्ताचार्योदिने
व्यधात्॥कलिंगसेनातनयांगीतनृत्यादिकोविदां॥तांवीक्ष्यराजतनयःसाचतंस्मररूपिणं॥प्रापतुःप्रेमवलयामधुमासवि
लासतां॥तयोःपरस्परप्रेम्णिवर्धमानेमनोरथैः॥बभूवपुष्पचापस्यसफलःकार्मुकक्रमः॥ततःकदाचिदेकांतेदृष्ट्वागोमु
खमभ्यधात्॥कलिंगसेनाजामातुर्भाविनःस्फुटंप्रिये॥नरवाहनदत्तस्यसख्युस्तवयशस्विनः॥दृष्टिबद्धानुरागामेस्फु
टामदनकंचुका॥सेयंयदिवरारोहाजातातत्प्रीतिशालिनी॥तटस्थोराजपुत्रश्चलज्जैषाकेनसह्यते॥श्रुत्वेतिगोमुखःप्राह
मातर्युक्तंप्रभाषसे॥यूनोर्हिसदृशीप्रीतिःकस्यनानंददायिनी॥पुरावररुचिःप्राहयोगनंदंमहीपतिं॥भारिकंकुंभकारं
चपथिवीक्ष्यसमागतौ॥अनयोरुपरिप्रीतिःकीदृशीतवभूपते॥इतिश्रुत्वाब्रवीद्राजाहंतुमिच्छामिभारिकं॥कुंभकारंतुपश्या
मिस्वबांधवमिवागतं॥इतिराजवचःश्रुत्वागत्वावररुचिःस्वयं॥तौबभाषेगतोराजायोगनंदाघपंचतां॥तच्छ्रुत्वाभारिकःप्राह
दिष्ट्यानिःकंटकंजगत्॥कुंभकारोब्रवीत्सास्त्रंहाधिक्शून्याःकृताःप्रजाः॥छन्नंश्रोतरिभूपालेश्रुत्वाकात्यायनोवदत्॥श्रुतं
देवयथैवत्वमनयोर्वर्तसेदृशा॥तथैवैतौत्वयिप्रायश्चेतश्चित्तंहिपश्यति॥प्रीतिविस्फारनयनायथामदनमंचुका॥राज
पुत्रेतथैवास्यांराजसूनुरसंशयं॥इत्युक्त्वागोमुखःप्रायात्प्रहृष्टःस्वंनिवेशनं॥कलिंगसेनापिसुताविवाहंसमचिंतय
त्॥९६॥ योगनंदाख्यायिका॥ ॥कदाचिद्गोमुखंदृष्ट्वाकापिपौरवणिग्वधूः॥भजस्वेत्यवदत्स्वैरंसचतांनाभ्यनंद
त॥सालज्जिताचक्रुद्धाचविदधेमायिनीमतिं॥प्रच्छन्नंतद्वधोपायेमधुमिश्रविषादिभिः॥पानेविषप्रदांबुध्वातांप्रत्योदै ५०
चगोमुखः॥अहोनिसर्गमलिनंकुटिलंस्त्रीविचेष्टितं॥सोद्वेगाःकलुषारूक्षानिम्नगाइवनिम्नगाः॥अहोनुयोषितोनाम

कोपिदोषसमुच्चयः॥अप्यन्विष्यनलभ्यंतेसंत्यक्तानत्यजंतिच॥वासनाइवसंसारमोहनैकरताःस्त्रियः॥प्रहसंतिविषादिन्योहृष्टाः
शोचंतिलीलया॥रागिण्योपिपतिंघ्नंतिकश्चित्तंवेत्तियोषितां॥अथवातथ्यमेवैतत्कथयंतिपुराविदः॥शत्रुघ्ननामापुरुषोयथाभू
द्बलिनांवरः॥गाढमन्यनरासक्तांनिजजायांददर्शसः॥तांतुदृष्ट्वाजघानाशुकुपितःपारदारिकं॥यथानीलांशवंस्कंधेनिधायब
लगर्वितः॥अंधकूपेसविक्षेपवीक्षमाणोनताननः॥कूपेनिरीक्ष्यमाणंतंपश्चाद्दैत्यलघुक्रमा॥न्यपातयन्निजवधूरितिचित्राशया
स्त्रियः॥ ॥शत्रुघ्नाख्यायिका॥ ॥गोमुखश्चिंतयित्वेतिराजपुत्रंसमभ्यधात्॥मरुभूतिप्रभृतिभिःसेव्यमानंमनःप्रियैः॥नानाकथां
तरेतत्रराजनीतिविदांमिथः॥नरवाहनदत्ताग्रेप्राहासौसेवकव्रतं॥रुष्टाःकष्टेनसिध्यंतिप्लवंगचपलानृपाः॥येसेव्यमानाःकुप्यं
तिप्रसीदंतिचवर्जिताः॥समस्तविनयग्रहणंसंघसंस्थाविवर्जनं॥अहोव्रतमिदंकष्टंयोगिनःसेवकस्यच॥एतद्विपरमं
तत्त्वंसव्यतेयन्महीपतिः॥ग्रहणेमरुतांराज्ञांमनसांचकईश्वरः॥राजानःकुटिलैर्भृत्यैर्बाध्यंतेसरलाशयाः॥यस्तानुभिन
त्तियत्नेनतस्यलक्ष्मीरनश्वरा॥मथुरायांपुराराजासूरसेनःस्फसंहतान्॥भृत्याननुविलोक्याभेदेनयोजयामासयोगवित्॥द
त्त्वाप्रसादमेकस्मैतीव्रःपरमदंडयत्॥तमप्यदंडयत्कालेसर्वानेकैकशस्ततः॥इतिसंतिनृपाःप्राज्ञाःसेव्यास्तेतत्वदर्शि
नः॥इत्यादिकथयातस्थौवयस्यैर्नरवाहनः॥अथमानसवेगाख्योविद्याधरपतिःस्वयं॥कलिंगसेनातनयालाभेचक्रेम
नोरथं॥ततःकलिंगसेनायावचसावत्सभूपतिः॥यौगंधरायणसखःपुत्रोद्वाहेसमुद्ययौ॥शस्तेमुहूर्तेविमलेप्रनृत्तेदेव
तागणे॥पुष्पवर्षेस्फुरैर्मुक्तेविवाहोचितकंकणा॥विवेशभूषितावेदींकन्यामदनकंचुका॥निजकांतिवितानेनभूषयंतीवि
भूषणं॥वह्निःप्रदक्षिणेतस्याःपत्युःपार्श्वावलोकिनी॥ननामदृष्टिःपर्यस्तात्रस्तेवोत्पलमालिका॥साकाप्यभूत्तदालक्ष्मी ५
र्ज्योतिषांलग्नसंगमे॥कल्यंविद्याभृतांयस्याःप्रभावश्चक्रवर्तिता॥अथनयनविलासस्मेरवक्त्रेंदुभासास्फुटमिहहि
सरस्यासंगतःपुष्पचापः॥वतविधिविहितोयंकोपितत्रोत्सवोनःक्षपामितिदिविचेरुस्तद्विवाहप्रवाहाः॥ ॥इतिक्षे
मेंद्रविरचितायांबृहत्कथायांमदनमंचुकानामसप्तमोलंभकः॥७ ॥अतःपरंवेलालंभकोभविष्यति॥ ॥हेतवेस
र्वसिद्धीनांकल्मषक्षयसेतवे॥भवाब्धिसेतवेतुभ्यंनमोस्तुवृषकेतवे॥ततःकदाचिदुद्यानेविहरन्नरवाहनः॥ददर्शरा

बृ. क. तनयावश्विनाविवरूपिणौ॥ तौ दृष्ट्वानिश्चलदृशा स्मयसंतोषनिर्भरः॥ कुतो युवामिति पृच्छन्मुखेंदुरुतचंद्रिकौ॥ उवाचै
५१ कः प्रणम्याथ देवत्वां द्रष्टुमागतौ॥ आवांतुरंगकरिणी जवाधिक्यविवादनः॥ अस्तिवैशालिकानाम नगरी संपदांनिधिः॥ नंद
नो नाम नृपतिस्तस्यामार्साम्मदायज्ञाः॥ तस्य स्वस्तनयौ लक्ष्मीसंक्रांतिमणिदर्पणौ॥ अहं रुचिरदेवाख्यो नश्चायंममानु
जः॥ काचिन्नृजिनेंद्रसेनाख्या भ्वसा च मम सुंदरी॥ प्रकाशितं रत्नदीपश्रिवयेव कुलं यथा॥ अस्ति मे करिणी भद्रा केशिनीनाम
विश्रुता॥ निर्मिता जवशिक्षार्थे मरुतामिव वेधसा॥ यो तस्य चास्ति तुरगो गरुत्मानिव हंसा॥ जगत्य दक्षिणी कृतं जवो मूर्तिमिवा
स्थितः॥ तद्वेगपातविजये पणबंधः कृतो मिथः॥ आवाभ्यां देव तत्रैव प्रमातासि त्वं सर्ववित्॥ तदेष्यस्मन्युगं नाव द्रष्टुमिव इतितन
क्षिरा॥ ययौ मनोरथजवं रथमारुह्य तत्पुरीं॥ तद्राजधानीमासाद्य कांताभिर्नयनोत्पलैः॥ अर्च्यमानः स्म रथियान दीनः पुर
माविशत्॥ ताभ्यां सपूजितस्तत्र भेजे रत्नासनं कृती॥ धाम्नां निधिरिवोदारमुदयाचलशेखरं॥ अथायातां सपर्यायै तत्स्व
सारं ददर्श सः॥ जिनेंद्रसेनामुन्निद्रचंद्रबिंबनिभाननां॥ मुकुर्भंगाभ्रनाकृष्टकेतकाग्रलं दंतिया॥ कुर्वाणां दृक्त्रिभागेन कृष्णा
सारप्रभादिशः॥ लज्जावनतपश्मात्रनेत्रांशुशबलस्तनीं॥ नमद्भ्रमरसंभारस्तवकामिव मंजरीं॥ पुरः प्राप्तां प्रणामाय रः
णन्नूपुरमेखलां॥ संचारिणीं क्वणद्वालकलहंसामिवाब्जिनीं॥ तां दृष्ट्वा पद्मवदनां विस्मितो नरवाहनः॥ हर्षमन्मथकंपानां
क्षणास्परिचितोऽभवत्॥ तत्क्षणामासा कुलापि विभोकर्णोत्सलच्युतेः॥ कैसरैर्वं तत्कालसंजातपुलकांकुरैः॥ स्थित्वा मुहूर्तेव रि
चसासतयोराजपुत्रयोः॥ सज्जीकृतां तां करिणीमश्वं च द्रष्टुमभ्ययात्॥ विचार्य विपुले देशे तयोर्वीताधिकं जवं॥ बबंधवि
जयोक्षीपंकारिण्याः कुंभमंडले॥ जितेवाजिनि दंतिन्या पुनरंतः पुरं ययौ॥ प्रीत्या रुचिरदेवेन सेवितो नरवाहनः॥ अत्रां
तरे वत्सराजवित्सृष्टो लेखहारकः॥ देवस्वामीहते द्रष्टुमित्याह नरवाहनं॥ श्रुत्वा रुचिरदेवस्तदुवाच रचितांजलिः॥ देवं वत्से
श्वरो वेन्नुनिजदास गृहे स्थितं॥ इत्युक्ताविरते तस्मिन्प्रस्थानाभिमुखे तथा॥ राजपुत्रेपितुर्भीत्या स्तिमिते व सभाजने॥ सू
चितोपि प्रतीहार्या प्रणामानतशेखरः॥ प्रविश्य चंद्रसाराख्यः सार्थवाहस्तमभ्यधात्॥ देवलंपाभिधे देशे बभूव धनदोप ५१
मः॥ वणिक्कुसुमसाराख्यस्तस्याहं वल्लभः सुतः॥ अहं तदात्वयायातः कदाचिद्द्रविणार्जने॥ सार्द्धं स्कवर्द्धनाख्येन सुहृदा सरि

तां यतः॥ तत्रोद्धतमहावातैः प्रतीपं तदमागते॥ मम प्रवहणे राजन्नद्यो हं धनवांछया॥ सतो महीधराख्येन परिज्ञाय कृपा
जुषा॥ वणिजा कुलमित्रेण मोचितोहं नृपाज्ञया॥ संमानितो भूमिभुजा तत्पुरः सुचिरं स्थितः॥ फुल्लबाललताजाले कालेम
त्तालिकोकिले॥ वणिजः शिखराख्यस्य पुत्रीं मैत्रीमिव द्युतेः॥ अपश्यमहमुद्याने विलासचलितेक्षणां॥ तां दृष्ट्वा याचि
तोऽभ्येत्य ततस्तज्जनकोमया॥ प्राह मां पुत्र नैवैषा दातुं मे युज्यते स्वयं॥ ज्ञानिनाभिक्षुणा पूर्वमहमुक्तो हितैषिणा॥ देया
मातामहेनेयं नानुकूलातवात्मजा॥ इति तेन निषिद्धोहं न ददामि सुतां स्वयं॥ अद्यैव प्रहिणोम्येतां मातामहं गृहं सखे॥ अ
ब्धिनासिंहलद्वीपं तां दिशोत्वमपि व्रज॥ इत्युक्त्वा विससर्जाशु पुत्रीं प्रवहनेन सः॥ ततो बलवता तस्याः कर्मणेव नभस्व
ता॥ अभज्यत प्रवहणं तद्दिवे देव तस्सिता॥ पुत्रीवियोगदुःखार्ते तस्मिन्बंधुजनैः शनैः॥ आश्वासिते तद्विरहादभवं
शोककर्षितः॥ ततः सह वयस्येन सिंहलद्वीपगंक्षणात्॥ आरुह्याहं प्रवहणं प्रस्थितो दक्षिणां दिशं॥ ततो भग्ने प्रवहणे
ममापि मकराकरे॥ अहं चफलकासक्तः प्राप्तो वेलावनावनिं॥ तत्र भ्रांतश्चिरं प्राप्य मतंगाश्रमकाननं॥ कन्यां शिवार्च
नरतामपश्यं तटिनीतटे॥ नवतामिव कामस्य यौवनस्येव दस्ततां॥ पूर्णतामिव चंद्रस्य रूपस्येव विभक्ततां॥ तां दृष्ट्वा
विस्मयजुषा तत्प्रविश्य तपोवनं॥ पृष्टा मया मतंगस्य तनयावृद्धकन्यका॥ यमुनानाम मां प्राह भाषा चित्रसरस्वती॥ दं
तांशुभिः प्रोद्गिरंतामूर्तं पुण्यमिवोज्ज्वलं॥ भग्ने प्रवहणे पुत्र मतंगमुनिनास्वयं॥ प्राप्तैषा वणिजः पुत्री शिखराख्यस्य सुंद
री॥ कृतेनेच पालितास्माभिः शिवार्चनरता सदा॥ समुद्रबेलालब्धेयमिह बेलेति विश्रुता॥ इति श्रुत्वा परिज्ञाता सा मया चा
रुहासिनी॥ हर्षलज्जास्मरारंभविलोलतनुवल्लरी॥ ततो दिव्यदृशाज्ञात्वा मुनिपुत्री पुरः स्थितं॥ प्राह मां पूर्वभार्येयं तव पु
त्र सुलोचना॥ इत्युक्त्वा वितता रामो तां मह्यं स्वसुतामिव॥ ततोहं प्राप्य दयितामश्रौषं मुनिभाषितं॥ इयं विद्याधरी पूर्वं
जलकेलिविलासिनी॥ मुनीनां तर्जलस्थेन शासामर्त्यपदं गता॥ आदिष्टश्च वियोगोस्यास्त्वया सह सुदुःसहः॥ जन्मांतरेत
वाप्यस्ति नरवाहनदर्शनं॥ वैशालिके पुरवरे तुरंगकरिणीजवे॥ यो द्रक्ष्यति स विज्ञेयो भावि विद्याधरेश्वरः॥ जन्मांतरे तवा
प्यस्ति शिवार्चापुष्पहारिणः॥ किल्बिषं तत्तमेवाशु दृष्ट्वा सर्वं विभंक्ष्यति॥ इत्यहं तद्वचः श्रुत्वा तां प्राप्य हरिणेक्षणां॥ प्र=

बृ. क.

५२ स्थितः स्वपुरंवेलातटंप्राप्तोमहोदधेः॥ तत्रारोप्यप्रियोनाविथावदस्मिसमुद्यतः॥ तावत्साकर्मयोगेन हृतानीमेमहानिलैः॥ त
तोवियोगसंतप्तःप्रलापमुखराननः॥ दिवापिनिमिराक्रांतामिवभ्रांतोस्मिमेदिनीं॥ सचप्रवहणभ्रष्टः प्राप्तःपथियदृछया॥
ततोविरहदग्धेनमयास्वचनःस्फुटं॥ समांप्रतापितंप्राह दृष्टास्माभिस्तवप्रिया॥ समुद्रतीरेश्रावंतीस्फुटंतुनविभाविता॥
इतिमित्रवचःश्रुत्वाप्राप्तोहंभवदंतिकं॥त्वद्दर्शनावधिःशापोमुनिनाभिहितोयतः॥अधुनाक्षीणशापोहं द्रष्टुमिछामितांप्रि
यां॥उक्त्वेतिसार्थपःप्रायात्प्रणम्यनरवाहनं॥ ॥चंद्रसाराख्यायिका॥ ॥चंद्रसारेप्रयातेथसंगतेनमृगीदृशा॥वत्सेश्वरात्म
जोहृष्टस्तत्कथाविस्मयाकुलः॥ दत्तोरुचिरदेवेनराजपुत्रीमवाप्तवान्॥ विद्याधरादिराज्यायपुरःसिद्धिमिवागतां॥ जिनेंद्र
सेनांसंप्राप्यकांतांपरिणयोत्सवे॥ तामेवारुह्यकरिणींप्रययौनरवाहनः॥ ब्रतन्तवर्मनिप्राप्यमगधाधिपतेःपुरीं॥तेनसंपू
जितःप्रायात्कौशांबींवल्लभासखः॥ततःप्रणम्यवत्सेशंदृष्ट्वामदनमंचुकां॥ ईर्ष्याकोपकषायाक्षींप्रणामानतशेखरः॥रहः
प्रसादयामासविलासहसितावधि॥ हटकंठग्रहानंदमुकुलीकृतलोचनां॥ तांसेवमानोलावण्यनदींमदनमंचुकां॥ नर
वाहनदत्तोभूदभिषिक्तइवामृतैः॥ ततःकदाचित्संत्यूषकुल्लेकमलकानने॥ सांध्यरागारुणेव्योम्नितत्प्रभाभिरिवावृते॥ प्रभा
तवाततिश्वासांगादरक्तेंशुमालिनी॥ उदयाद्रिमिवारूढेवियुक्तांद्रष्टुमक्षिनीं॥कश्चावराजतनयस्तारमंतःपुरांतिके॥अकां
डेकरुणारावंकीर्णशोकमशंकितः॥ किमेतदितिपृष्टोथवयस्यस्तेनगोमुखः॥विरादकथयन्भूमिंविलिखन्साश्रुवीक्षितः
हताकेनापिभूतेनदेवीमदनमंचुका॥अदृश्यमूर्तिनारत्नपर्यंकोत्संगशायिनी॥श्रुत्वेतिसहृदोवाक्यंबभूवनरवाहनः॥अवा
रितमहाशोकपूर्णोनिष्पंदलोचनः॥ सकोपशोकसंरुद्धोनिःप्रतीकारविक्रियः॥ हाप्रियेप्रेमसत्कभंगंवचोदहास्यभाषत॥
अंतःपुरेमदनमंचुकयावियुक्तोलीलाशुकेषुसदृशंप्रददौसबाष्पं॥ येतत्प्रसादनकलाप्रणयेबभूवुर्नमौक्तिभिर्हसित
विभ्रमकेलिकाराः॥ ॥जिनेंद्रसेनालाभोमदनमंचुकावियोगश्च॥ ॥इतिक्षेमेंद्रविरचितायांबृहत्कथायांवेलालंभको
नामाष्टमः॥८॥ ॥अतःपरंशशांकवतीभविष्यति॥ स्वर्णगिरिकर्णिकेनरत्नतारकाकसरेवलज्जलदषट्पदेस्फु
टदिगंतयंत्रारके॥ सवःप्रमथनायकःप्रदिशतुस्वयंयत्करःकरोतुजगदंबुजेवलितनालुलीलायितं॥ ततोविरहसंतप्तः ५२

स्मरन्मदनमंचुकां॥ कोतिमात्रावशेषोभून्निःसहोनरवाहनः॥ सन्चंद्रकांतपर्यंकनिषण्णोनिशिनिःसखः॥ प्रदध्यौतप्त
निश्वासैम्लापयन्मणिदीपकान्॥ कथंचिदथनिद्राईमीलिताक्षंस्मरातुरा॥ तंजहारसपर्यंकंकापिविद्याधरांगना॥ क्रिय
माणस्तयास्वप्नेदृष्ट्वातामेवसुंदरीं॥ प्रबुद्धस्तन्मुखांभोजेददर्शदशमलक्षितो॥ सददर्शविशालाक्षींतामानंदस्रुधानदीं॥कांति
कल्लोलपटलैःक्षालयंतीमिवाखिलं॥निश्वाससौरभाकृष्टव्योमगंगाब्जषट्पदैः॥ बद्धवेषामिवाविद्धगतिव्यालोलवेणि
खेचर कां॥वीक्षमाणांविललितग्रीवंदेशंकृपया॥मुद्रुस्त्रिकपरावर्तिनिमज्जत्त्रिवलीलतां॥ वेगोद्धतविलोलेनतारहारेणभूषितां॥क्षु
भ्यत्क्षीराब्धिकल्लोलमालितांकमलामिव॥विलोक्यतांस्मरस्येवनगरींव्योमचारिणीं॥ सोभवन्निभृतश्वासःक्षणंकृतक
निद्रया॥ सातमादायसहसागत्वामलयभूधरं॥अवतीर्यांचशिखरेप्रहृष्टानिर्वृतिंययौ॥तत्रलंबानिलोल्लोलदलचंपकपल्ल
वे॥तस्यौपर्यंकमारुह्यतदालिंगनलालसा॥नवस्मररसावेशस्वेदधौतविशेषका॥लज्जालेभेमुहूर्तंसाकंपमानस्तनी॥बाला
मदृष्टसंभोगांमत्वातांनरवाहनः॥धूर्तोयुक्तिमुपाश्रित्यप्राहनिद्राकुलाक्षरं॥अयिकासिकुरंगाक्षिप्रियेमदनमंचुके॥इतिना
मसमाकर्ण्यतदाकारंचकारसा॥स्वविद्ययानिर्विशेषंभूत्वामदनमंचुका॥ गाढालिंगनसंनद्धातस्थौकुचपुरःसराः॥ततः
स्मितस्मेरमुखःसानंदंनरवाहनः॥करकष्टालकंतस्याश्चुचुंबवदनांबुजं॥हृतेबलान्नीविबंधेनस्यास्तेनविलासिना॥ चकंप
चूतवल्लीवरूनस्तनकिनीननु॥ हृतांशुकंयद्यदंगंसददर्शमृगीदृशः॥ दृष्टयस्तत्रतत्रास्यनचेलुःकीलिताइव॥ ततस्तां
गाढमालिंग्यसप्राहमधुरस्मितं॥अहोनृपतिरोधानेवैदग्ध्यंतवसुंदरि॥ इतिप्रियस्यवचनंश्रुत्वास्यंनविलज्जिता॥ सह
सारूपमास्थायनिजंभेजेरतोत्सवं॥ ततःप्रियेणसापृष्टावभाषेदशनांशुभिः॥ ग्रथ्नतीवगुणेहारंरतिमदंविसूत्रितं॥ हृदये
मौक्तिकलतास्रुधासारोमनोरथे॥कर्णकर्पूरपूरश्चलद्यशाःस्फदृशांविभो॥अहंतयशासाहूतानवप्रणयिनीपदं॥प्राप्ता
गिरिस्फतांमन्येस्वसौभाग्यतिरस्कृतां॥ इतिविद्याधरीवाक्यंनिशम्यनरवाहनः॥ प्रभातेतत्कलाकेलिप्रहृष्टस्तामभाषत॥
ब्रह्मसिद्धिरितिख्यातोमुनिरासीन्महातपाः॥तस्यौतदाश्रमोपांतगुहायांवृद्धजंबुकी॥ दुर्दिनाभिहतेकालेकदाचित्साक्षु
धार्दिता॥ कथंचिदेवबभ्रामप्रस्खलद्गतिविकूवा॥ ततःसमाययौगुंजन्मत्तालिवलयोगजः॥ स्मरन्करेणुकांयूथभ्रंशमालि

तलोचनः॥ तद्दयाद्विद्रुता साथ जंबुकी शरणं मुनिं॥ ययौ तस्यानयोगाच्च बभूव करिणी क्षणात्॥ स तया जातसंप्रीतिर्वि-
जहार वने गजः॥ उद्दंडपुंडरीकेषु मानसेषु मदालसः॥ ततः प्रियायै पद्मार्थी सरःपंके ममज्ज सः॥ तस्मिन्निमग्ने साभेजे द्वि-
तीयं गजयूथपं॥ तं पूर्वकरिणी दृष्ट्वा निमग्नं भर्तुमुद्ययौ॥ भद्र जातकुलीनेहि प्रीतिः पर्यंतनिश्चला॥ करुणाब्धेर्मुनींद्र-
स्य स गजेंद्रोप्यनुग्रहात्॥ उन्मज्य कृच्छ्रात्तस्यान सरसश्चारद्विपदं॥ तद्विधाभिरभिप्रीतिरवसानेप्यनश्वरी॥ साजंबुकी
प्रयाता नु नस्त्रिराखलसंगतिः॥ ॥ कुंजराख्यायिका॥ ॥ इति प्रियस्य वचनं श्रुत्वा विद्याधरात्मजा॥ उवाच कन्याकुब्जो
ति रम्यास्ति नगरी विभो॥ वामदेवाभिधानोभूत्तस्यां पश्चाद्द्विजोत्तमः॥ कदाचिद्ब्राह्मणः कश्चित्तद्गृहं भोक्तुमाविशत्॥
उपविष्टे तत स्तस्मिन्स ज्ञभोजनमंडले॥ उत्थाय तूर्णं निर्गत्य वामदेवोभ्ययात्पुनः॥ भोजनांते थिनापृष्टः स निर्गमन-
कारणं॥ वामदेवोवदत्स्वैरं श्रूयतां कौतुकं द्विज॥ शशिप्रभेति भार्या मे बभूव स्मयमुखी पुरा॥ तन्न्यस्तगृहभारोहं राज-
सेवापरोभवं॥ ततः कदाचिन्मामाह पितृव्यः साश्रुलोचनः॥ वामदेवप्रियेयं ते भार्या गोपालरागिणी॥ इति तद्वचसा शं-
काकुलितोहमलक्षितः॥ स्थितः प्राकारमुल्लंघ्य फलवल्लीनिकुंजके॥ ततो महिषपालेन सा गतां निजवल्लभां॥ अपश्यं
प्रेमविश्वासकेलिलीनां निरर्गलां॥ ततोहं भृशसंक्रुद्धो निहंतुं पारदारिकं॥ समुद्यतस्तया दृष्टो धार्ष्ट्यान्निष्कंपया पुरः॥ सा
दृष्ट्वा मूर्ध्नि विक्षेपधूलिमुष्टिं वलेन मे॥ किल्बिषापन्हवक्रौर्यधीराना यौहि दुर्जयाः॥ ततो महिषतां यातः॥ सहसाहं
महाकृतिः॥ कोपान्महिषपालेन तडितेन ताडितः॥ बद्धं महिषशालायां ततः कालेन मां वणिक्॥ कश्चिन्निनाय मूल्येन
दूराद्भारातिवाहकं॥ कदाचिद्रथदूराध्वनिःसहं भुक्तविग्रहं॥ कन्यकाऽनुगता पश्यत्कापि मामुत्तमांगना॥ सा दिव्यदृ-
ष्टिः कारुण्यात्स्नाता गंगाजलेन मां॥ अथावलोक्य महिषाकारबंधादमोचयत्॥ ततः प्राप्तस्वरूपाय साच स्वांतनयां ददौ
॥ कांतां कांतिमतीं नाम सिद्धिं मूर्तिमतीमिव॥ अथ स्वगृहमागत्य तद्दत्तैः सिद्धसर्षपैः॥ सा कुमार्या मया दूरादाहृता बडवाभ-
वत्॥ सेयं स्थिता मंदुरायां सततं तलकुद्वैर्मया॥ ताड्यते पंचभिर्नित्यं तदर्थं चास्मि निर्गतः॥ श्रुत्वेति विस्मितेयाते तस्मि-
न्नभ्यागते द्विजे॥ जननीयोगसंसिद्धा कांतिमत्याः समाययौ॥ तदाज्ञया वामदेवः कालसंकर्षणीं श्रितः॥ विद्याश्री पर्वते

ध्यात्वा खरुविद्याधरोभवत्॥ कांतिमत्यामहं तस्य नाम्ना ललितलोचना॥ जाता विद्याधरेंद्रस्य मलयाचलवासिनः॥ सा
हं गौरीवरादिष्टा तव भार्या कुलोचिता॥ नास्म्ययोग्यकुलोसन्नायेनैतत्कथितं त्वया॥ इति कांतावचः श्रुत्वा विश्रब्धं नरवाह-
नः॥ विजहार तया बालश्रीखंडतरुमंडले॥ तत्र लीलारतश्रांतभुजंगमिथुनस्पृशः॥ चंदनामोदसुभगा मरुतस्तं सिषेवि-
रे॥ पुन्नागचंपकाशोकचूतकिंशुककेसरैः॥ मालितेषु रतिं लेभे तटेषु दयिता सखः॥ ॥ ललितलोचनासंभोगकथा॥ ॥
ततः पुष्पोच्चयक्रीडाव्यग्रां ललितलोचनां॥ दृष्ट्वा दिव्यसरस्तातुं प्रययौ नरवाहनः॥ कमलाकेलिसदने संफुल्लकमला-
करे॥ स्नात्वार्चयित्वा श्रीकंठमुपकंठे व्यलोकयत्॥ ततः सस्मार सहसा प्रियां मदनमंचुकां॥ रमणीयेषु दृष्टेषु स्मर्यते द-
यितो जनः॥ वदनं शतपत्रेषु दृशं नीलोत्पलेषु च॥ वीचीषु भ्रूविलासं च सस्मृत्वोच मृगीदृशः॥ कलहंसकुलक्वाणकमनी-
यां स्मरश्रियै॥ पश्यन्स दध्यौ दयितां लीलामुखरमेखलां॥ मत्तालिमालावलयव्यालोलनलिनीतटे॥ स्मृत्वा केलीर-
तालोलकांचाकातां मुमोह सः॥ पिशंगजटनामाथ तमेत्य मुनिसत्तमः॥ प्रसन्नचंदनरसैः सिषेच करुणानिधिः॥ ल-
ब्धसंज्ञः स विलपन्प्रियां मदनमंचुकां॥ महामुनिं पुरो दृष्ट्वा प्रणनाम न्हियानतः॥ तं पिशंगजटः प्राह धैर्याब्धे मा शुचः
प्रियां॥ भवंति महतामेव दुःसहा दैवविक्रियाः॥ उक्त्वेति तं निनायाशु स मुनिर्निजमाश्रमं॥ मुनिकन्याकराकीर्णनी-
वारहरिण्याकुले॥ तत्रार्द्रचंदनरसैरुपलिप्तो जटांगयो॥ नरवाहनमासीनं मुनिमध्येभ्यधान्मुनिः॥ नरवाहसहस्वे-
तं दुःसहं विरहानलं॥ अचिरप्राप्स्यसि मनः स्कधां मदनमंचुकां॥ श्रूयतां राजपुत्रेण यथा प्राप्त वल्लभा पुरा॥ राजन्मृगांक-
दत्तेन निस्तीर्य विरहोदधिं॥ अयोध्येत्यस्ति नगरी स्फाटिकैर्या महागृहैः॥ कैलासवासरसिकं हसतीव महेश्वरं॥ त-
स्याममरदत्ताख्यो बभूव वसुधाधिपः॥ यत्कीर्तिकौमुदीचित्रालोके गुणविकासिनी॥ मृगांकदत्तस्तस्याभूत्तनयः=
कांतिभूषणः॥ यशः सरसि विस्फारे मृगांक इव बिंबितः॥ शरीरतुल्यास्तस्यासन्विक्रांताः सचिवा दश॥ स्वच्छास्फटि-
कदशास्कप्रथिता इव मूर्तयः॥ स्थूलबाहुर्मेघबलस्तथा विक्रमकेसरी॥ व्याघ्रसेनो विमलधीर्दृढमुष्टिर्गुणाकरः॥ चं-
डशक्तिश्चित्रकरस्तथा भीमपराक्रमः॥ इति कर्मोचिताभिख्या बभूवुस्तस्य ते प्रियाः॥ ईश्वरोभूनिरुभगैः स तैर्दशभि-

राववभौ॥ एकाद्दशात्मासं प्राप्तोरुद्रसाम्यदशामिव॥ ततः कदाचित्तं प्राह स्वैरं भीमपराक्रमः॥ देवस्वप्नेमया दृष्टं श्रूयतां कौ
तुकं महत्॥ तमोभिरंजनशिलापुंजैरिवपुरस्कृतं॥ अपश्यं मत्तमातंगकपोलमलिनं जगत्॥ ततः शुभ्रनखश्रेणिविस्फुरित
तमःपटः॥ ज्वालाविलोलजिह्वाग्रो मृगेंद्रोभिससार मां॥ समयाकृष्टशस्त्रेण समाहूतो ययौ जवात्॥ सरितः पारमुत्ता
ललांगूलाकंपितकेसरः॥ अपारां निर्गतां तस्य जिह्वां छित्वा महाशयः॥ तयैवोत्तीर्य तटिनीं नरं तक मुपागतः॥ ततो वेताल
तां यातेन मपृच्छं कुतूहलात्॥ भार्या मृगांकदत्तस्य का भवित्रीत्यलुप्तधीः॥ स प्राहास्ति स्फुरावासजयिन्युज्जयिनी पुरी॥
तस्यां कंदर्पसेनोस्ति राजकंदर्पदर्पहृत्॥ उसन्नाकमलावत्यां तस्यास्तिकमलेक्षणा॥ पुत्री शशांकवत्याख्या प्रख्या
ख्यातं शशिश्रियः॥ स्कंदरीस्फुरभिश्वासा स्फाद्रास्फभगस्वरा॥ स्फकुमारतरा यस्यास्तनुः सर्वेंद्रियोत्सवः॥ विलासहा
सकुसुमाकटाक्षोद्भ्रांतषट्पदा॥ यौवनोपवने यस्याः फुल्लाविभ्रममंजरी॥ हाररत्नसरुस्मेरा त्रिवलीमुष्टिमुद्रिता
॥ भाति रोमावली यस्याः कामस्येवासिवल्लरी॥ हरप्रसादाद्दयिता वल्लभा सो भविष्यति॥ राज्ञो मृगांगदत्तस्यनिगद्येति
तिरोधेदे॥ श्रुत्वेति राजतनयः स्फहृदः स्वप्नकौतुकं॥ कृत्वा विदितवृत्तांतानुवाच सचिवान्पुरः॥ आश्चर्यं दृष्टवान्स्वप्ने
व नभीमपराक्रमः॥ ममाप्यद्यैव दृष्टं यत्स्वप्ने तच्च निशम्यतां॥ युष्माभिः सहितो गंतुं प्रस्थितो विकटाटवीं॥ अहं तृषा
परिक्रांतः प्राप्तः शीतजलां नदीं॥ वयन्निषिद्धाः खड्गाग्रव्यग्रहस्तैस्ततो नरैः॥ यावद्युद्धाकुलास्तावन्नदी सा गृहस्थतां
गता॥ ततस्तृषाग्नितप्तेन मया दृष्टः स्वयं शिवः॥ तस्य नेत्रात्रिनेत्रस्य पतितो श्रुकणः क्षितौ॥ समुद्दतां स सं प्राप्तः पी
तः सर्वोंशयामया॥ रक्तात्तेन कपालेन तन्मध्यान्मौक्तिकावली॥ मया प्राप्ता शशिविशिनासाचकंदेनिवेशिना॥ निशम्य
राजपुत्रेण तत्स्वप्नमिति वर्णितं॥ प्रशशंस स्फः प्रियावाप्तिजयं चास्योत्तमं धुरः॥ नूतनांकुरितोत्कंठं पुनः प्राह नृपात्मजः
राजा कंदर्पसेनोसौ सत्वसाध्यो महाबलः॥ याचितोपि न कन्यां स प्रयच्छति रणोत्कटः॥ दुर्गाश्रयो महाकोशो रक्ता
मात्यो महामतिः॥ तस्मादुपायविच्छेदेधियाकार्यं विचिंत्यतां॥ सतो हि वस्तु संदेहे बुद्धिरभ्युदयश्रिये॥ मगधाधिप ५४
तिः पूर्वं भद्रबाहुर्वराकृतिः॥ धर्मगोपस्य नृपतेः स्फतां श्रुत्वाभ्ययाचत॥ अनंगलीलां नददौ स तां वाराणसीपतिः॥ तस्मै दि

गाजतुल्येन गजराजेन गर्वितः॥ भद्रबाहोर्महामात्यो मंत्रगुप्ताभिधस्ततः॥ युक्त्या वाराणसीं गत्वा स हशिष्यैरभूद्यती॥ त
त्र प्रसिद्धिमाख्यातः सिद्धांताख्यानकोविदः॥ श्रमन्निशि ददर्शाराद्धियं द्वित्रिनरानुगां॥ साब्रवीत्तान्विमुंचंतु मां भवंतो मु
हूर्तकं॥ कुंजरेंद्रं भोजयित्वा तूर्णमायाति मे पतिः॥ इत्याकर्ण्य महामात्यो ज्ञात्वा तां स्वैरचारिणीं॥ तां समादाय यातानां तेषां गृ
हमवैक्षत॥ ततः प्रभाते दयिता रहितो हस्तिपालकः॥ शोकाद्रुक्षविषो दृष्टस्तच्छिष्यैबाधवाकुलः॥ तस्य मित्रे रथिंतास्तेह
र्तुं विषविशूचिकां॥ तं गुरोर्ब्रतिवेषस्य मंत्रिणोतिन्युरंतिकं॥ सतं वीतविषं कृत्वा प्राह तां लप्स्यसे वधूं॥ मद्द्वरादिति संभाष्य त
स्मै चोरा नदर्शयत्॥ ततो हस्तिपकः शूरो हत्वा तान्प्राप्य तां प्रियां॥ प्रणम्य प्राह भोक्तुं मे गृहमेहीति मंत्रिणां॥ सोवदस्तु
त्र नास्माकमुचितो गृहसंगमः॥ श्रुत्वेति हस्तिनः माह हस्तिशालामुपेहि मे॥ इति तेनार्थितो मंत्री सशिष्यो नक्तभोजनः॥ प्र
भुकार्यार्थमविशङ्कति वेयोगजालयं॥ कृष्ण सर्पं समाधाय स्फषिरे वेणुनालिके॥ तत्रमुक्तो नरं कर्णेन्यविशत्तस्य दंतिनः॥ प्र
स्फसे मधुसंमत्ते गजपालकमंडले॥ स गजः कृष्णसर्पस्य फूत्कारैर्विवशोपतत्॥ मृते तस्मिन्नयोधी मान्मागधस्यांतिकं प्र
भोः॥ तापसव्यंजनो मंत्री पूजालेभे च भूभुजः॥ ययाचे सोथ दूतेन भद्रबाहुर्नृपात्मजां॥ द्विपं सर्यहतं ज्ञात्वा राजाभीतश्च तां
ददौ॥ इत्येवं धीमतां बुध्या भवंत्यखिलसिद्धयः॥ पशूनामिव मूर्खाणां धीहीनं तु बलं वृथा॥ ॥मंत्रिगुप्ताख्यायिका॥ ॥रा
जसूनोरिति वचः श्रुत्वा चित्रकथोब्रवीत्॥ अस्ति तक्षशिलानाम नगरी संपदां पदं॥ तस्यामिंद्राक्षनामाभून्नृपतिर्धर्मभूषणः॥
मनीषिणः क्षमेवासीत्प्रिया तस्य चलप्रभा॥ पुत्रकामः स नृपतिः सितपक्षत्रयोदशकं॥ नित्यं ध्यात्वार्थिपं देवीं जुहावाग्नौ यतव्र
तः॥ ततः कदाचिदेकोने प्राप्ते पक्षत्रयोदशके॥ अत्यक्तमौनो हृत्पद्मं विदार्य प्रददौ निजं॥ अथ श्रीस्तस्य वरदा रवद्गधाराशनिवासि
नी॥ तुष्टा दिदेश तनयं शेखरं सर्वभूभुजां॥ स पुष्कराक्षनामाभूच्छ्रीवरान्नृपतेः सुतः॥ धृतः पित्रा निजपदे लक्ष्मीसंक्रांति
दर्पणः॥ स कदाचिन्मृगव्यायामुष्ट्रेण प्राप मंतिकात्॥ ददर्श भोगिमिथुनं भीतं कारुण्यवारिधिः॥ उष्ट्रं जघान बाणेन स
भुजंगाभयप्रदः॥ उष्ट्ररूपं परित्यज्य स च व्योमचरोभवत्॥ सोब्रवीत्त्वत्प्रसादेन शापान्मुक्तः करोम्यहं॥ प्रियं तवोपकारस्य
पुष्कराक्ष यथोचितं॥ आसीत्तारावलीनाम दयिता रंकुमालिनः॥ विद्याधरी खेचरस्य रोहिणीवामृतत्विषः॥ स्वयं तु तत्प्रिया

DR. BHAU DAJI
डाक्टर भाऊदाजीइत्यस्यपुस्तकम्

पित्राशासासार्थवियोगिनी॥ चचारबाला हरिणीयूथहीनेव कानने॥ प्रियेण रहितासा थ ययौ स्मरभिकाननं॥ विधायश्च
मरीरूपं विलपंतीवगुंजितैः॥ तस्माद्दयितसंकल्पाद्वीर्यजंबुतरोःस्वयं॥ प्रस्कन्नं कुसुमेतेन तत्फलेकन्यकाभवत्॥ कालेनतत्फ
लाहारा विजितासूर्महामुनिः॥ तांप्राप्य करुणासिंधुः पुपोषतनयामिव॥ ततो विनयवत्याख्या साप्राप्तनवयौवना॥ मुनेस्त
स्याश्रमेदृष्टा मयालुलितलोचना॥ तांहर्तुमुद्यतं दर्पान्मां शशाप मुनीश्वरः॥ रूपमत्तोविरूपांत्वमुग्रतामेष्यसीतिसः॥ नि
हतः पुष्कराक्षेण राज्ञास्वांतनुमेष्यसि॥ भर्तावि नयवत्याश्च सएवभविता नृपः॥ इत्यहं मुनिनाशप्तो मोचितो धवलयाविभो
॥ एवमुक्त्वा पुष्कराक्षं खचरो गगनं ययौ॥ स्वपुरीं पुष्कराक्षोथ प्रविश्य स्मरतापितः॥ सचिवन्यस्तभूभारोययौ प्राप्तुं मुनेःस
तां॥ गौरीवरात्समुत्तीर्यसेवितंसिद्धितपोवने॥ विजितासुं मुनिं प्राप्य प्रणनाम स चाब्रवीत्॥ तवैवपूर्वदयिताकन्याविनय
वत्यसौ॥ गृहाणेमां मयादत्तां वैजयंतीमनोभुवः॥ ताम्रलिप्तावणिक्पूर्वं धर्मसेनो वधूसखः॥ चोरप्रहाररुग्णांगो दीर्घरो
गाग्निमाविशत्॥ स हंसमिथुनं व्योम्नि दृष्ट्वातन्न्यस्तलोचनः॥ सभार्यः पंचतां प्राप्य प्रयातेराजहंसतां॥ पर्यंतवृत्तिस
न्यासाद्वियोगोदेहिदेहयोः॥ मनो निविश्य तत्रतूर्णं याति तदात्मतां॥ सराजहंसः प्रेयस्यासहफुल्लाब्जशोभिषु॥ सरोवरे
षुलहरीकेलीदोलारतोभवत्॥ कनकांबुजनालेन लीलाकंडूयतेन सः॥ विललासविलासिन्याक्षणं कुटिलकंधरः॥ मेघ
वातवियोगेष्वपुनर्दैवाच्च संगमैः॥ तयोर्दीर्घतरः कालो विषामृतमयो ययौ॥ कदाचिज्जालबद्धं सा तं प्रियं वीक्ष्य सारसी॥
जहार राजपुत्रस्य कस्यचिन्मणिसूत्रिकां॥ तदाशपासरित्यज्य जालं यातेथ लुब्धके॥ दूरे रत्नावलीं त्यक्त्वा सा तुंडेनादश
त्कपिं॥ सस्फुरत्ताडितो नेत्रे जाले सपदि मर्कटः॥ चिच्छेद तारचीत्कारो वह्निदग्ध इवोत्पलं॥ छिन्नपाशो महाजाले साहं
सीप्रियसंगता॥ पद्माकरं जगामान्यं धिया वंचितलुब्धका॥ लुब्धकोप्यथ तां प्राप्य रत्नमालां समागतः॥ दृष्टो राजसु
तेनाराच्छंकितो विस्खलत्पदः॥ परिज्ञाय निजां रत्नसूत्रिकां राजसूनुना॥ निगृहीतोनवाक्कस्य लोभात्याप्तं विनविनश्यति॥
कदाचिदथ हंसोसौ कमलं प्रियया सह॥ समादाय गतो व्योम्ना निषादेनेषुणाहतः॥ पप्तंतद्दनभ्रष्टं गंगातीरे महामुनेः॥ ५५
कुंडादस्यार्चनेशंभुलिंगच्छेत्रमिवापतत्॥ सचहंसो निषादेन भुक्तो हंसी च शूलिने॥ नैवेद्ये मुनिनातेन कल्पिता कर्मशक्तितः॥

हंसस्तु भूपतिर्जातः पद्मापातात्शिवार्चने॥ विद्याधरीच कन्येयं जाता सर्वनिवेदनात्॥ इत्येवं पूर्वभार्या ते कन्या विनयवत्यसौ॥ प
र्यंतभावसदृशी प्राणिनां सततं गतिः॥ मगर्यामेकलव्यायामेडकर्णाभिधो मुनिः॥ स्वयंभूशंभुनिलये तस्थौ जपपरायणः॥
देवदासी ततो भ्येत्य मदलीलाविलासिनी॥ चक्रेरूपवतीनाम शंभोर्व्यजनवीजनं॥ चामरानिलविभ्रस्य दक्षमालः क्रुधा मुनिः॥
सोभवद्भृकुटीभीमस्तत स्तं प्राह नर्तकी॥ भग्नस्तवजप मेकाग्रामुने माविक्रियां गमः॥ शुभाशुभध्यानधिया भवत्येव मतिभ्रमः॥ क्रो
धधूमेन धवलं मा मनोम्लानतां नयः॥ जपयज्ञेस्थितोस्य स्मिंस्तच्चित्तस्तन्मयोभव॥ तथाद्यहं वणिक्पुत्री सुनेजन्मांतरे पुरा॥ त
तः कदाचित्सौधस्था नवयौवनशालिनी॥ कमलाकरनामानमपश्यं तरुणं द्विजं॥ तदेकाग्रामनोजन्मशरश्रेणी वशीकृता॥ नात्य
जं ब्रह्मचर्यैकसंकल्पं दृढनिश्चया॥ स्मरंती तं परिक्षीणा ततोहं पंचतां गता॥ गंधवत्याः परिसरे सरितः पितुराज्ञया॥ पु
ण्यतीर्थफलाद्दस्मिसर्वज्ञा स्मरचिंतनात्॥ वेश्याजातेति पर्यंते चिंतातुल्य पुनर्भवः॥ जातिस्मरायाः श्रुत्वेति वचस्तस्य महा
मुनिः॥ बभूवविस्मयस्तस्त बभूवघनडंबरः॥ इत्युक्त्वा पुष्कराक्षाय विजितासुः स्वयं ददौ॥ रंकुमालिनमाहूय तत्पुत्रीं तरलेक्ष
णां॥ विद्याधरीं समासाद्य रथं च व्योमगामिनं॥ गत्वा स्वनगरीं भेजे पुष्कराक्षो निजां श्रियं॥ ॥ विनयवत्याख्यायिका॥ ॥ इत्येवं
पूर्यंते दैवात्सुपुण्यभाजामभीप्सितं॥ मृगांकदत्तकामं ते शार्वः सर्वं विधास्यति॥ इति विचित्रकथेनोक्तं श्रुत्वा राजसुतः स्मयात्॥ शशां
कवत्याः ख्यातेषु गणेषु गणनां व्यधात्॥ ततः कदाचित्तांबूलगंडूषं हर्म्यशेखरात्॥ मृगांकदत्तस्तस्याजसपपातच मंत्रिणि॥
मंत्री विनयवन्नाम विलोक्यत मशंकितः॥ प्रदध्यौ निविडक्रोधो राजसूनोः प्रतिक्रियां॥ मृगांकदत्तो व्यालोच्य सचिवैर्गमनेम
तिं॥ शशांकवत्यामेकाग्रो विधैर्दध्याननिश्चलः॥ पुरीं स्फुरत्क्षितद्वारां मत्वा तेगुप्तगोपुरां॥ महाव्रतिकवेषेण गंतुं च कुर्वनि
श्चयं॥ ततोस्थिके शाखद्वांगकपालैर्ज्वलडंबरं॥ गुप्तमाहूय निर्दध्ये गृहे भीमपराक्रमः॥ अत्रांतरे नरपतिं ज्ञात्वा जातविस्र
म्भिकं॥ मंत्री विनयवान्निश्चयवारज्ञः स्वैरमभ्यधात्॥ राजपुत्रेण ते राजन्नायुषश्छिद्यते हृतिः॥ अभिचारं करोत्येष गृहे भीम
पराक्रमः॥ तांबूलगंडूषरुषा निगद्येति सदुःसहं॥ प्रत्यक्षतां निनायास्मै तं कपालास्थिसंचयं॥ क्षणाच्छशांकदत्तोथ क्रो
धाधानिजमात्मजं॥ पुरान्निर्वर्तयामास दशाभिः सचिवैः सह॥ सहृष्टः प्रस्तुतोगंतुं परित्यज्य निजां पुरीं॥ वयस्यान्प्राह चित्रं

नः स्वयंसिद्धो मनोरथः॥अभिषिक्तोक्तिनातेन बाल एव सखा मम॥शक्तिरक्षितको नाम किरातेषु महीपतिः॥स्वयं तस्य पुरीं ग
त्वा विश्रम्य कृतसंविदः॥शशांकवत्याः कृते गंयास्यामो दक्षिणां दिशं॥इत्युक्त्वा राजतनयः प्रविवेश महाटवीं॥प्रसन्नभिन्नना
गासृग्लिप्तकेसरिसंकुलां॥अथास्तशिखरं याते शशिशोणितलोचने॥नभःकृष्णभुजंगस्य फणारत्न इव स्खलति॥तमस्ता
लतमालौघैः श्यामले व्योमकानने॥निशीथमत्तवेतालाग्रस्तालोके दिगंतरे॥मृगांकदत्तो दूराध्वशांतस्तृष्णानिपीडि
तः॥सचिवैः सस्तस्थौ कौ दृष्टुक्करौ तरुः॥तत्र निद्रामवाप्तास्ते क्षणं मुद्रितलोचनाः॥अर्धरात्रे प्रबुद्धोऽथ ददर्श विमलं नभः॥
शर्वरीशबरीकर्णकेतके तुहिनत्विषि॥समुद्गते नभःकालकपालतुलविभ्रमे॥स्फटिकस्तंभसंभारडंबरे रश्मिमंडले॥
दिग्दंतिदंतविपुलजाते हरिणलक्ष्मणि॥तस्य शुष्कतरोः सर्वं विरूढामंकुरश्रियं॥व्यलोकयन् पल्लवितः पुष्पहासैश्च तेऽशनैः
॥ततः फलभरैर्नम्रः स बभूव महातरुः॥सर्वाशापूरणसहो गुणैरिव कुलोद्गतः॥क्षिप्रं फलानि पक्वानि तस्य पेतुर्महीतले॥
तद्दृष्ट्वा विस्मिताः सर्वे ते च क्रुः प्राणवर्तनं॥ततः सर्वैर्भुक्तफलो बभूव सह साह्विजः॥शुभ्रयज्ञोपवीतांकश्वेतं द्रौशुभिरिवावृतः
॥कौतुकास्थतैः पृष्टः सोऽब्रवीद्वृत्तमात्मनः॥आर्जवं ब्रह्मस्कलभं दंतांशुभिरिवोद्गमन्॥दमधिर्नाम विप्रोऽभूदयोध्यानि
लयः पुरा॥तस्य शांतिमती नाम भार्या साध्वी मचारिणी॥अहं च श्रुतधिर्नाम पुत्रस्तस्य मनीषिणः॥ततः कदाचिद्दुर्भिक्षसमा
तामेनिजभोजनं॥दत्वार्थिने क्षुधार्तायधन्यात्स्याजजीवितं॥ततः पिता मे बभ्राम क्षुधातः स्फटिकलः क्षितिं॥दत्तं पुण्यवताप्रा
पकेनापि फलपंचकं॥स मह्यं त्रीणि संकल्प्य फलानि द्वे तथात्मने॥ममज्जांतर्जले स्नातुं क्षणं जपपरायणः॥ततः फलानि
सर्वाणि लौल्यादहमभक्षयं॥तत्कोपादस्मि शप्तश्च पित्रा शुष्कद्रुमोऽभवं॥युष्मत्फलोपभोगान्तः सत्त्वशापो गतोऽद्य मे॥शु
शुक्रशास्त्रं द्रजालज्ञो योग्यो हं नृपसेवने॥अधुना च प्रपन्नोऽहं भवत्सचिवतामिति॥ ॥श्रुतधिसमागमकथा॥ ॥श्रु
तधेर्वचनं श्रुत्वा कथयित्वा निजां कथां॥तेनैव सहिताः प्रातस्ते ययुर्दक्षिणां दिशं॥करिमंडितकं नाम ते प्रविश्य महद्वनं
॥द्विजैर्निमंत्रितास्तत्र त्रिफलारसपायिभिः॥यातापं च शतानि तेषां वत्सराणां किलायुषः॥आमंत्र्य वयस्सारो गास्तान्
किरातपुरं ययुः॥स्फुद्दासंगतस्तत्र किरातपतिना ततः॥कर्तव्यमानुकूल्यं नः कार्येष्विति तमब्रुवन्॥शक्तिरक्षितकाख्ये

न सादरं तेन पूजिताः॥महाटवीं प्रविश्य याराद पश्यन्वृद्धतापसं॥स तैः पृष्टोऽब्रवीत्पूर्वं श्रुदकीर्तिरभूद्व्रती॥तस्याभिशि
ष्यः पृथिवीं भ्रांतः सिद्धिशातोत्सुकः॥ततः पृष्टो मया कश्चिद्व्योराजकुमारकः॥स्वस्थवेषं समाधायनिधिसिद्धिरसौषधीः
॥स सर्वमुक्त्वा मामाह विंध्याटव्यां तृणावृते॥नागः पारावतारव्योऽस्ति भवने हंससूचिते॥वैडूर्यकांति नामास्ति खड्गस्तस्य महा
प्रभः॥सिद्धाधिपत्यं येनाशु यानि सत्त्वेन लभ्यते॥इत्याकर्ण्य प्रयातोऽहं मंत्रावेशाद्विमुच्यतां॥प्राप्याटवीमिमां सिद्धो सहाय
श्चिंतितो मया॥चिरं ध्यात्वापि न यदा योग्यं पश्यामि कंचन॥सचिवं भ्रांतसंतप्तस्तदाहं भर्तुमुद्यतः॥मृगांकदत्तः श्रुत्वेति तमुवाच
तपस्विनं॥अहं सहायः सामात्यः स्थितस्ते भगवन्निति॥पादलेपं ततस्तेभ्यस्तपस्वी मुदितो ददौ॥येन व्योमचराः सर्वे प्रापुर्विं
ध्याटवीं क्षणात्॥तत्र नागेंद्रभवनोपांते मंत्रविधिव्रतः॥जुहाव शिंशपामूले स तपस्वी हुताशनं॥खादिरैः कीलकैर्बद्धं दिक्षु तैः
प्रविधाय तान्॥मृगांकदत्तप्रमुखान्सर्वभौदिक्ष्वपतीनिव॥ततो ददृश्यत मत्तालिलोलनीलोत्पलेक्षणा॥ललनास्मरसर्वस्वं
विश्राणान वयौवनं॥साक्कणन्मेखलादाम मणिकिंकरनूपुरा॥परिचर्यां च कारास्य होमोपकरणेषु रः॥विलासवलितानत्र
प्यग्रान्चटुलचारिणी॥अलक्षितां सा पस्पर्श स्तने नांगं तपस्विनः॥तत्करस्पर्शसंहर्षविक्रियासक्षुब्धचेतसः॥होमभांडं पपा
ताशु तस्य कंपजुषः करात्॥अत्रांतरे समुत्तस्थौ मेघस्थगितादिङ्मुखः॥विद्युन्निपातनिर्घातघोरघोषः फणीश्वरः॥मृगां
कदत्तप्रमुखावास्य नागं पुरस्थितं॥गंभीरधीरसंरंभं खड्गहस्ताः समुद्ययुः॥पारावताक्षः सन्नद्धान्दृष्ट्वा तानवदद्द्विजः॥यु
ष्मद्गुरुर्विपन्नोऽयं वंचितो विप्रयोषिता॥यूयमेकीकृता येन वियुक्ताम मविप्रिये॥वियोगस्तूर्णमेवास्तु विपिने भवतां मिथः॥
इति लब्ध्वसा सर्वा तिमिरेणातिरस्कृताः॥ययुः संभ्रांतमनसः सह सैव पृथक्पृथक्॥ ॥पारावताक्षशापः॥ ॥मृगांकदत्तः
शोकार्तो ययौ श्रुतधिना मुहुः॥आश्वास्यमानो यत्नेन ततो वज्रैरिवाहतः॥तत्संगमाशां हृदये विधायोज्जयिनीं शनैः॥निःस
हः प्रस्थितो गंतुं दृष्टो विमलबुद्धिना॥स साश्रुलोचनो गाढं परिष्वज्य नृपात्मजं॥उवाच दीर्घं निश्वस्य हर्षशोककरंबितः॥अ
प्यहं तेन नागेन क्षिप्तो विंध्यगिरेस्तटे॥अपश्यं तेजसां राशिं ब्रह्मदंडं महामुनिं॥ततोऽपश्यं ललनया वर्तमानं समंततः॥कुला
लचक्रमुद्भ्रांतेर्भ्रमरैरभितो वृतं॥तत्र स्थितौ वृषखरौ तयोः फेनं सितारुणं॥पीत्वा तेन तयोर्विच्छाभृंगाः स्फुसाः सितासिताः॥

सहसानत्समुद्भूतास्तेनुकाराः सिवालिषः ॥ असिनाश्वासिनोसन्नाश्वक्रुर्जालमिनासितं ॥ तेनजालेनमधुपाबद्धावर्णविभे
दिनः ॥ पपुर्विपलतामेकेसिंधुवारलतांपरे ॥ ततोविषार्ताश्चक्रंदस्तच्छ्रुत्वाप्यविषस्पृशः ॥ चुकुशुः करुणंतच्च कश्चिन्मुनिर
थाशृणोत् ॥ तत्कुलाटसमुत्थाग्निकणदग्धोग्रबंधनाः ॥ वंद्रानतेननिर्गत्यतेजः छत्रंसमाविशन् ॥ इत्यहंकौतुकंदृष्ट्वापुन
श्चापश्यमुन्नतं ॥ दंष्ट्राबाहुं महासिंहंसिंहामनुस्तुतंवने ॥ विदार्यकुंजरान्मत्तान्युंसालंबोदरेणसः ॥ दृष्टमार्गः श्रियांप्रा
पकेसरीधवलद्युतिः ॥ इत्याश्चर्यंतदालोक्यव्रतदंडंमहामुनिं ॥ अपृच्छंसोपिमामाहभगवान्ज्ञानलोचनः ॥ संसारचक्रसं
सक्ताभंगास्तेकर्मिणोनराः ॥ महामायाचसायोषिद्धर्माधर्मौचगोरवरो ॥ विषंनरकदुःखंतत्सिंधुवारः स्मरालयः ॥ मरे
श्वरेणरूपयामुक्तास्तेदग्धकिल्बिषाः ॥ वंद्रोनब्रह्मरंध्रेणयानास्तेजोमयंपदं ॥ सिंहोमृगांकदत्तश्च वयस्यास्तस्यवा
हनः ॥ लंबोदरप्रसादेनसकांतांध्रुवमाप्स्यति ॥ इत्यहंतेनमुनिनाप्रशांतेनविबोधितः ॥ देवालदंतिकंप्राप्तः प्रमाण
मधुनाशिवः ॥ ॥संसारचक्रं॥ ॥मृगांगदत्तः श्रुत्वेतिचित्रंश्रुतधिनासह ॥ विस्मयंपरमंभेजेधृतिधीरोबबंधच ॥
सगच्छन्नर्मदांप्रापफेनहासविलासिनीं ॥ माधाहि हृंगवाचालमेखलांनर्मदायिनीं ॥ ददर्शतत्रसलिलेयुवानंशबरा
धिपं ॥ स्नानव्यग्रंमहाग्राहेर्गृहीतंकुंजरोपमैः ॥ मृगांकदत्तस्तदृष्ट्वाग्राहान्छित्वामहासिना ॥ धीरोमायाबटुंनाम
शबरेंद्रममोचयत् ॥ ततः संजातसौहार्दस्तेननीतोनिजालयं ॥ प्रणम्यपूजितोदूराचंडालशबराधिपैः ॥ तथादुर्गाप
शाचाद्यैः साक्षाच्छक्रइवागतः ॥ मायाबटुगृहेप्रीतः कंचित्कालमुवाससः ॥ तत्रपर्जन्यघोषेणप्रनृत्तेणशिखंडिषु ॥
शबरेंद्रप्रतीहारश्चंडकेतुर्भोरयत ॥ गृहेममयूरोस्तियोस्तंभानोगतेसदा ॥ अनपेक्षितपर्जन्योनृत्यतींद्रायुध
छविः ॥ इत्युक्त्वाशबरेंद्रंचद्यूतकेलीकलापिनं ॥ नचिराद्दर्शयामीतिचंडकेतुरभाषत ॥ ततः सूर्येस्तमायातेघृता
कतिमिरैर्घनैः ॥ भिल्लपल्लीषुमायूरपिच्छकाछादनैरिव ॥ नद्धास्फदिक्ष्कसर्वास्फकौंजरैरिवचर्मभिः ॥ आकान्नोत्राब
रीकेशपाशासंकाशनोत्रिषि ॥ एकेमृगांकदत्तोथव्रजन्केनापिताडितः ॥ स्कंधेस्कंधेनतिमिरेतत्कोपाद्दिदमभ्यधात् ॥
॥ अरेदर्पांधुरःकोयंमत्कोपाग्निपतंगकः ॥ श्रुत्वेत्याहप्रतीहारंचंडकेतुरलक्षितः ॥ चारोहंनापराधोमेचंक्रस्येषव्यतिक्रमः ॥ ५७

यदालोकंविनालोकः सनेत्रोप्यंधतांगतः ॥ दैवस्यवानिकारोयंयेनत्रैलोक्यचक्षुषः ॥ नस्यापिभानोर्विहिताः संपदापप
रिवृत्तयः ॥ मृगांकदत्तः श्रुत्वेतिवीरोहमितिवादिनं ॥ तमवादीदहमपिस्तेनएवपरस्वहृत् ॥ इतिभावंपरिज्ञायमिथः सौहा
र्दमाश्रितौ ॥ सस्त्वलुःपथितौश्यामातमः संधीतविग्रहौ ॥ मायाबटोप्रतीहारः सहिप्रच्छन्नकामुकः ॥ सदातन्महिषीरा
त्रौभजतेगूढचारिणीं ॥ ततोमृगांकदत्तेनछन्नेनानुगतः क्षणात् ॥ सचंडकेतुरविशद्धिलेनांतःपुरोदरं ॥ मायाबटु
प्रियांतत्रसमंजुमतिकाभिधां ॥ प्राप्यलेभेस्मररसादत्तालिंगननिर्वृतिं ॥ अलछितोविलछिद्रन्यस्तनेत्रोददर्शतं ॥ मृ
गांकदत्तोदुःशीलांतांचमायाबटोर्वधूं ॥ ईर्ष्याविवादेसतयाप्रतीहारोविरोधितः ॥ चकर्षशस्त्रंरागोहिखलानांकलहो
दयः ॥ रतोत्सवेप्रस्तुतेपिसंजातेशस्त्रसंभ्रमे ॥ छिन्नानिवारणेतत्रदास्याःकरतलांगुलिः ॥ ततः क्रुद्धः सनिर्गत्यनिज
वेश्मव्रजन्निशि ॥ मृगांकदत्तमज्ञात्वाचंडकेतुरभाषत ॥ तूर्णमेहिगच्छावः खिन्नोदीर्घप्रजागरात् ॥ निद्रांप्राप्संनिजगृ
हंविस्रब्धोद्यसिमेसुहृत् ॥ इत्युक्त्वातेननीतोसौस्वगृहंद्रोहचेतसा ॥ दृष्टमच्चरितोवध्योममायमितिनिश्चयात् ॥ मृगां
कदत्तस्तद्गृहंप्रविश्यालक्षितोनिशि ॥ प्रदिष्टंतेननिद्रार्थंशून्यंमंदिरमाविशत् ॥ प्रतिहारगृहेतत्रास्थितोदीपांशुमालि
ते ॥ केलीशिखंडिनंदूराद्ददर्शरुचिरच्छविं ॥ स्फस्निग्धालोकिनस्तस्यबंधोरिवगजास्थितं ॥ सगाढबंधनंसूत्रंकृपयैव
न्यवारयत् ॥ कंठसूत्रेव्यपगतेसोभूद्भीमपराक्रमः ॥ मृगांकदत्तस्तंदृष्ट्वाहृष्टः पप्रच्छविस्मयात् ॥ सखेहर्षसुधासिंधुसं
गमः किमिदंकुतः ॥ वृत्तंवाकथ्यतांसर्वंसुहृदेवासिमेस्फुटं ॥ श्रुत्वेतितंपरिष्वज्यप्राहभीमपराक्रमः ॥ अप्यहंनागशापे
नप्रविष्टोविकटाटवीं ॥ दर्भसूचाचितांघोरांदावाग्निप्लुष्टपादपां ॥ उद्धूततप्तसिकतांसंजातमृगतृष्णिकां ॥ खिद्यद्द
राहमहिषांताम्यत्तप्तभुजंगमां ॥ शुष्यत्कुरंगशावाकांतृष्यच्छिखिकुलाकुलां ॥ तत्रश्रांतश्चिरंश्रांतोमूलेशाल्मलिशाखि
नः ॥ प्राणत्यागकृतोद्योगंमांवृद्धपथिकोवदत् ॥ परिम्लानमुखच्छायोभद्रकिंपरितप्यसे ॥ संसारदुःखसरणिर्वैकुव्येन
नलंघ्यते ॥ इत्युक्त्वामत्कथांश्रुत्वापुनराहमहामतिः ॥ वृद्धपांथोनशोकेनधीराणांस्पृश्यतेमनः ॥ अवश्यंहिभवत्येवजी
वतांसंगमःपुनः ॥ धैर्यंश्रयविपत्पारजलधौसेतुरेवतत् ॥ कोशलायामभूद्भूपोविभूतेःप्रथमाकरः ॥ तारापतिकराका

रचरितोविमलाकरः॥ कमलाकरनामाभूत्कमलाकमलाकरः॥ तनयस्तस्यराजश्रीविलासमणिदर्पणः॥ सांगोयमप
रोनंगः सोंगनापांगसंगतिः॥ इत्यूचुर्यस्ययात्रास्थास्तरुण्योरूपविस्मिताः॥ बंदिमागधसूतेभ्योविनरन्मणिकंकणान्
॥पठितांबदिवर्येणस्फुथावार्यास्फविस्मितः॥ कुवलयभूषणममलेगुणिनिलयंकविसहस्रसंघुष्टं॥ हंसावलीवक्रमनो
कांतंकमलाकरंमुक्त्वा॥ इत्यार्यांगदितांश्रुत्वासमनोरथसिद्धिना॥ किमेतदितिपप्रच्छतेरहःकौतुकाकुलः॥ सोब्रवीदस्ति
नगरीविदिशानामविश्रुता॥ आवर्तमानयालक्ष्म्याविदिशेवसमाश्रिता॥ मेघमालीतिविख्यातस्तस्यामस्तिमहीपतिः॥
तस्यहंसावलीनामतनयास्तिशुचिस्मिता॥ मुक्तावलीवकामस्यविस्तीर्णगुणगुंफिता॥ स्फुमुखीपल्लवकरास्तनस्तबक
शालिनी॥ सचंद्रपारिजातेवलहरीक्षीरवारिधेः॥ मन्मथायोपनीतेववेधसामोहनौषधिः॥ यदृच्छयागतोपत्रयंकदाचित्तां
पुरीमहं॥ अवसंदर्दुराख्यस्य नाट्याचार्यस्यवेश्मनि॥ अत्रांतरेसाशुभांगीनर्तकेनस्फशिक्षिता॥ पितुःपुरोनृत्यतीतिप्र
वादोनगरेभवत्॥ ततोहंकौतुकाविष्टोनाट्याचार्यसमाश्रयात्॥ आविशंमार्जनाराजन्मुरजंनाट्यमंडपं॥ मूर्छद्वीणासमा
लापतालस्थितकलावशे॥ संप्रवृत्तेध्रुवागीतेवरयात्राभिधायिनि॥ अत्रांतरेविश्वसृजाराज्ञेदत्ताजगज्जये॥ नवलाव
ण्यनिर्माणहस्तोपायनपुत्रिका॥ विवेशासत्वसंपन्नासूत्राभिनयशालिनी॥ ततोहंसावलीहेलाविकीर्णकुसुमांज
लिः॥ मूर्तेवकैशिकीवृत्तिर्नाट्यस्येवाधिदेवता॥ सामान्यस्यापितुस्तत्रचक्रेकमपिविस्मयं॥ विलासललितंतस्याविव
भौवदनांबुजं॥ नांदीश्रवणसंतोषाच्चंद्रःसाक्षादिवागतः॥ साबालानिजलावण्यविशालाकल्पवल्लरी॥ शृंगाररसरसा
लोकेनेत्रामृतफलंददौ॥ बालचूतांकुरास्वादकलकोकिलनिस्वना॥ सापपावविपंचीवपंचमानुगतस्वरा॥ जयतिस
नाभिसरोरुहमधुकरपटलैरिवासिताकारः॥ शौरिःश्रीमुखचंद्रेयत्कांतिलांछितच्छाया॥ इतिब्रुवाणावक्त्रा काशो
रभाहूतषट्पदैः॥ साचभौश्रावकोद्भूतैःसाधुवादाक्षरैरिव॥ ततोदिनांतेतनयानाट्यदर्शननिर्वृते॥ अंतःपुरंगतेरा
ज्ञिवृत्तेसामाजिकोत्सवे॥ अचिंतयमहंदेवकन्येयंमृगलोचना॥ कमलाकरदेवस्ययोग्येवेतिमुहुर्मुहुः॥ ततश्चित्रक ५८
वेषेणाविशंराजनिकेतनं॥ कन्यांतःपुरचित्रेत्वंतुल्याकारमलीलिखं॥ विहितोन्मदवेषोथवयस्यामम दर्दुरः॥ चित्रस्थं

प्रकटीकर्तुंत्वांतुष्टावमुहुर्मुहुः॥ नामाभिजनमाकर्ण्यत्वदीयंतेनवर्णितं॥ त्वदाकारेकविन्यस्तलोचनासाभवच्चिरं॥ ततोनवा
वतारेणस्मरेणरुचिरद्युतिः॥ साबभूववसंतेनलतेवोत्कलिकाकुला॥ प्रतिपच्चंद्रलेखेवतनःसाचारुहासिनी॥ मनोभवानल
ज्वालाकलितानतुतांययौ॥ छन्नाज्वरापदेशेनविभ्रतीस्मरविक्रियां॥ द्रष्टुंपित्राभ्यनुज्ञाताश्रेयसेश्रीपतिंययौ॥ ततोदर्दु
रकेणाहंसहितोज्ञाततत्कथः॥ कृतप्रवेशास्तत्रैवयुक्त्यातंदेशमागतः॥ ततोहंसावलीदृष्टामयाविरहनिःसहा॥ हंसाव
लीवनलिनीदलशाय्याकृतास्थितिः॥ दृष्ट्वातांविष्णुनिलयेराजपुत्रींस्मरातुरां॥ अपठंस्तुतिमभ्येत्यशौरेस्तन्नस्तलोचनः
जयकमलाकरलालितचरणसमाक्रांतविश्वविश्वालन्॥ प्रकटसद्दर्शनकांतपुरुषोत्तमपुंडरीकाक्ष॥ इतिप्रियतमश्लिष्टांसा
श्रुत्वाभगवत्स्तुतिं॥ पुनःपुनःपठेत्याहमांहर्षाकीर्णलोचना॥ प्रत्यभिज्ञायसामह्यंददौचीनांशुकद्वयं॥ यस्तत्वेतयान्य
स्तागाथैषारक्तचंदनैः॥ साचेयंतत्करन्यस्ताद्वयतेंशुकपल्लवे॥ गाथापुष्पशरस्येवदीक्षामंत्राणमालिका॥ श्रुत्वेतिरा
जतनयःसहसामनसाययौ॥ तामेवमन्मथाक्रांतोदिव्यंद्विनयनंमनः॥ कदाचिदथपित्रासौदिग्जयायमहाभुजः॥ आ
दिष्टोनिर्ययावब्धिवेलाविश्रांतसैनिकः॥ यत्तुरंगखुरोद्भूतसांद्रधूलीकरंबकैः॥ दिग्वारणाःक्षणंपेतुस्तदाघातेसमु
त्सुकाः॥ सराजतनयांध्यायन्प्रययौविजयोन्मुखः॥ संस्मरन्राजकदलींमीलिताक्षइवद्विपः॥ अंगराजंरणेजित्वाकुल
भूतिंमहाबलं॥ जीवग्राहंगृहीत्वासौप्राहिणोन्नगरींपितुः॥ भग्नास्फशत्रुसेनास्फसमरेप्रतिबिंबितं॥ षड्गांतर्निजमैवे
क्षं सोपश्यत्संमुखंमुखं॥ क्षिप्तायशोदिगंतेषुसहभिन्नेभमौक्तिकैः॥ कपोलपत्ररहिताःसचक्रेशत्रुयोषितः॥ वि
दिशांशनकैःप्राप्यतस्थौवेत्रवतीतटे॥ नर्तयन्नाजगर्जाभिरुद्यानशिखिमंडलीं॥ तत्रदूतेनभूपालंययाचेमेघमालिनं
॥ हंसावलींस्मरावासनिजमानसवासिनीं॥ ततःस्वयंसमभ्येत्यमेघमालीप्रणम्यतं॥ उवाचकृतकृत्योहंत्वदाज्ञाग्रहणा
दिभिः॥ निर्दिष्टाविष्णुनैवेषामत्सुतातववल्लभा॥ यत्करस्पृष्टशिरसांदेहिनांनक्षयतिज्वरः॥ वितीर्णातनयातुभ्यंवं
शमुक्तावलीमया॥ प्रातःक्षपायांभवितायुष्मत्परिणयोत्सवः॥ इत्युक्त्वाविदिशाधीशःप्रविश्यांतःपुरंनिजं॥ चक्रेविदि
तवृत्तांतांतनयांवल्लभांतथा॥ हंसावलीचित्रगतंध्यायंतीकमलाकरं॥ सएवान्योथवाकश्चिदितिदोलाकुलाभवत्॥

सादि देशासर्वांस्वैरं कांतां कनकमंजरीं ॥ दृष्ट्वा राजसुतं तूर्णमेहीत्याह्वितसंशया ॥ बद्धकूटजटाजूटाततः कनकमंजरी
॥ कृष्णाजिनोत्तरासंगपीडितोच्चकुचस्थली ॥ राहुग्रस्तस्यामृतांशोरिवप्रव्रजितद्युतिः ॥ द्रष्टुं तपस्विनीं वेषाप्रययौ कम
लाकरं ॥ रत्नोपायनहस्तासा कांतं दृष्ट्वा नृपात्मजं ॥ बभूव मन्मथाविष्टा ने न संभाविताक्षणात् ॥ सा विस्मृतसखीस्नेहा
तं निर्वर्ण्य स्मरोपमं ॥ तस्थौ नदुत्सुका कस्य सिद्धयोस्वैरिणी सखी ॥ ततो हंसावली मेत्य सास्रवीन्मन्मथाहता ॥ उन्म
त्तोसौ नृपसुतो दृष्टो मंत्रिवृतो मया ॥ भूतच्छायाभिभूतेन नोचितस्तेन ते सखि ॥ चूतवल्याइवासंगः क्रोडभुक्षेण शाखि
ना ॥ इति राजसुताश्रुत्वा न सोयमिति चेतसा ॥ निश्चित्योद्वाहविमुखी बभूव भृत्रादुःखिता ॥ सखि त्वं मम वेषेण पाणिग्रहम
होत्सवे ॥ भजैनं न हि मे किंचिन्मन्यत्र कमलाकरात् ॥ इति हंसावली वाक्यं श्रुत्वा कनकमंजरी ॥ उवाच त्वद्वशास्मीति सानंदं
कृतसंवृतिः ॥ स्थातव्यं नगरोपांते कूटशाल्मलिकोटरे ॥ त्वया वृत्तविवाह्याहं त्वां समेष्याम्यलक्षिता ॥ हंसावलीमिति स्वैर
मुक्त्वा कनकमंजरी ॥ तदाभरणवासोभिस्तद्भूषां विदधे तनुं ॥ कृत्वा विदितवृत्तांतां सखीं द्रोहे निजाकृतिं ॥ सा प्यशोककरीं
नाम विवाहवसुधां ययौ ॥ ततो महोत्सवव्यग्रसमग्रजनमंडले ॥ हंसावली गूढवेषा प्रययावाशु कूटशाल्मलीं ॥ तत्कोटरं समा
लोक्य भीषणं भृदुमानसा ॥ लताजालांतरे तस्थौ बालाचकुलदाखिनः ॥ ततः कोलाहलोत्तालव्यालोलजनसंकुले ॥ तां
कूटकन्यकां प्राप्य प्रययौ कमलाकरः ॥ सव्रजन्दिजयीतत्रयात्रायानद्वस्मरः ॥ शाल्मलेः संनिधिं प्रापगजेंद्रजघटा
कुलः ॥ सहसातत्र कृतकोद्दामत्रासाकुलेक्षणा ॥ त्रायस्वेत्याहतं कंपलोला कनकमंजरी ॥ किमेतदिति तेनोक्ता सावदद्दृश
शाल्मलेः ॥ अस्यांतरे स्थितेस्वप्ने मया दृष्टा निशाचरी ॥ तया वित्रासितः कोपि ब्राह्मणो ममभाषत ॥ नादग्धा शाल्मली नु
भ्यं श्रेयोस्तीति रुषाकुलं ॥ आर्यपुत्राधुना सर्वं जानातीति तयेरितः ॥ शाल्मलीं सेवकैस्तूर्णं राजसूनुरदाहयत् ॥ दह्यमा
नं मानं तमालोक्य ज्वालालीदनभस्तलं ॥ हा सख्या वंचितास्मीति प्राह हंसावली मुहुः ॥ अहो नु रूपलोभेन सखी मां मुग्ध
मानसां ॥ दग्धुमभ्युद्यता पापा या निःसंगसुखकांक्षिणी ॥ अयं रतिपतेस्तुल्यः प्रत्यक्षपुरुषोत्तमः ॥ नाधन्यया मया प्राप्तो दै
वं कालेन लंघ्यते ॥ अहो कांतिरहो लक्ष्मीरहो यौवनसंपदः ॥ अहो नु राजपुत्रस्य नेत्रसंचरणं वपुः ॥ अयं सचित्रलिखितः श्री ५९

मान्यस्य दलेक्षणः ॥ सन्मानसकृतावासो विलासरससारसः ॥ विप्रलब्धास्मि दैवेन प्रविशामि कृताशनं ॥ प्रियाप्राप्तिनिरा
सेन किं शरीरेण शोषिणा ॥ इति संचिंत्य शनकैः कृत्वा भगवतो वचः ॥ प्रतीकाराय सख्याश्च गात्यजत्सा तनुं तनुं ॥ कोशलामथ
संप्राप्य प्रहृष्टः कमलाकरः ॥ अंतःपुरं नृपो गत्वा भेजे वल्लभया सह ॥ तां मनोरथसिद्धिं च दृष्ट्वा कनकमंजरी ॥ हा वंचितो राजपु
त्रश्चिंतयित्वेत्य गाढ दृढं ॥ तत्र चिंतापरो वंदीत दन्वेष्टुं समुद्यतः ॥ मात्रा निवारितो राजरहस्यं निर्दहेद्रति ॥ ततो हंसावलीलोक
दर्शना शंकिनीर्त्वगैः ॥ विवेशानिशिनिःशेषशोकशालामिवाटवीं ॥ चिंतामिव स निर्वेदां खलसेवामिवाफलां ॥ जरतीमिव विच्छा
यां दुर्दशामिव तापिनीं ॥ वेश्यामिव महातृष्णां चिंतामिव भयंकरीं ॥ यां चामिव न्यस्तमानां डाकिनीमिव दुःसहां ॥ राक्षसी
भिः शतघ्नीभिर्भिन्नैः शोषिताशिभिः ॥ नारजालैश्च निचितां युद्धभूमिमिवाकुलां ॥ घोरां प्रविश्य तां तन्वी सित्रासतरलेक्ष
णा ॥ हाता नेत्यश्रुलुलितं विलपंती मुमोह सा ॥ ततः शनैः समाश्वास्य पवनाकुलितालका ॥ ददर्श शर्वरीं क्षीणां विरहार्तामि
वांगनां ॥ अथोदिते भगवति व्यामश्रीपतिकौस्तुभे ॥ भास्करे त्वं द्रविरहक्लांते कुमुदिनीगणे ॥ शनैर्व्रजंता शोकार्ता सा बाला
तरुसुंदरं ॥ द्वितीयं कामनं भेजे मंजुकूजद्विहंगमं ॥ अत्रांतरे वसंतस्य विशदाः कुसुमश्रियः ॥ विशदाः प्रोषितस्त्रीणां व
नांते षु च काशिरे ॥ व्याकोशकिंशुकाशोकपलाशो विवभुर्दिशः ॥ स्मरघोषरुषास्फूर्जज्ज्वालाजाले रिवाकुलैः ॥ बभुर्वि
रहिणी शोकतप्तनिश्वाससोदराः ॥ चूतचंपककिंजल्कपिंजरा दक्षिणानिलाः ॥ ततो हंसावली तत्र फुल्लपंकजिनी
तटे ॥ बालातीरलतापुष्पैर्गौरीपणमपूजयत् ॥ अत्रांतरे ज्वरार्तोभूत्स्वपुरे कमलाकरः ॥ तत्प्राप्ताचिंतयेत्स्वैरं खि
न्ना कनकमंजरी ॥ अहो परीक्षाकालोयं प्राप्तो मे कूटयोषितः ॥ हंसावली ज्वरहरेत्येषवादो हि विश्रुतः ॥ आहूता किं विधा
स्यामि भर्तुर्ज्वरनिवृत्तये ॥ वध्या शोककरी तावत्कं दा[illegible] भवेत् ॥ सख्यो द्रोहरताः सर्वा भवंत्येव यथा ह्यहं ॥ पुरा
भद्रशिवा नाम योगिन्युपदिदेश मां ॥ शून्यलिंगालये[illegible]पिशिताचनैः ॥ धीरो न रोपद[illegible]
तस्मात्तदेव कृत्वाद्य हत्वा शोककरीं सखीं ॥ ज्वरं च भेदशा[illegible]हं ॥ इ[illegible]
हः ॥ कार्यं विदितवृत्तांतामुपहारकथां विना ॥ द्वारपालान्समाभाष्य राज्ञो रक्ष[illegible]

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ननाइति॥ गत्वासखींसमादायभून्यलिंगनिकेतने॥ कृत्वायथोदितंसर्वंखड्गाग्रेणजघानते॥ अभ्याहतातथानारं त्रायस्वे
तिकृतारवा॥ जवाज्जगामशरणंसाराजद्वाररक्षिणः॥ मुक्तकेशीखड्गहस्तातस्याःपश्चात्समागतां॥ राक्षसीतिनिजघ्नुस्ते
ततःकनकमंजरीं॥ अथाशोककरीतेभ्यस्तद्वृत्तांतंन्यवेदयत्॥ विप्रलब्धंपरिणयेप्राग्यथाकमलाकरं॥ राजपुत्रोथविज्ञाय
तस्याःकपटचेष्टितं॥ गृहाद्वंदिनमानाय्यशुशोचमुषितोयथा॥ क्वसाहंसावलीयाताममापुण्यघनोदयैः॥ अहोविधातुरा
श्चर्यश्रमोनिःफलतांगतः॥ अहोनुदग्धानांवालांवन्हिःकुसुमकोमलां॥ मन्येसंतापमतुलंनत्यक्षतियुगैरपि॥ हाहंसा
वलिलावण्यचंद्रिकेक्वासिदेहिमे॥ वाचमित्यश्रुललितंविललापनृपात्मजः॥ ततस्तमवदद्वंदीदेवमाविक्लवोभव॥ अवश्यंवि
स्मुनादिष्टांतांप्राप्स्यसिसुलोचनां॥ अविषादेनमोहस्यधैर्येणव्यसनस्यच॥ नयनेचप्रमादस्यमूलादुन्मूलनक्षमं॥ धीमतां
सत्वशीलानांकृतिनांव्यवसायिनां॥ पुनःप्ररोहमायातित्रुटितोपिमनोरथः॥ श्रुत्वेत्युचितमाख्यानंसमनोरथसिद्धिना॥
सहतेनैवदयितांविचेतुंप्रददौस्वयं॥ भ्रांत्वामहीमविज्ञातोदैवात्तत्प्रापकाननं॥ अवश्यंभाविनोभावायसत्यंमार्गदर्शिनः॥ तत्र
फुल्ललताजालेलीनालिकुलसंकुले॥ स्त्रियंपुष्पशरस्येवसोपश्यत्स्तवकस्तनीं॥ सेयंहंसावलीसाराज्ञांमनोरथसिद्धिना॥
सूचितांपुंडरीकाक्षपूजापरिकरोद्यतां॥ लावण्यपुण्यनादिनींसिद्धिंरतिपतेरिव॥ यक्ष्मक्षयायचंद्रस्यसत्रनामिवरो
हिणीं॥ अलिकालिकुलांलीलावल्लरींपाणिपल्लवां॥ येशालामचिरावाप्तविप्रयोगाविपल्लवां॥ तांवीक्ष्यहर्षपीयूषवर्षि
णांनिर्वृतोभवत्॥ चिरान्मनोरथाभ्यस्तःकस्यलाभोहिनोत्सवः॥ सापितन्मन्मथाशंकाचकितायतलोचना॥ दृष्ट्वावंदिगि
राज्ञातप्रियंलज्ञाननाभवत्॥ ततोनिवेद्यसंहृष्टौविप्रलंभकथांमिथः॥ तौवंदिनासहक्षिप्रंजग्मतुःकोशलांपुरीं॥ मेघमा
लिनमाहूयविदिशाधिपतिंततः॥ कृत्वापरिणयंभेजेतांकन्यांकमलाकरः॥ इत्येवंजीवतांतातभवंतिशुभसंपदः॥ अवा
प्स्यस्यचिरादेववयस्यंमाकृशोभव॥ ॥हंसावलीसमागमः॥ ॥इतिपांथवचःश्रुत्वासप्राप्योज्जयिनींशनैः॥ प्रतिश्रया
र्थीवृद्धायाःप्रविष्टोहंनिवेशनं॥ रूपकत्रयमादायसामेभोजनसिद्धये॥ दिदेशास्वट्टांश्चांतस्यायाचिताप्रश्रयान्मम॥ त
तस्तुजीर्णजालेनतयोस्तांजवमुष्टिकां॥ अपश्यंतौचसंजातांसहसाफलितामपि॥ तैर्यवैर्विदितान्सक्तून्मदर्थमुपकल्प्यसा॥